श्रीगणेशाय नमः ॥ अथ दानचंद्रिकानुक्रमणिकाप्रारंभः ॥

सं०४०
१

दी० नं०

८१ वस्त्रदानानि
८२ श्वेतवस्त्रदानं
८२ पीतवस्त्रदानं
८२ रक्तवस्त्रदानं
८० नीलवस्त्रदानं
८० चित्रवस्त्रदानं
८० कृष्णवस्त्रदानं
८० पट्टकूलवस्त्रदानं
८० ऊर्णावस्त्रदानं
८० कंबलदानं
८० चित्रकंबलदानं
८१ ताम्रपात्रदानं
८१ कांस्यपात्रदानं

८१ लोहपात्रदानं
८१ रौप्यपात्रदानं
८२ सुवर्णपात्रदानं
८२ स्थालीदानं
८२ पुराणदानानि
८३ रत्नदानानि
८४ मौक्तिक
८४ प्रवाल
८४ मणिभूषणदानं
८४ हारिद्रादानं
८४ कुंकुमदानं
८४ सिंदूरदानं
८४ कस्तूरीदानं
८४ कर्पूरदानं

८४ अथ देवेशांतिदानं
८५ त्रपादानं
८५ हेमंते अग्निदानं
८५ अथ दीपदानं
८६ पांथपरिचर्या
८६ गोपरिचर्या
८६ धर्मघटदानं
८७ कलशदानं
८७ जलपात्रदानं
८७ यज्ञोपवीतदानं
८७ मासदानानि
८७ घृतपात्रछायादानं
८८ अधिकमासे त्रयस्त्रिंशदपूपदानं
८९ अथ संक्रांतिदानानि

९९ नानाधान्यदानमंत्राः॥
१०० तंडुलदानमंत्रः
१०० व्रीहिदानमंत्रः
१०० यवदानमंत्रः
१०० गोधूमदानमंत्रः
१०० मुद्गदानमंत्रः
१०० चणकदानमंत्रः
१०० तिलदानमंत्रः
१०० ससुवर्णतिलपात्रदानं
१०० निष्पावदानमंत्रः
१०० प्रियंगुदानमंत्रः
१०१ कोद्रवदानमंत्रः
१०१ मसूरिकादानमंत्रः
१०१ सामान्यतः सर्वधान्यदानमंत्रः

१ अन्नदानमंत्राः
१ पायसदानमंत्रः
१ मंडकदानमंत्रः
१ अन्नदानमंत्रः
१ दध्यन्नदानमंत्रः
१ कंसरान्नदानमंत्रः
१ नानाभक्ष्यदानमंत्रः
१ सर्वान्नदानमंत्रः
१ सक्तुदानमंत्रः
१ शर्करादानमंत्रः
१ गुडदानमंत्रः
१ इक्षुदंडदानमंत्रः
१ मधुदानमंत्रः
१ घृतदानमंत्रः
१ तैलदानमंत्रः
१ नवनीतदानमंत्रः

२ क्षीरदानमंत्रः
२ दधिदानमंत्रः
२ तक्रदानमंत्रः
२ सोपस्करं चर्वतांबूलदानमंत्रः
२ पादुकादानमंत्रः
२ छत्रदानमंत्रः
२ चामरदानमंत्रः
२ व्यजनदानमंत्रः
२ दर्पणदानमंत्रः
२ कूष्मांडदानं
२ सितगुडपिष्टन्यासदानमंत्रः
२ भांडदानमंत्रः
४ पायसशर्करान्वितकांस्यपात्रदानमंत्रः
४ सुपुष्पक(?)दंतशिखिसदानमंत्रः
४ सौभाग्यद्रव्यसुवर्णदर्पदानमंत्रः
४ संगवोडशफलदानं

अतरिपातस्नुधर्मदानं
अश्वथ सिंचनं
अश्वथाभिमंत्रणं
सपीहीनं गृहाणादानानि
पाप्तप्रापणादिकानानि
सह भिभोजनविधिः .

दा॰चं॰ श्रीगणेशाय नमः प्रणम्य मातरं गंगां भैरवं वनशंकरं महादेवाख्यपितरं श्रौ
१ तस्मार्तविशारदं १ दिवाकरेण सुधिया सारमुद्धृत्य शास्त्रतः क्रियतां तन्यते तु
स्फैदानसंक्षेपचंद्रिका २ तत्र परस्वत्वोत्पत्तिनो द्रव्यत्यागो दानं देवलः अर्था
नामुदिते पात्रे श्रद्धया प्रतिपादनं दानमित्यभिनिर्दिष्टं व्याख्यानं तस्य कथ्यते॥
तच्च दानं सात्विकं स्मृतं यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः दीयते च परिक्लिष्टं
तद्राजसमुदाहृतं अदेशकाले यद्दानमपात्रेभ्यश्च दीयते असत्कृतमविज्ञातं तत्
तामसमुदाहृतं गारुडे अर्दते यत्सुवर्णादिदानं तत्कामिकं स्मृतं आर्त्तो नामभयं द
त्तौ सेतद्द्विवाचकं स्मृतं विद्यामादाय यज्ञेष्वेतद्दानं मानसं द्विजा इति अथ पात्रं
याज्ञवल्क्यः न विद्यया केवलया तपसा वापि पात्रता यत्र वृत्तमिमे चोभे तद्धि पात्रं १

प्रचक्षत इति भविष्ये किंचिद्वेदमयं पात्रं किंचित्पात्रं तपोमयं किंचित्तीर्थमयं
पात्रं किंचित्पात्रं व्रतोमयं पात्राणामुत्तमं पात्रं शूद्रान्नं यस्य नोदर इति व्यासः प्र
थमं तु गुरोर्दानं दत्वा श्रेष्ठमनुक्रमात् ततोन्येषां च विप्राणां दद्यात्पात्रानुरूपत इ
ति विष्णुपुराणे सन्निधानस्थितान्विप्रान्दौहित्रं विट्पतिं तथा भगिनेयं विशेषेण
तथा वंधून्गृहागतान् नातिक्रामेन्नरस्त्वेतान्सुमूर्खानपि गोपते अतिक्रम्य महा
रौद्रं रौरवं नरकं व्रजेत् दक्षः सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे सहस्रगुणमा
चार्ये त्वनंतं वेदपारगे अब्राह्मणलक्षणमाह व्यासः ब्रह्मबीजसमुत्पन्नो मंत्रसंस्का
रवर्जितः जातिमात्रोपजीवी च भवेदब्राह्मणः स तु ब्राह्मणब्रुवलक्षणमाह गर्भा
धानादिधर्मेदिभिर्युक्तस्तथोपनयनेन च न कर्मविन्न चाधीतो ब्राह्मणब्रुव उदाहृ

दा० चं० तः अथद्रव्यविभागः शिवधर्मे तस्मात्त्रिभागं वित्तस्य जीवनाय प्रकल्पयेत् भो
२ गार्थं तु धर्मार्थमनित्यं जीवितं यतः वित्तस्य भागपंचकं कृत्वा भागत्रयं जीवना
र्थं भागद्वयं दानार्थमिति हेमाद्रिः अथअपात्रदाननिंदा स्कांदे अजिनं रत्नशय्यां
च मेषीं चोभयतोमुखीं कुरुक्षेत्रे च गृह्णानो न भूयः पुरुषो भवेत् मनुः हिरण्यं भूमिम
श्वं गामन्नं वासस्तिलान् घृतं अविद्वान् प्रतिगृह्णानो भस्मीभवति तत्क्षणात् अ
विद्वान्नाम विधानयोग्यादीनेनस्या स्वामिति भावः अथदानकालः वाराहे देशे
शतगुणं दानं चतुर्गुणं दिनक्षये शतसहस्रं तच्च संक्रांतौ शतघ्नं विषुवे ततः पुणादो
तच्छतगुणं अयने तच्छतादतं सोमग्रहे तच्छतघ्नं तच्छतघ्नं रविग्रहे तच्छतघ्नं व्यतीपा
ते दानं वेदविदो विदुः विष्णुधर्मोत्तरे वैशाखी कार्त्तिकी माघी पौर्णिमा तु महा। २

फला पौर्णमासीषु सर्वासु मासर्क्षसहितासु च आर्त्तानामिह दानानां फलं शत
गुणं भवेदिति नारदः पुण्यदेशेषु सर्वेषु गृहे देवालयादिषु यत्र साधनसंपत्ति
स्तत्र दानं समाचरेत् भविष्यपुराणे वाराणसी कुरुक्षेत्रं प्रयागं पुष्करं तथा गोक
र्णं नैमिषारण्यं सेतुं श्रीपर्वतं तथा महाकालं तथा गंगामेतान् पुण्यतमान् विदुः पा
द्ये लिंगं वा प्रतिमा वापि हृद्रूपेतस्य कुत्रचित् तत्सर्वं पुण्यतां याति दानेषु च
महाफलमिति प्रतिग्रहनिषेधः पाद्मे न तीर्थे प्रतिगृह्णीयात्प्राणैः कंठगतैरपि ती
र्थे तीरे क्षेत्रे च गंगाकृष्णागोदावर्यास्तीरमाह विष्णुः गंगागोदावरीकृष्णातीरमा
हुर्महर्षयः उत्तरेण तु गव्यूतिर्दक्षिणे योजनत्रयमिति भविष्ये तीराद्गव्यूतिमा
त्रं तु परितः क्षेत्रमुच्यत इति गंगायां तु तीरेपि नस्नात्वामित्यर्थः प्रवाहमेवाधिकृत्वा

द्वि

द दा॰चं॰ चनजानाति यो विधिं द्रव्यस्तेन्यसमायुक्तो नरकं प्रतिपद्यत इति तथा विधिं धर्म्यं च
४ नजानाति द्विजाय ब्राह्मणस्तु मतिमान्देदात्यासहतरस्यैव महादुर्गं न्यसौख्यमिति या
ज्ञवल्क्योक्तश्च अथ द्रव्यमानं याज्ञवल्क्यः जालसूर्यमरीचिस्थं त्रसरेणुरजः स्मृतं ते
ऽष्टौ लिक्षा तु तास्तिस्रो राजसर्षप उच्यते गौरस्तु ते त्रयः षट् ते यवो मध्यस्तु ते त्रयः कृ
ष्णलः पंच ते माषास्ते सुवर्णास्तु षोडश पलं सुवर्णाश्चत्वारः पंच वापि परिकीर्तितं द्वे कृ
ष्णले रूप्यमाषो धरणं षोडशैव ते शतमानं तु दशभिर्धरणैः पलमेव तु निष्कः सुवर्णा
श्चत्वारि इति हेमाद्रिः अथ धान्यमानं भविष्ये पलद्वयं तु प्रसृतं द्विगुणं कुडवं मतं
चतुर्भिः कुडवैः प्रस्थः प्रस्थाश्चत्वार आढकः आढकैस्तैश्चतुर्भिश्च द्रोणस्तु कथितो
बुधैः द्रोणैः षोडशभिः खारी विंशत्या कुंभ उच्यते कुंभस्तु दशभिर्वाहो धान्यमानं प्र ४

कीर्तितमिति अथ दानेषु दक्षिणापरिमाणमाह व्यासः सुवर्णं परमं दानं सुवर्णं दक्षि
णा परा सर्वेषामेव दानानां सुवर्णं दक्षिणेष्यते अदक्षिणं तु यद्दानं तत्सर्वं निष्फ
लं भवेत् परेत्युक्तेः पुरुषाद्वारोपयिकं तंदुलादि दक्षिणेति हेमाद्रिः तथा देयद्रव्य
तृतीयांशो दक्षिणा परिकल्पयेत् अनुक्तदक्षिणा दाने दशांशं वापि शक्तितः
भविष्ये तृतीयं निष्कशतं पार्थ दानेषु विधिरुत्तमः मध्यमस्तु तदर्धेन तदर्धेनाध
मः स्मृतः मेषे च कालपुरुषे तथान्येषु महत्सु च एवं दक्षिरयेज्जे च धेनो कृष्णाजिन
अ स्य च त्वशक्तस्यापि कृष्णाय पंचसौवर्णिको विधिरिति जयाभिषेकमुदाहृत्य लिंग
पुराणे अष्टषष्टिपलोन्मानं दद्याद्दक्षिणां गुरोः होतॄणां चैव सर्वेषां पलत्रिंशत्प्रमुदा
हृतं लिंगपुराणे तदर्धं जापकानां च द्वारपालांस्तदर्धतः एतेन सर्वत्र गुरोरर्धमृत्वि

दा॰ चं॰ जांतरथैर्ज्ञापकानां तदर्थं द्वारपालकानामिति हेमाद्रौ दक्षिणाविभागो वंगेतव्यः अ
५ यद्यद्देवता विष्णुधर्मोत्तरे अभयं सर्वदैवत्यं भूमेर्वै विष्णुदेवता कन्यादासस्तु
था दासी प्राजापत्याः प्रकीर्तिताः प्राजापत्यो गजः प्रोक्तस्तुरगो यमदैवतः तथा च
सफलं सर्वं कथितं यमदैवतं महिषश्च तथा याम्यं उष्ट्रो वै नैर्ऋतो भवेत् ऐन्द्री धेनु
र्विनिर्दिष्टा छागमाग्नेयमादिशेत् आविकं तु वारुणं विद्याद्धारांगं वैष्णवं तथा आर
ण्याः पशवः सर्वाः कथिता वायुदेवताः जलाशयानि सर्वाणि वारिधिनीकमंडलु
कुंभश्च करकं चैव वारुणानि निबोधत समुद्रजानि रत्नानि वारुणानि द्विजोत्तमाः
आग्नेयं कनकं चैव वारुणानि निबोधत प्राजापत्यानि सस्यानि पक्वान्नमपि च द्वि
ज [illegible]याशु सर्वगंधाश्च गंधर्वा वै विचक्षणैः वार्हस्पत्यं समस्तं वासः सौम्यान्यपारसा ५

स्तथा पक्षिणश्च तथा सर्वे वायव्याः परिकीर्तिताः विद्या ब्राह्मी विनिर्दिष्टा विद्योपकर
णानि च सारस्वतानि ज्ञेयानि पुस्तकादीनि पंडितैः सर्वेषां शिल्पभांडानां विश्वकर्मानुदे
वता द्रुमाणामथ मूलानां शाकैर्हरितकैः सह फलानामथ सर्वेषां तथा ज्ञेयो वनस्पति
मत्स्यमांसे विनिर्दिष्टे प्राजापत्ये तथैव च छत्रं कृष्णाजिनं शय्यारथमासनमेव च उ
पानहौ तथा यानं पशान्यस्त्राणि वर्जितं सर्वं चांगिरसत्वेन प्रतिगृह्णीत मानसं श
रोपयोगि यत्सर्वं शस्त्रवर्म ध्वजादिकं नृपोपकरणं सर्वं विज्ञेयं सर्वदैवतं यद्दतु
श्चानुक्तदैवत्यं तदनुक्तं द्विजोत्तमाः विज्ञेयं विष्णुदैवत्यं सर्वं चानुक्तं द्विजसत्तमा इति प्रति
ग्रहदानानि गृह्य परिशिष्टे प्रतिगृह्णीत गां पुच्छे कर्णे यादन्तिनी करे अश्विं दासीमजे
चैव एडे अश्वतरगर्दभौ अश्वं कर्णे सदाश्यां वा अन्नमुद्रिक्तं प्रधारयेत् शय्यासनं गृहे तु

द॰ दा॰ चं॰ त्रसंस्पृष्ट्वा दापकांचनं उष्ट्रं च कुक्कुरं स्पृष्ट्वा मृगांश्च महिषादिकान् गोधामश्वविधानेन
६ पक्षेसंस्पृश्य पक्षिणः छत्रंदंडेन रुक्मूले फलंसंगृह्य गौरवात् प्रशस्य पानंहोमंत्रंवास
येत्प्रतिमुच्य वै अमत्रं पात्रं तथा समादाय कन्यां शीर्षे चैवाथवाकरे कन्यामादक्षि
णां समभिमृश्य इत्यर्थः रतिभार्योपर पूर्वां प्रतिगृण्हीत वाक्षतां पुत्रमुत्संगमारो
प्य प्रतिगृण्हीत दत्तकं रथं रथमुखं स्पृष्ट्वा प्रतिगृण्हीत कूबरे कूबरो युगधारकाष्ठ
तथाचेदमाद्यौ दानखंडे भूमेम प्रतिग्रहं कुर्याद्भूमिं कुर्यात्स दक्षिणे करे गृहीत्वा कन्या
ग तु दासदास्यौ द्विजोत्तमाः आरुह्य चैं जास्योक्तः कर्णे च अश्व कीर्तिताः तथा चैव शश
फानांतु सर्वेषां चाविशेषतः प्रतिगृहीताजांश्रृंगे पुच्छे कृष्णाजिनं तथा ये चैकशफाः
शृंगिणः तानविशेषतः शृंगे प्रतिगृण्हीयादित्यर्थः कर्णे च पशवः सर्वेश्वाः पुच्छे वि ६

चक्षणैः गृण्हीयान्महिषं शृंगे खरं चैव पृष्ठदेशतः प्रतिगृह्य महिषोऽस्य यानानां चा
धिरोहणात् बीजानां मुष्टिमादाय रत्नान्यादाय सर्वतः वस्त्रंदशांतांदारघासरि
धायपिबापुनः आरुह्य सोपानहौ मुंच गुरु स्वैव च पादुके धर्मध्वजो तु संस्पृश्य गृण्ही
यात् अवतीर्य च सर्वाणि जलस्थानानि वै द्विजा आयुधानि समादाय तथा मुच्य वि
भूषणं आमुच्य वध्वेत्यर्थः इति प्रतिग्रहस्थानानि अथातो तुलापुरुषदानं हेमा
द्रौ मात्स्ये अनेन विधिना यस्तु तुलापुरुषमाचरेत् प्रति लोकाधिपस्थाने प्रतिमन्व
तरं वसेत् विमानेनार्कवर्णेन किंकिणीजालमालिना पूज्यमानोऽप्सरोभिश्च त
तो विष्णुपुरं व्रजेत् कल्पकोटिशतं यावत्तस्मिल्लोके महीयते कर्मक्षयादिह पुन
र्भुवि राजराजो भूपालमौलिमणिरंजितपादपीठः श्रद्धान्वितो भवति यज्ञसहस्रपा

दा॰ चं॰ जौ दीप्तमतापजितसर्वमहीपलोकः योऽपि मानमपि पद्मपतिभुक्तिमुक्तः कालांतरेस्म
७ इति वाचयतीह लोके येवाश्रृणोति पठति द्विसमानरूपाः प्राप्नोति धाम न तु पुरंदरदेवजु
ष्टमिति तत्रैव वह्निपुराणे एवं दत्वा सुवर्णतुलां स्नहस्त्यादिकं च यत् पापं निरस्तपुरुषः
स्वर्गलोकं स गच्छति तत्र स्थित्वा चिरं राजन्स्यादायाति महीतले राजराजेश्वरः श्रीमान्वी
तशोको निरामयः रूपसौभाग्यसंपन्नो नित्यं विष्णुपरायणः पुनर्विष्णुपदं याति यत्र
गत्वा न शोचतीति इति सुवर्णादितुलादानफलं अथ कुंडमंडपादि तत्र सुवर्णतु
लायामेवावश्यकमिति हेमाद्र्यादयः रजतरजततुलायां तु कृताकृतमित्युक्तं तत्रैवाऽ
होमाद्युक्तौ तु मंडपादि दिनमेव कुर्यात् नक्षत्रं मंत्रहोमो वा एवमेव महीपत इति
मात्स्योक्तेः ग्रहमंत्रजाप्य मंत्राश्चनेत्यर्थः अथ तुलावेदीपरिमाणं चाह तत्रैव तत्रा ७

दौ शुभे न्दिवसे शोभार्थं कुंडमंडपमात्रं वा कुर्यात् स प्तहस्तो पंचहस्तो वा तत्तीयांशेन च
तुर्थांशेन वा मध्ये वेदीं कृत्वा तदुपरि पूर्वपश्चिमयोः स्तंभद्वयं निखेयं हेमाद्रौ मा
त्स्ये शाकेंगुदाचंदनदेवदारुश्रीपर्णीविल्वप्रियकांचनोत्थं स्तंभद्वयं हस्तयुगावखा
तं कृत्वा दृढं पंचकरोच्छ्रितं तत् तदंतरं हस्तचतुष्टयं स्यात् समोत्तरं गं च तुरस्रमेवेति शा
को वृक्षविशेषो महासार इति प्रसिद्धः श्रीपर्णी मद्गुरुः प्रियको जीवकः सारमतेकदं
बं अंजनः कांचनतुल्यवर्णो वृक्षविशेषः स्तंभद्वयं चतुरस्री कृत्य वेदीमध्ये पूर्वपश्चि
मभागयोर्निखेयं उत्तरांगस्तंभयोरुपरि तीर्यक्काष्ठं तच्च पंचकरयोः स्तंभयोर्दैर्घ्यं च
तुष्टयोपरि निधेयं चतुरस्रं अथोत्तरांगं च तदंगमेवेति पादे तदीयमीति स्तंभसजा
तीयकाष्ठमित्यर्थः समानजातीश्च तुलावलंब्या हेमेन मध्ये पुरुषलक्षणयुक्तो दैर्घ्ये

दा॰चं॰ णसाहस्तचतुष्टयस्यास्य पृथुत्वमस्याश्च दशांगुलानि सुवर्णपट्टाभरणा च कार्या सतो
८ रणात्रयद्वयशृंखलाभिः पुनः सुवर्णे चरत्नमालाविभूषिता माल्यविभूषणाढ्या स
मानजातिस्तोरणसमानजातिः तुलान्तरांगमध्ये द्वादशांगुलैर्द्धस्तादुद्गम्याभव
लम्ब्या पुरुषेण विष्णुना शृंखलाविलंबितया सुवर्णनिर्मितया तत्सतिमुखलम्ब्यद्वयोन्य
स्तयोर्वेदिस्थितमंगुलषट्कं विहाय विशेष समस्ततुलायामष्टोत्तरशतांगुलमितिता
त्पृथुत्वं चास्या दशांगुलप्रमितिमितेन वलयाकृतिसत्रेण संमितं विधेयमित्यर्थः
सलोहपात्रद्वयशृंखलाभिर्युते तिसुवर्णादिद्रव्यधारणार्थफलकधात्रिभिर्लोहपा
त्रद्वयावलंबिशृंखलाभिर्युक्ता कार्येत्यर्थः तत्रैव वह्निपुराणे आश्वसीं खादिरीं चापि
पालाशीं वा सुरसजां चतुर्हस्तप्रमाणेन सुलक्षणसुदारानवां सुवर्णतुलां समातडत ८

स्निग्धां छिद्रत्रयान्वितां मौञ्जं त्रिकद्वयोपेतां बद्धां स्तंभेषु याज्ञिये आह नारदः चतु
रश्रा तुला कार्या यादोया पितथाविधौ चतुर्ष्वपि च पार्श्वेषु मानेऽस्याश्चतुरंगुलं मुक्त्वा
तावत्तु करकावेनयो विन्यसेद्बुधः चतुर्हस्तापरतुलामध्ये शृंखलयाविनात्रिकपंद
स्तत्रयं कुर्यात्कटकं चतुरंगुलमिति यदाह तत्रैव विश्वकर्मा विशेषदानं कथितं तु
लादितस्मात्तुलालक्षणमुच्यतेऽधुना तुलाप्रमाणं सन्तमंगुलानि दैर्घ्ये लिखेषस्मनति
प्रमाणैः प्रोक्तद्वयेष्वंगुलषट्कषट्कं त्रांततुलाशोत्तरमंगुलानां स्फूर्तिं चिन्तित्वा पंचचष्या
तु वेधानं यथा धिशात्तसरानिचेत्स्याः इन्द्रः शक्री मारुतरुद्रसूर्याः स्याद्विश्वकर्मा गुरु
रंगिरोग्निः प्रजापतिर्विश्वजगद्विधाता पर्जन्यशंसुः पितृदेवताश्च सौम्यश्च धर्मो म
रराजरश्मिजलेशमित्रा वरुणो मरुद्गुणाः धनेशशागंधर्वजलेशाविष्णुरतेश्चतुर्विंशतिरे

२ शा॰ चं॰ वेदेशाः अग्नेसौम्योबुधःस्यात्संचविशः पुरुषःसर्वकोयस्तोल्यमानस्तुलयामहासा
१ एनाविधेयास्तयनीयमय्यारत्नार्चितादेवतमूर्तयस्ताः षडंगुलस्याच्चतुरस्त्रपिंडःप्रो
तद्द्वयेविष्णुरनंतनामा पात्राद्द्वयस्यचतुरंगुलस्यादेवंमयातिकथितंप्रमाणं मध्योन
टसंकुलिकांगुलानिपंचाधिकान्यंशातिरवेदेध्येएकांगुलस्याद्रचनीहपिंडस्तत्राधिदे
वःकिलवासुकीस्यात् एकैकरज्जुर्लभतेंगुलानित्रिंसमतिःपिंडगतांगुलाच तत्रैल
कडंडमध्यांगुलानित्रिंशानथापंचदशाधिकंस्यात् तदूर्ध्वतुपीठंशुभकाष्ठपीठंपीठेन
षड्द्वंद्वमथोविधेयं अथोद्वयेभ्यस्यधिदेवतास्यात्तुलोत्तरेभूमिपतिर्विशोस्याइति २
निर्दे मात्रोमात्स्योक्तेवेध्यादितुलाकृत्यलक्षणंच अथवेधापोडशारचक्रलिखनप्रका
रउक्तोमदनरत्ने तत्राचार्योवेधोमध्येत्रिद्व्यासंचतुरस्त्रंप्रसाध्यप्रागपरदक्षिणोत्त १

रनचरेखाभिश्चतुःषष्टिकोष्ठिकांकुर्यात् तत्रकोष्ठानिप्रत्येकंनवनवांगुलानिसंप
द्यंतेतत्रचबहिरंतपंक्तिषुचतुर्दिक्षु मध्यकोष्ठानिचत्वारिचत्वारिमार्जयित्वातदुपर्युपरि
पंक्तिषुपार्श्वयोस्त्रयंत्रयंसव्यहाप्रतिदिशंमध्यकोष्ठद्वयंद्वयंमार्जयेत् तेनचतुर्दि
ता क्षुषट्षट्कोष्ठानिचौरिद्वाराणिसिध्यंति ततोमध्यस्थितषोडशकोष्ठानिमार्जयेत्
ततोवाह्ये एकैकंकोष्ठंविहायकोणकोष्ठद्वयपीठांतरालवर्तिन्यवशिष्टानिपंचपंचको
ष्ठानिमार्जयेत् तथाचमध्यपीठपादाःसिध्यंतिततोमध्याच्चत्वारिचक्राणिकुर्यात्॥
तत्राद्येचत्वार्यंगुलानिव्यासः द्वितीयेष्टौतृतीयेचतुर्विंशतिः चतुर्थेद्वात्रिंशतिरिति॥
तत्रचतुरंगुलेचक्रेकर्णिकारूपंपीतेनरजसापूरयित्वाकर्णिकावहिरष्टांसितेनरजसानि
र्मायतद्बहिरष्टांगुलास्यकेचक्रेपीतरक्तासीतरजोभिःसंपादितभूतलमध्याग्राणिषो

बं० दा० उशके सराणि संपाद्य तत्केसराबहिरेखां सितेनैव रजसांगुलोन्नतां संपाद्य चतुर्विंशां-
१० गुलात्मकेसराणि तद्बहिर्द्वेते सितेन रजसा अष्टदिक्ष्वष्टौ पत्राणि रक्ताग्राणि कुर्यात्
ततो दलान्तरे रेखां सितेन रजसा विधाय दलोत्तराणि कृष्णेन रजसा पूरयित्वा तद्बहि
रेकांगुलांतरा बहिर्वृत्ते रेखां सितेन रजसा संपाद्य तद्द्वयांतं परितो षट्दलोऽन्तरं तन्म
ध्ये चिन्हं षोडशधा विभज्य प्रतिमार्गम्बाकारान् षोडशाराननुरूपान् पीतारुणश्वे
तरजोभिः कल्पयित्वा तदन्तरा यथायोग्यं रजोभिः पूरयित्वा तद्बहिः सितपीतारुणश्या
महरिताः पंचरेखा आलिखेत् तद्बहिः पीठक्षेत्रं चतुरस्त्रं यथा शोभं रजोभिरलंकृतपी
र ठबहिरेखां सितेन रजसा चतुरस्त्रां चयेत् द्वारक्षेत्राणि पूर्वादितः पीतश्यामसितै
रजतहरितरजोभिः पूरयेत् आग्नेयादिकोणकोष्ठं चतुष्टयं लोहितहरितश्याम- १०

सबलैः पूरयेत् ततः सितेन रजसांगुलोन्नतेन बहिश्चतुरस्त्रे रेखां कुर्यादिति मद
नरत्नादयः श्रुतमते तु चतुरस्त्रं चतुर्हस्तं तन्मध्ये कं द्वादशांगुलानि नवकोष्ठानि वृ
त्तानि तु पंच तत्राद्यवृत्ते अन्तर्व्यासांगुलानि व्यासः द्वितीये षष्ठो तृतीये विंशति चतुर्थे
चतुर्विंशतिः पंचमे तु चतुरस्त्रं बहिस्तनेषु त्रिंशदिति पंच कोष्ठात्मकं पीठपाद
चतुष्टयं आग्नेयादिक्रमेण रक्तहरितश्यामसितैः पूरणीयं कोणकोष्ठचतुष्टयं
प्रत्येकं त्रिभिस्त्रिभिर्वर्णैरिति विशेषः इदमेव वारुणं मंडलं जलाशयोत्सर्गा
दौ ज्ञेयं पुनस्तत्रैव वज्रं प्रागुत्तरे भागे आग्नेय्यां शक्तिं मज्वला आलिखेद्दक्षिणे
दंडं नैरृत्यां खड्गमालिखेत् पाशं तु वारुणे लेख्यं ध्वजं चैव वायुगोचरे कौबेर्यां
तु गदालिख्य ऐशान्यां शूलमालिखेत् शूलस्य वामदेशे तु चक्रं पद्मं च दक्षिणे

दा॰चं॰ ततोमहापरिवेकंपंचवर्णफलपुष्पोपशोभितां वितानंकुंडमंडपेचभीयात् इति
११ प वेपरिपोडशारचक्रनिर्मितिः अथघृतादितुलाफलमुक्तंहेमाद्रौ विष्णुधर्मोत्तरे॥
प्रथमास्यघृतस्योक्तातेजोवृद्धिकरीशुभा माक्षिकेनतुसौभाग्यंतैलेनचतुलाप्रजाः
वस्त्रेणदिव्यवस्त्राणिप्राप्नोतितुलयाध्रुवं लवणेनतुलावण्यमरोगित्वंगुडेनच॥
असपत्नीशर्करयासुरूपंचंदनेनतु अवियोगोभवेद्भर्त्रा तुलयाकुंकुमस्यच॥
नसंतापोहृदिभवेत्क्षीरस्यतुलयातथा सर्वकामप्रदाःसर्वाःसर्वपापक्षयंकराः
यःकरोतितुलाःसर्वाःसगोपालत्वमाप्नुयात् मंत्रेणदद्यादभिमंत्रितांतुसर्वतु
लामेकमाद्विजेभ्यःसयातिगोपीःसदनंसुपर्णनम्राकदोभोग्यमुपाश्नुतेपुमा
न् तं तुलेसर्वभूतानिरसादि रसात्कृस्वगोदोदनंतत्रासीच्चिंतयित्वाहरिंप्रियां ११

आवर्हस्वनतोदद्यादर्धपादमथापिवा गुरूंसंपूज्यविधिवद्वस्त्रालंकारभूषणैः
विसर्जयेन्नमस्कृत्यभोजयेद्द्विजपुंगवान् शेषंद्विजेभ्योदातव्यंस्त्रीभ्योन्येभ्यस्त
थैवच कदलीदलसंस्थांचपंचपिंडांदिमाद्रिमां कर्पूरस्यतुलांपूज्यकुंकुमेनाल
भेत्तुतां विधिनानेनयोदद्यात्तुलादानेविमत्सरः सलोकमातिपार्वत्यासेव्यमानो
प्सरोगणैः तत्रापिकालंसुचिरमिहलोकेनृपोभवेत् आत्मतुल्यंसुवर्णंवारजतं
रत्नमेववा योददातिद्विजातिभ्यःतस्यापुण्यफलंभवेत् एतत्भूमिदानमन्ये त्र
सहस्रादिपापघ्नेमुक्तःशिवपुरंव्रजेत् सर्वतस्मात्प्रनिर्मुक्तः प्रोक्तं विष्णुपुरंव्रजेत् तु
लापुरुषभूमीचदीयमानेचयेनरः पश्यंतिधीतिपियांतिध्यायेचस्फुरनुमोदकाः॥
गुडेवायदिवारक्तं लवणंवापितोलितं योदद्यादात्मनातुल्यंनारीवापुरुषोपिवा

दा०चं० पुमान्नयुक्तमवस्याचु नारीस्यास्यार्थतीसमा सुभगोरूपसंपन्नोभुंजीनातेत्रिविष्टपे
१२ २ द्दिण्यंदक्षिणायुक्तंसवस्त्रंभूषणान्वितं अलंकृत्याद्विजाग्र्यंनं परिधाप्यचवाससी
खंडादितोलितंपश्चाद्गुरवेप्रतिपादयेत् सर्वकामसमृद्धात्मानेनकालंवसेणा,
द्दिविति इतिघृतादितुलादानफलं अथनानारोगनिरासार्थंद्रव्यविशेषेणतुला
दानान्युक्तानिगारुडे तुलापुरुषदानेतुश्रणुमृत्युंजयोद्भवं अथलोहंप्रदातव्यं
सर्वरोगोपशांतये कांसंचयक्ष्मणेदेयंत्रपुणांडविकारके अपस्मारेतुसीसंस्या
ताम्रंकुष्टेचदारुणे पित्तलंरक्तपित्तेचरूप्यंप्रदरमेहयोः सुवर्णंसर्वरोगेषुमृ
दयान्त्क्रनाशनं पलाद्भवंतथादद्याद्द्दिण्यांदीर्घवारुणे गोडंवभस्मरोगचपो
गंस्याद्गंडमालके पूगंपूगीफलं कांश्मंचाग्निमांद्यस्याद्रोगोसत्तौचपैष्टके म १२

धुद्भवंतथादेयंकासस्वासजलोदरे घृतोद्भवंतथादेयंछर्दिरोगोपशांतये क्षीरंपि
त्तविनाशायदधिस्याद्वैगदारुणे लवणंवेपनाशायपैष्टंदद्रुविनाशने धान्यंचस
र्वरोगस्यनाशानेमुनिभिस्मृतमिति अत्रायंसंक्षेपोदानोद्यते रूप्यंतुलायांतुसुव
र्णतुलाफलमेव पित्तनृभिःप्रदरमेहनाशाश्च तुलायांतुसुवर्णफलमेव ताम्रे
णकुष्टनाशाः पित्तलेनरक्तपित्तनाशाः घृतेनतेजोवृद्धिस्छर्दिनाशाश्चगुडेनारो
गित्वसौभाग्यवृद्धिश्चलेवणेनलावण्यंसौभाग्यवृद्धिश्चमधुनासौभाग्यकास,
स्वासजलोदरनाशाश्च तैलेनप्रजावानभवति क्षीरेणापित्तनाशाःसंतापनिवृ
त्तिश्चदध्नाभगंदरनाशाः शार्करयासापत्न्यबाधानिवृत्तिः आम्रेनारोगित्वंपिष्टेमद
दुनाशाः फलैसंग्रहणीनाशाः कमुकेगंडमालानाशाः कुंकुमेनसौभाग्यवृद्धिः तैलेन

ना
दा॰चं॰ पापनाशः पुष्पैर्वेदरोगघ्नः तांबूले मुखदुर्गंधनाशः चंदनेन सौंदर्यवान् गंधेन सौभा
१३ ग्यं वस्त्रेण दिव्यवस्त्रावासिः काष्ठैरग्निमांद्यनाशः विष्णुप्रीतिर्वासर्वद्रव्यैरपीति इ
तिनानारोगनिरासार्थं द्रव्यविशेषतुला: अथ प्रजार्थं नत द्रव्याधिदेवतामाह गा
रुडे आधिदैवं तुलोह्यं वैमस्राभेरवउच्यते कांस्ये तपावच्छिनो चवायुश्च सीसके स्मृ
तः ताम्रे सूर्यस्तथा प्रोक्तः पैत्तले च कुहूस्तथा रौप्ये चापि तरोज्ञेया सौवर्णे सर्वदेवता:
फले सोमो गुडे चापस्तांबूल वसुनायकः गंधर्वाः कुंकुमे चैव जांगले ग्निस्तथा स्मृ
तः जांगले काष्ठ मधोचस्मा प्रयत्नेन घृते मृत्युंजयस्तथा क्षीरे ताराणः सर्वे दधि
सर्पाः प्रकीर्तिताः लवणे पार्वतीदेवी समुद्दिष्टाधिदैवतं पिष्टे प्रजापतीर्देवो अ
न्ने सर्वाश्च देवता आर्त्तियै दास्या स्यात्तेकाप्रामुयात्पुण्ये दशाजं निस्वं मृत्युंजयप्रा १३

प्तिर्विधिनायत्सदीयते तदेव सर्वशांत्यर्थं भवतीति निसंशयः तुलापुरुषदानेन
मृत्युंजयाभिमानवः आगमोक्तमृत्युंजयमंत्रेण पूजयित्वेत्यर्थः नाममंत्रेण वाय
थाधिकारयोज्यं इतिद्रव्याधिदेवता: अथ कालविशेषः दानोद्योते विश्वामित्रः आ
दित्यराहुरागाग्नेस्तस्मै वर्णे तोलयेत्तुलां सोमस्य राहुरौप्येण यद्दानेन तथा शृणु प्रव
र्गेस्य मुखे जात उत्सन्ने पितृदेहतः सर्वपापहरो यत्तदीयतां प्रीतये विधुः इत्युक्त्वा
यजलं त्वष्ट्र निक्षिपेद् द्विजसत्तमेति अथ तुलापुरुषदानविधिः हेमाद्रौ विष्णुध
र्मोत्तरे तुलादानं प्रवक्ष्यामि सर्वपापप्रनाशनं यद्धौर्या चरितं पूर्वं लक्ष्मीनाराय
णेन तु पुण्ये दिनमथासाद्य तृतीयायां विशेषतः गोमयेनानुलिप्तां च भूमौ कु
र्याद्दृढं शुभं दारवं शुभवृक्षस्य चतुर्हस्तप्रमाणतः सुवर्णं तत्र बध्नीयात्स्वशक्त्या ब

रितंघटे सुवर्णं स्थापयेत्तत्र वासुदेवं चतुर्भुजं त्रिकपद्मं च च भ्रीमात्स्थापयेत्सीरि
१४ केततः तत्रारोहेत्सवस्त्रास्त्रसर्वालंकारभूषितः अभीष्टदेवतां गृ स्वस्थापयित्वा
घृतादिभिः तुलापुरुषदानस्य विधिरेषः प्रकीर्तितः अत्र विधिरेष उदाहृत इति
प्रकीर्तित इति वचनादेतावत्स्यैकर्त्तव्यतेस्कन्दे न भवति इति दामोदरः नान्यदिति
तुलादानमधिकृत्य लिंगपुराणे दक्षिणां चत्रातं त्र्यार्धं तदर्धं वापि दापयेत गुरो
रिति शेषः ऋत्विजां चैव सर्वेषां दद्यानि षान्मदापयेदिति तथा यजमानोयनेग्र
हणसंक्रमादिपुण्यकालमासाद्य पूर्वेद्युरेकभक्तया याचरितप्रायश्चित्तः कृत नि
त्यक्रियो दर्भेष्वासीनो दर्भान्धारयमाणः शुचिराचम्य देशकालौ संकीर्त्य ममा
मुककामद्वारा श्रीपरमेश्वरप्रीत्यर्थं ममुकद्रव्यतुलापुरुषदानमहं करिष्य इति सं १४
कल्प्य तथा रोगनिरासार्थं तु ममामुकरोगनिरासे ममास्य त्रिशरोर्वामुकरोगनिरासे
नक्षिप्रारोग्यत्वसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थमिति तथा तु दातुस्त्रिशच्चार बद्धात्मा
न्नादितुलासु अष्टमांशं वा सुवर्णरजतादितुलाविशेषफलप्राप्तिद्वारा इत्यध्येरवः का
र्यः तदंगतया गणपतिपूजनं पुण्याहवाचनं आचार्यवरणमंगदेवतापूजनं च करि
ष्य इति संकल्प्य गणेशं संपूज्य पुण्याहं स्वस्ति ऋद्धिं श्रीः कल्याणमिति अहुर्यं चाल्पकं
वाधायनोक्तं प्राप्नवर्णपित्र्यस्त्रीवाचयित्वाचार्यस्तुलामां गौरी विष्णादितुलांगदेवता
श्च पूजयित्वा रोगनिरोगनिरासार्थं तु महामृत्युंजयमंत्रेण प्रतिमायां मृत्युंजयं ताम्रादि
तोलनीयद्रव्याधिदेवताश्च पूजयेदिति इति तुलाविपुरुषदानविशेषः अथ तुलापुरु
षदानप्रयोगः यजमानः शुचिराचम्य प्राणानायम्य देशकालौ संकीर्त्य एकैकमन्वंतर

कालावच्छिन्नप्रतिलोकपालस्थाननिवासपूर्वकार्कवर्णकिंकिणीजालमालीविमान

करणकाप्सरःप्रजासहितत्रिविपुरगमनपूर्वककल्पकोटिशतावच्छिन्नविष्णुपुराधिक
रणनिवासकेकामः सुवर्णरत्नरौप्यादितुलापुरुषमहादानमहं करिष्ये इति यद्वाब्रह्म
हत्यादिसकलपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं सुवर्णरौप्यतुलापुरुषमहादानमहं क
रिष्ये तत्रादौ गणपतिपूजनपुण्याहवाचनं मातृकापूजननांदीश्राद्धाचार्यवरणादि
कुर्यात् ताम्रादितुलायामनुसंकल्पोत्तरं गणपतिंपूजयेत् ततआचार्योगोमयोपली
मवेद्यादौसर्षपविकरणं पंचगव्यप्रोक्षणं कृत्वा वेद्यां वारुणमंडलं विलिख्य उपरिकुं
डमंडपेपंचवर्णवितानं फलपुष्पोपशोभितं सध्वजं बध्वा वेद्यादौ घटमालामावध्य
तत्रदक्षिणोत्तरकृत्रिकास्यां तुलां बध्नीयात् गौरीप्रीत्यर्थं तुलायां कर्पूरकृतपंचपिंडिकाह

पां गौरीकुंडकुमेनानुलिप्य पूजयेत् ततो धर्मराजस्तस्य प्रतिमा त्रिस्त्रोमाषमात्रसुव
र्णनिर्मितागुरुनारणादिपूर्वकं संपूज्य इष्टदेवतां च पंचामृतेनाभिषिंच्याभ्यर्च्य विष्णुप्र
तिमा तुलामध्ये बध्वा ततः पूर्वोक्ततोलनीयद्रव्याधिदेवतां द्रव्यं संपूज्य तुलायै नमः इति
तुलां च तुलांमान्तकुटयोर्विष्णुरनंतरं मध्यं करे वासुकिं फलकद्वये भूमिं च संपूज्य रक्तव
स्त्रेण तुलां संवेष्टयेत् ततः आग्नेयसंस्थां तुलादंडे स्वर्णनिर्मिता स्वचतुर्विंशतिप्रतिमा
सुदर्शनस्य देवता आवाह्य पूजयेत्तद्यथा ॐ ईशानाय नमः ॐ ईशानमावाहयामि १ एवं
सर्वत्र ॐ अग्नये नमः ॐ अग्निमा॰ २ ॐ मारुताय॰ ॐ मारुतमा॰ ३ ॐ रुद्राय नमः
ॐ रुद्रमा॰ ४ ॐ सूर्यायन॰ सूर्यमा॰ ५ विश्वकर्मणे॰ ॐ विश्वकर्मण॰ ६ ॐ गुरवे॰ गुरुमा॰
७ ॐ अंगिरोग्निभ्यां॰ ॐ अंगिरोग्निआ॰ ८ ॐ प्रजापतये॰ ॐ प्रजापतिमा॰ ९ ॐ विश्वेभ्यो दे॰

दा॰ चं॰ विश्वात्रे॰ १० ॐ धात्रेन॰ धातारमा॰ ११ ॐ पर्जन्यत्रीशेभ्यो॰ पर्जन्यत्रीश॰ १२ ॐ पितृभ्यो॰ पि
१६ तृनां॰ १३ ॐ सोम्याय॰ सोम्यामा॰ १४ ॐ धर्माय॰ धर्ममा॰ १५ ॐ अमरराजाय॰ अमरराजमा॰
१६ ॐ अश्विभ्यांन॰ अश्विनौ॰ १७ ॐ जलेश्वराय॰ जलेश्वरमा॰ १८ ॐ मित्रावरुणाभ्यां॰ मि
त्रावरुणौ॰ १९ ॐ मरुद्गणेभ्यो॰ मरुद्गणमा॰ २० ॐ धनेश्वराय॰ धनेश्वरमा॰ २१ ॐ गंधर्वाय॰
गंधर्वमा॰ २२ ॐ जलेश्वरायन॰ जलेश्वरमा॰ २३ ॐ विष्णवेन॰ विष्णुमा॰ २४ इत्यावाह्य सं
पूज्य ततो यजमान भरणवस्त्रागंधमाल्याद्यलंकृतः सुकुमांजलिं गृहीत्वा तुलां त्रिः प्रद
क्षिणी कृत्य प्राङ्मुखउपविश्य प्रार्थयेत् ॐ नमस्ते देवदेवानां शक्तिस्त्वं समाश्रिता सा
सभूता जगद्धात्री निर्मिता विश्वयोनिना एकतः सर्वसत्यानि तथानृतशतानि च धर्मा
धर्मकृतां मध्ये स्थापितासि जगद्धिते त्वं तुले सर्वभूतानां प्रमाणमिह कीर्तिता मां तोल १६

यन्निसंसाराद्दुद्धरस्व नमोस्तु ते योसौ तत्वाधिपो देवपुरुषः पंचविंशकः स एतोधिष्ठितो देवि
त्वयि तस्मान्नमो नमः नमो नमस्ते गोविंद तुलापुरुषसंज्ञक त्वं हरे तारयस्मात् तस्मात्संसा
रसागरात् इति पठित्वा तुलोपरि पुष्पांजलिं क्षिपेत् पुनस्तुलां त्रिः प्रदक्षिणीकृत्य वामेह
स्ते धर्मराजं दक्षिणे सूर्यं अंके स्वानिष्टदेवतां पंचामृतेनाभिषिक्तार्चितां चादाय प्राङ्मुखस्तुला
यामुत्तरफलके आरुहेत् दक्षिणेन सुवर्णं स्यादुत्तरेणाधिपं इति मात्स्यवचनात् नराधि
परस्याप लक्षणं तत आचार्यो दक्षिणफलके तोलनीयद्रव्यमारोपयेत् सुवर्णाद्या यत्समा
धिकं स्यात् पुष्टिकामेन भूमिष्ठमधिकं कार्यं ततो यजमानस्तुलामध्ये द्वौ स्थितस्य देहेल
स्याश्च मुखं पश्यन्मंत्रोपदेत् ॐ नमस्ते सर्वभूतानां साक्षिभूते सनातनी पितामहेन देवि
त्वं निर्मिता परमेष्ठिना त्वया धृतं जगत्सर्वं सह स्थावरजंगमं सर्वभूतात्मभूतस्थे नमस्ते

दा॰ चं॰ सर्वधारिणी गोदोहकालं नचरुद्धस्थित्वा ततस्तुलामवतीर्य तोलितद्रव्ये तुलसीपत्रं निधाय दे
शकालौ संकीर्त्य मम अमुककाम इह मम अमुकमात्मसमतोलितमाचार्याद्यनेभ्यो ब्राह्मण
१७ भ्यो समाश्रितेभ्यो बंधुवर्गेभ्यो दीनअनाथेभ्यो दातुमहमुत्सृजे न मम मे सकुटुम्बस्य कृतस्यामुक
तुलापुरुषदानकर्मणः सांगतासिद्ध्यर्थमाचार्याय इदं सुवर्णमग्निदैवतं दक्षिणात्वेन
तुभ्यमहं संप्रददे न मम मेति दद्यात् पुनः तुलापुरुषदानकर्मण इत्यादि सांगतासिद्ध्यर्थं
नानानामगोत्रेभ्यो ब्राह्मणेभ्यो यथाशक्ति भूयसीं दक्षिणां दातुमहमुत्सृजे तथाकृतस्या
मुकतुलापुरुषकर्मणः सांगता॰ यथाशक्ति ब्राह्मणान्यथाकालोपपन्नैर्माहं जपिष्ये
इति संकल्प्य तत आचार्यस्तत्वावाहितदेवताः सर्वा अर्चनं पूर्वकं विसृज्य आचार्याय तुलां
इपादं वा प्रतिमा वस्त्राभरणादि सर्वं तुभ्यमहं संप्रददे न मम मेति दत्वा सदस्यार्थं घं दत्वा

त

तुलायां पंचसप्तएवयथोदेशं दत्वा प्रमादात्कुर्वल्लोकं यस्यस्मरसेति जपित्वा कर्मेदं श्व
रार्पणं कृत्वा सहद्योभं जीनेति केचित् अत्र तुला एजोत्तरमग्निसंस्थाप्य दानादि तुला
स्थदेवताभ्यो शाशांवाज्याहुतयश्च वोहूतयश्चेहुतानीति तुलाप्रतिग्रहप्रायश्चित्तं त्वा
चार्यश्चांद्रायणमेकं कुर्यात् प्रतिग्रहानुसारेण कृच्छ्रं चांद्रायणो द्योतरदस्य प्रायश्चि
त्तेषु हेमाद्रौमात्स्ये न चिरं धारयेद्देहे सुवर्णं तोलितं बुधः तिष्ठद्भवाप दयस्मात्
स्मात् शोककरं नृणां त्रीणि प्रपरस्वीकरणाच्छ्रेय प्राप्नोति पुष्कलमिति सुवर्णादि सर्वं तु
लास्वेवं के मुक्तिकन्यायात् अत्रस्व: सुवर्णत्रारो राजतादि सर्वद्रव्यतुलोपलक्षको
बोध्यः मीमांसैकधुरंधरं श्रुतिधरोम्नायेपि वागीश्वरः सादित्याम्नगसागरः सुजनना
वल्लीरसालद्रुमः पंविद्वान्मणिशेखरो दिनकरः प्रासूत विश्वेश्वरं तेनाकारि प्रतादितो

दा॰ चं॰ लनविधौ सलीलयेपद्धतिः इति श्रीदानोद्योतदानरत्नदानमयूखाद्यनुसारेण चक्रा
लोपनामकभट्टदिवाकरकृते दानसंक्षेपचंद्रिकायां ताम्र एतादितुलापुरुषदानप्रयोगः॥
१९ अथ गोसहस्रमहादानप्रयोगः हेमाद्रौ मात्स्ये गोसहस्रदानं चिकीर्षुरधिवासनाधिना
माकृत्रिरात्रमेकरात्रं वा त्राक्रितः पयोधितोधिवासनदिने शुचिर्यजमानो देशकालौ सं
कीर्त्य मम समस्तपापक्षयोत्तरसिद्धचारणसेवितार्कवर्णकिंकिणीजालमालीविमाना
रोहणोत्तरानेकमन्वंतरावच्छिन्नेंद्रादिसकललोकाधिकरणपुत्रपौत्रसमन्वितत्रि
बालपगमनैकोत्तरसंख्यासंख्यायपितृमातामहकुलतारणकल्पशतावच्छिन्नत्रि
वपुरनिवासानंतरराजराजीभवनाश्वमेधशतनकर्तृत्वशिवध्यानपरत्वविष्णुसाह
रूपापन्नयोगस्थानसंसारको चन्काम श्वगोसहस्रमहादानं प्रतिपादयिष्ये इ

ष्यति संकल्पयेत् ततो यवासगुर्वादिनियोगांते तुलापुरुषमहादानवत्कुर्यात् अ
थाचार्य एकं लक्षण्यं नंदिकेश्वरं वृषं सवत्सदशोत्तरगोसहस्रात्सधेनुदशकं च स्वर्ण
घंटास्वर्णतिलकस्वर्णपट्टकौशेयवस्त्रमाल्यदामरत्नयुतं शृंगरौप्यखुराचामरोपशो
भितं सताम्रदोहनपादुकोपानच्छत्राद्यनेकोपस्कारयुतं वेदीपरितः स्थापयेत् मंड
पाद्बहिर्यथावकाशं गोसहस्रं वस्त्रमाल्यस्वर्णशृंगरौप्यखुरालंकृतं साधिवा
सयेत् अथासादितवत्सगोदशकं मध्ये च क्रोपरि स्थापितलवणद्रोणपरिपूर्वोक्त
लक्षणं कौशेयसंवीतं नानाभरणभूषितं माल्येक्षुफलसंयुक्तं नंदिकेश्वरं स्थापयेत्
तदुपरि फलपुष्पादिशोभितं पंचवर्णवितानं बध्नीयात् तत आचार्यादयः
स्वस्वकुंडसन्निधौ सर्वौषध्यादियुतकलशचतुष्टयस्थापनादि यजमानाभिषेकां

दा॰चं॰ नंतुलक्ष्मीमहादानवत्कुर्युः ततः शुक्लमाल्यांबरधरः सकुसुमांजलिना सवत्सयुग्मेदत्रा
कं नमामंत्रयेत् तत्र मंत्रः नमो वो विश्वमूर्त्तिभ्यो विश्वमातृभ्य एव च लोकाधिवा
२९ सिनीभ्यश्च रोहिणीभ्यो नमो नमः गवामंगेषु तिष्ठंति भुवनानेकविंशतिः ब्रह्मादय
स्तथा देवा रोहिण्यः पातु मातरः गावो मे अग्रतः संतु गावो मे संतु पृष्ठतः गवां मे हृद
वा येसंतु गवां मध्ये वसाम्यहं यस्मात्त्वं वृषरूपेण धर्म एव सनातनः अष्टमूर्तेरधिष्ठान
मतः पाहि सनातनेति पुष्पांजलिना संपूज्य वेदी पश्चिमे प्राङ्मुख उपविश्य पूर्ववद्
त्राकालौ स्मृत्वा मम समस्तपापक्षयादिसंसारमोचनकाम इमं नरदेवं वृषरूमाः सव
त्सधेनुदत्राकसहिताः सैवत्सगोः सांगोपांगाः अमुकामुकगोत्राअमुकवेदाध्या
पकाऽमुकशर्मभ्यो गुरुत्विगादिभ्यश्च संप्रददे न ममेति गुर्वादिहस्ते पुजलं दद्यात् २९

ह

तेवरेवस्यत्वेतियजुषारुद्रापगामित्स्कृत्य पुच्छे पुभति गृहस्थस्वक्लित्वकायया त्रार्थकाम
स्तुतिं क इदं कस्मा अदादिति पठेयुः ततो यजमानः कृतस्य गोसहस्रमहादानकर्मणः सांग
तासिध्यर्थं त्राम भूमिवारलादिसुवर्णदक्षिणां तेन तुभ्यमहं संप्रददे न ममेति प्रत्येकं
तेभ्यो दक्षिणां दद्यात् ततः कृतस्य गोसहस्रमहादानइत्यादिसांगतासिध्यर्थं नाना
गोत्रेभ्यो ब्राह्मणेभ्यो यथाशक्ति भूयसीं दक्षिणां दातुमहमुत्सृजेन मम इति यथा पुनः
कृतस्य इत्यादिसांगतासिध्यर्थं यथाशक्ति ब्राह्मणान्यथाकालं भोजयिष्ये तेनाहं भोज
यिष्य इति संकल्पयेत् ततः आचार्यपुण्याहवाचनाद्यावाहितदेवताः संपूज्य उत्ति
ष्ठ ब्रह्मणस्पते इत्यादिना विसर्ज्य तद्दिने पयोव्रतमन्त्राक्तो यजमानो नक्ताशी ब्रह्म
चारी भवेत् ततः प्रमादात्कुर्वतां कर्म॰ यस्य स्मृत्या च नामोक्त्या सकलाकर्म ईश्वरार्प

दा० चं० णं कुर्यादिति इति श्रीदानसंक्षेपचंद्रिकायां गोसहस्रदानप्रयोगः अथ अर्कसंगात्सहस्र
गोशतदानप्रयोगः भविष्यपुराणे शतं गावः सवृषभा धेनुपस्करसंयुताः दत्तास्तु
२० ब्राह्मणेभ्यस्तु विशुद्धेनांतरात्मना शिवादिसर्वलोकेषु युगपत्प्रमोदते तु सः पुण्यका
लेषु चिराचम्य देशकालौ संकीर्त्य मम समस्तपापक्षयपूर्वकसिद्धाचरणसेवितार्कच
र्चकिंकिणीजालमालाविमानारोहणोत्तराणेकमन्वंतरावच्छिन्नेंद्रादिसकललोक
पालाधिकरणकुलपुत्रपौत्रसमन्वितशिवादिसर्वलोकनिवासानंतरमंते विष्णुसा
युज्यावासिकामो वृषाधिकशतसालंकृतगोशतदानं करिष्य इति संकल्प्य इति गणप
तिपूजनस्वस्तिप्रपुण्याहवाचनमात्रं कृत्वा गोभ्यो नमः इति सवृषभा गाः संपूज्य ब्रा
ह्मणेभ्यो नमः इति ब्राह्मणांश्च यथाशक्ति वस्त्रालंकारादिभिः संपूज्य प्रार्थयेत् तत्र मं २०

त्राः गावः सुरभयो नित्यं गावो गुग्गुलगंधिकाः गावः प्रतिष्ठा भूतानां गावोरसं निचवहंति
चहं विषामंत्रपूतेन तर्पयंति परानपि मद्दर्पणाच्चहोतृणां गावो होमे प्रतिष्ठिताः सर्वे
षामेव भूतानां गावः शरणमुत्तमं गावः पवित्रं संघोमे गावो मंगलमुत्तमं गावः सर्व
स्य लोकस्य गावो धन्याः सनातनाः नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च नमो ब्र
ह्मसुताभ्यश्च पवित्राभ्यो नमो नमः यत्क्षीरप्रदा गावो घृतयोन्यो घृतोद्भवाः घृत
नद्यो घृतावर्तास्ता मे संतु सदा गृहे इति गाः संप्रार्थ्य वृषभं संप्रार्थयेत् धर्मस्त्वं वृष
रूपेण जगदानंदकारक अष्टमूर्तेरधिष्ठानमतः पाहि सनातनेति वृषभं प्रार्थयेत् त
तः सजलतिलकुशानादाय अद्येत्यादि मम समस्तपापक्षयेत्यादि विष्णुसायुज्यावा
सिकामो वृषाधिकशतगाः धेनूपस्करसहितहिरण्यदक्षिणायुता रुद्रदैवतास्तुभ्य

दा॰चं॰ मूल्योपकल्पितरजतमुद्रां वा नानानामगोत्रेभ्यो ब्राह्मणेभ्यो दातुमहमुत्सृजे न मम मेति ने
न भगवाननूपरमात्मा श्रीपरमेश्वरः प्रीयतां तत्सद्ब्रह्मार्पणमस्तु तथा कृतस्य सरषगो
२१ न दानकर्मणः सांगतासिध्यर्थं यथाशक्ति ब्राह्मणान् यथाकालं भोजयिष्ये तथा कृत
स्य नानानामगोत्रेभ्यो ब्राह्मणेभ्यः यथाशक्ति भूयसीं दक्षिणां दातुमहमुत्सृजे भ
श्रेवा अद्येत्यादि सरषभरुद्रदैवतां सहिरण्यदक्षिणायुतां यथाशक्त्यलंकृतां गोत्रा
तम्मूल्योपकल्पितरजतमुद्रां वा नानानामगोत्रेभ्यो ब्राह्मणेभ्यो दातुमहमुत्सृजे न मम
मेति ततो ब्राह्मणभोजनसंकल्पं कृत्वा भूयसीं दद्यादिति इति सरषगोदानप्र
योगः अथ सरषभगोद्वयदानप्रयोगः भविष्यपुराणे द्वागावः सरषभा रषभे
कादशीस्मृता दत्वा तु ब्राह्मणेभ्यश्च स याति परमां गतिं त्रिवादिसर्वलोकेषु य २१

थेष्टं मोदते नरः इति पुण्यकालेषु चिरायम्प्रदेशकालौ संकीर्त्य मम समस्तपापक्षयपूर्वक
त्रिवादिसर्वलोकनिवासांते विष्णुसान्निध्यकामो वृषाधिक द्वागोदानमहं करिष्ये इ
ति संकल्प्य गणपतिपूजनमात्रं कृत्वा गोभ्यो नमः इति सवृषगाः संपूज्य ब्राह्मणेभ्यो न
मः इति यथाशक्ति वस्त्रालंकारादिभिः संपूज्य गाः प्रार्थयेदेतैर्मंत्रैः गावो मामुपतिष्ठं
तु हेमशृंग्यः पयोमुचः सुरभ्यः सौरभेयाश्च सरितः सागरास्तथा गावः पश्याम्यहं नि
त्यं गावः पश्यंतु मां सदा गावोऽस्माकं वयं तासां यतो गावस्ततो वयं गावो ममाग्रतो नि
त्यं गावः पृष्ठत एव च गावो मे सर्वतश्चैव गवां मध्ये वसाम्यहं इति गाः संप्रार्थ्य सरषमं प्रा
र्थयेत् धर्मस्त्वं वृषरूपेण जगदानंदकारक अष्टमूर्तेरधिष्ठानमतः पाहि सनातन इति
वृषं प्रार्थयेत् ततः सकुशतिलजलान्यादाय अद्येत्यादि॰ मम समस्तपापक्षयपूर्वक त्रि

दा॰चं॰ यविष्णुसान्निध्यावाप्तिकामोर्घ्याधिकदत्रागाः धेनुपस्कराः सहिरण्यदक्षिणायुताः रुद्र
२२ देवतास्तन्मूल्योपकल्पितरजतमुद्रा नानानामगोत्रेभ्यो ब्राह्मणेभ्यो स्यादि॰ ततो ब्राह्मण
भोजनसंकल्पादि कृत्वा भूयसीं दद्यात् अथवार्घ्याधिकधेनूपस्करसहिरण्यदक्षिणा
युतदत्रागा रुद्रदेवतास्तन्मूल्योपकल्पितरजतमुद्राः नानानामगोत्रेभ्यः दस्यादि॰ ब्राह्म
णभोजनसंकल्पं कृत्वा भूयसीं दद्यादिति संक्षेपः इति सदस्यदत्रागोदानप्रयोगः अथ
यदत्राममहादानानि कौर्मे कनकाश्वतिला नागा दासी रथमहीगृहाः कन्या च कपिला
ला धेनुर्महादानानि वै दश इति तत्र प्रथमं तावत्सुवर्णदानं मूले दातास्य सुवर्णस्य ज्ञातं
विप्रेभ्यः श्रद्धयान्वितः ब्रह्मलोकमनुप्राप्य ब्राह्मणा सह मोदते गवेन भूमिकृत्रालानलले
न आलिख्य मध्ये सितनंदुलैश्च सरोरुहं केसरभूषणाढ्यं सकर्णिकं चाष्टदलं विलिख्य २२

तस्मिन्हिरण्यत्रानमानमात्रं निधाय तस्योपरि संविचिंत्येति तच्च ब्रह्माणं कमलासनः
स्थं संपूज्य विप्रं कृत्वा यथाविभवं संपूज्य वस्त्रालंकारादिभिः संपूज्य दद्यात् हेमाद्रौ दानकां
डे देयं ततो जपस्तुवीत तो विप्रश्च पूजयेत् ततस्तमंत्रेः प्रदद्याद्धेमवेदानेषु यं विधिरिति
अद्येत्यादि॰ मम समस्तपापक्षयपूर्वकं मेरुदानफलावाक्षयपदयद्रव्यतृतीयां त्रादक्षि
णाहिरण्यदक्षिणासहितं दद्वं सुवर्णं अग्निदैवतं अमुकगोत्रायामुकशर्मणे ब्राह्मणा
य तुभ्यमहं संप्रददे न मम इति दत्वा पठेत् हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ॥
अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे इति कनकदानं अथ अश्वदानं महाभार
ते सर्वोपकरणोपेतं युवानं दोषवर्जितं यो श्वं ददाति विप्राय स्वर्गलोके महीयते
स्यादि तथा यावंति रोमाणि हयेषु भवंति दिग्नराधिपते तावंतो वाजिदा लोकानाप्नुवं

तीर्द्रपुष्कलानिति वाजिराजस्सूर्यलोकान् कोर्मे ञ्तैः पल्लैरोप्यैः सुवर्णालंकृतं क्रमा
त् सदक्षिणंसवस्त्रंच ब्राह्मणायनिवेदयेत् ब्राह्मणं रत्वा वस्त्रालंकारादिभिरभ्यर्च्य दद्या

त् अद्येत्यादि ममसमस्तपापक्षयपूर्वकाश्वरोमसमसंख्याकाब्दसूर्यलोकनिवासावा
प्तिकामोयमश्वः सर्वोपस्करहिरण्यदक्षिणायुतोपमंदैवतः गोत्रायशर्मणेतुभ्यमहंसं
प्रददेनममेतिदद्यात् दानमंत्रस्तु उच्चैःश्रवास्त्वयश्वानांराज्ञांविजयकारकः सूर्यवा
हनमस्तुभ्यमतः शांतिप्रयच्छमे इतिसामान्योऽश्वदानं दानविधिविज्ञोपलक्ष्णगा
हेउ अश्वमेधमश्वयस्कफलोक्तुमनीश्वरः अश्वदानंतुतेनेदंकर्तव्यंविधिपूर्वकं
चिंधिंतस्यप्रवक्ष्यामिलक्षणानिभिन्नेपुरा श्वेतमश्वंशुभंताबदेमकल्याणभूषितं
रूप्येस्तुकटकैः शुद्धैः करिदंतोपशोभितं वज्रेनेत्रंश्चैरेस्नात्रैः सोमपुच्छेतुचामरं।

शुक्लेणपदकेणैवसंयुतंस्वायुधान्वितं धान्यरत्नोपरिस्थंचवहुकस्संकपट्टकं एवंस
तेजसंचाश्वंब्राह्मणायनिवेदयेत् मन्वादियुगाद्ययनविषुवोपरागादिपुण्यकाल
दानंकुर्याद्ब्राह्मणंरत्वावस्त्रालंकारादिभिसंपूज्य अश्वंचसंपूज्यचरेत् मार्तंडा
यसवेगायकान्रूपपायसस्मृतये नगद्धितायसूर्यायत्रिवेदायनमोनमः एवंसमुच्च
रन्मंत्रंकर्णेदद्यात्तिलोदकं दानवाक्यंतु अद्येत्यादि॰ गोत्रायशर्मणेब्राह्मणायदं
श्वेताश्वंसवर्णतिलकालंकारयुतंललाटेग्रेवेपकंपूर्वोक्तलंकारयुतंगंधपुष्पाद्यर्चि
तंसूर्यायमदैवतंवासकलब्रह्महत्यादिपापनाशकामोद्दपरोमसंख्याकाब्दसूर्यलो
कनिवासकामश्वसालंकृतापतुभ्यमहंसंप्रददेनममेतिततोऽश्वप्रार्थना मद्दार्ण
वेसमुत्पन्नउच्चैःश्रवसमुत्कक मयात्वंविप्रमुख्यापदत्तोदयसर्वीभवत्वनिततोवि

दा॰चं॰ प्रार्थना इमं विप्र मनसाभ्यमश्वं ते प्रतिपादितं प्रतिगृण्हीत विप्रेंद्र मत्प्रादतं सशो
२४ भनमिति इति शनामंत्रसमुच्चार्य कर्णे समर्पणं कृत्वा विप्रहस्ते जलं क्षिपेत् ततः
सुवर्णदक्षिणां दद्यात् विप्रो देवस्य त्वेति गृह्णीत्वा यथा शास्त्रं कामस्तुतिं पठित्वा स्व
स्तीसकृत्वा अश्वमारुह्य गच्छेत्सदानां स प्रसप्रतिं भास्करं मनसि ध्यात्वा आलोक्य
स्वगृहं व्रजेत् श्वेतमश्वं तु यो दद्यात्सकृत्तं दशगुणं भवेत् एवं कृते नरव्याघ्र सूर्यलोकं
व्रजेन्नर इति इति श्वेताश्वदानं अथ त्रिशावाया श्वदानं त्रिशाया श्वमलंकृत्य यः पर्व
णि निवेदयेत् सोश्वमेधस्य यज्ञस्य फलमष्टगुणं लभेदिति शिवधर्मे पित्रिशावापा
श्वदानमुक्तं अथ तिलदानं आदित्यपुराणे वैशाख्यां पौर्णमास्यां वा तिलान्सौद्रे
ण संयुतान् यः प्रयच्छेत् द्विजाग्रेभ्यः सर्वपापैः प्रमुच्यते तथा ज्येष्ठे मासि तिलान्द २४

द्यात् पूर्णिमायां विशेषतः अश्वमेधस्य यज्ञस्य फलं प्राप्नोति मानवः तथा माघे
मासि तिलान्यस्तु ब्राह्मणेभ्यः प्रयच्छति सर्वसत्वसमाकीर्णं नरकं न स पश्यति वि
ष्णुधर्मोत्तरे तिला गावो हिरण्यं च अन्नं कन्या च भूः धरा दत्तान्येतानि विधिवत्ता
रयंति महाभयात् तथा तिलस्नायी तिलोद्वर्त्ती तिलहोमी तिलोदकी तिलभु
क् तिलदाता च षट्तिलाः पापनाशनः इदं तु माघमासात्परं अन्यत्र तु दानमेव कौ
र्मे कृष्णाजिने तिलान्कृत्वा सवर्णमधुसर्पिषी द्रोणेकवाससाच्छन्नं विधा - दद्या
त्सदक्षिणां ब्राह्मणाय च तं दत्वा सर्वं तरति दुष्कृतमिति अद्येत्यादि॰ अमुकगोत्रा
यामुकशर्मणे ब्राह्मणाय सम्पूजिताय कृष्णाजिनस्थं सुवर्णमधुसर्पिर्युक्तं वस्त्रच्छ
न्नं तिलद्रोणं सोमदैवतं सर्वपापक्षयकामस्तुभ्यमहं संप्रददे न ममेति कृते नत्ति

दा०चं० लद्रोणदानस्य सांगतासिध्यर्थं इदं सुवर्णमग्निदैवतं दक्षिणात्वेन तुभ्यमहं संप्र
ददे न ममेति दद्यात् प्रतिगृहीतादेवस्य त्वेति प्रतिगृह्य यथाशक्ति कामस्तुति पठि
२५ त्वा समापयेत् इति तिलद्रोणदानं अथ तिलपात्रदानं आस्योनाम्रपात्रं तिलैः पू
र्णं प्रस्थमात्रं द्विजाय च सहिरण्यं च यो दद्यात्स सहस्रं श्रद्धयान्वितः सर्वपाप॥ वि
शुद्धात्मा लभते परमां गतिमिति अद्येत्यादि इदं तिलपूरितताम्रपात्रं सोमदैवतं
सरुवर्णं अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय अशेषपापक्षयकामस्तुभ्यमहं
संप्रददे न ममेति मंत्रस्तु तिलाः स्वर्णयुतास्तुभ्यं प्रदत्ता मघनाशनाः विष्णुप्रीति
कराः नित्यमतः शांतिं प्रयच्छ मे प्रतिग्रहः पूर्ववत् इति माघे नित्यं तिलपात्रदानं अ
थ मासानि तिलपात्रदानं कौर्मे ताम्रपात्रे तिलान्कृत्वा पलषोडषकल्पिते समुवर्णे २५

नशक्त्या वा विप्राय प्रतिपादयेत् नाशयेत्रिविधं पापं वाङ्मनःकायसंभवं॥
तिलपूर्णं ताम्रपात्रं सहिरण्यं द्विजाय वै प्रातर्दत्वा तु विधिवत् दुःखघ्नं विनिहंति
सः तिलपात्रं त्रिधा प्रोक्तं कनिष्ठोत्तममध्यमं ताम्रपात्रं शपलं जघन्यं परिकीर्ति ८
तं द्विगुणं मध्यमं प्रोक्तं त्रिगुणं चोत्तमं मतं स्वर्णमेकं जघन्यं तु द्विगुणं मध्यमे
क्षिपेत् त्रिगुणं चोत्तमे प्रोक्तं सुवर्णं परिकीर्तितं पलसंख्या तु निष्कद्वयमिति स
पादनिष्कद्वयमित्यन्ये अत्र देशाचारतो व्यवस्था दानवाक्यं तु नित्यतिलपात्रदा
नवत् यानि कानि च पापानि ब्रह्महत्या समानि च तिलपात्रप्रदानेन तानि नश्यं
तु मे सदेति इति तिलपात्रदानं अथ मातुरान्यत्व तिलपूर्णकांस्यपात्रदानं
आदित्यपुराणे यत्तं सौत्रामणिं कर्तुं यदि शक्तिर्न विद्यते महासरस्तथा वापिकू

दा॰न॰ पंकं तु चरेद्दैर्घिकं एवं कृते मात्रऋणान्मुक्तो भवति मानवः सदक्षिणं कांस्यपात्रं दत्वा
चैव प्रमुच्यते शुद्धकांस्यस्य पात्रस्य प्रमाणं पंचविंशतिः पंचविंशतिपलानि तिला
२६ नाम त्रनिर्दिष्टं प्रस्थानां सप्तकं तथा सुवर्णमाषाश्चत्वारः पात्रस्योपरि धारयेत् वस्त्रे
णवेष्टयेत्पात्रं पिधाय चरुभक्तितः स्नानं कृत्वा निम्नगायां पितृन्देवांश्च तर्पयेत् त
तोभिपूजयेद्देवं शंकरं हरिमेव वा सगोमयेनाप्ससंलिप्य गृहमध्यं चत्वरं ततः लिखेत्सह म
स्रारचक्रं कुंकुमेनातिशोभनं ततो वह्निं समंस्थाप्य होमं कुर्याद्यवैस्तिलैः पद्मे पात्रं
प्रतिष्ठाप्य पूजयेद्भक्तिभावतः ततो ब्राह्मणमाहूय बहुमंत्रसमन्वितं पादौ प्रक्षाल्य
विधिवन्मातुः श्राद्धं समाचरेत् अथ कृत्यं यथाशक्ति मौये वा प्रमवासरे ग्रहणे र
विसोमाभ्यां संक्रांतिषु युगादिषु तथान्यदपि पर्वते माघ्यां मृद्धिरूपमातरं तदस्य
२६

फलं सर्वं पुरा प्राह महेश्वरं जीवंति भूषयेद्वस्त्रैर्मालैरपि विभूषणैः दत्वा विप्रस्य त
स्याग्रे होमं कुर्यात्प्रयत्नतः सोपस्कारं सतांबूलं समाप्य च विसर्जयेत् अन्येषामपि विप्राणां
भोजनानि प्रदापयेत् अथास्य प्रयोगः माघ्यां पूर्वोक्तपुण्यकाले वा यजमानः कृतनित्य
क्रियः पूर्वोक्तद्वारद्वार पद्मे कांस्यपात्रं तिलैः पूरितं स्थापयित्वा हरं हरिं वा संपूजितसुरतो
ग्निं विष्णुमंत्रेण शिवं वा संपूज्य ततः परतोग्निं विष्णुमंत्रेण शिवं वा संपूज्य ततः परतो
ग्निं विष्णुमंत्रेण शिवमंत्रेण शिवं वा अष्टोत्तरशतं घृताक्ततिलैर्यवैश्च हुत्वा ब्राह्मणमा
हूय उदङ्मुखमुपविश्य पादप्रक्षालनादि मातुः श्राद्धं समाचम्य प्राणानायम्य अद्ये
त्यादि॰ गोत्रायज्ञशर्मणे ब्राह्मणायउक्तोपस्कारयुक्तं मम मातुः गर्भधारणपोषणमल
मूत्रादिना दुःखोस्य वर्णयुक्तं वस्त्रसंयुतं सर्वोपस्कारसंयुतं तुभ्यमहं संप्रददे नम

मेति दद्यात् मंत्रोऽस्य कांस्यपात्रं मया दत्तं मातुरानृण्यकाम्यया भगवन्वचनात्तुभ्यं य
थाशक्ति सतिलं तथा यदा दशमासांश्च उदरे जनन्या संस्थितस्य मे क्लेशिता बालभावेन स्त
नपानादिजो नमा मलमूत्रादिमध्येपलिप्ताया च मया कृता भवतो वचनाद्यच्च मम मु
क्तिर्भवेदृणात् तिलसंख्याकृतं दुःखं जनन्या मम सेवितं कांस्यपात्रप्रदानेन कृत
कृत्यो भवाम्यहं ततः शक्त्या हिरण्यं दक्षिणां दद्यात् पुनर्व्याहृतिभिराज्यहोमं कृ
त्वा विसर्ज्य यथाशक्त्या ब्राह्मणान्भोजयित्वा स्वयं सुहृद्युतो भुंजीतेति इति मातुरानृण्य
त्वतिलपूर्णकांस्यपात्रदानप्रयोगः अथ तिलपूर्णकरकदानं वापपीये करकं
तिलसंपूर्णं मंडले वह्निदैवते शिवं वह्निवदाराध्य पूजयेत्करवीरकैः पुन्नागुरक्तचंद
नेन निपीसः सर्जरधूपेन धूपयेत् वह्निमंडलं त्रिकोणं मंडलं शिवं वह्निवदिति वह्निसे

रूपं शिवं ब्रह्मांडपुराणे आदर्शनं च ततो दद्याद्दीपानां च चतुष्टयं वह्निरूपपतिः शंभुः
वह्निरूपी तिलाश्रयः निजरूपकृतं पापं चाश्रु पंचव्यपोहतु इति दत्त्वाऽस्य नश्यं
ति पापान्यग्निकृतानि च पापहोमेषु कार्येषु हिंस्यते यानि वह्निना आगारवन
दाहादिसंभवानि च पानि वै विरुद्धकरणोत्थानि रूपयोगोद्भवानि च परदार
परपरद्रव्यापुत्रदर्शनदानि च शिवादिदर्शनोत्थानि तत्र दोषकृतानि च यः एवं
कुरुते दानं शिवभक्त्यापतद्व्रतः शिवलोके वसेद्धीयः कल्पत्रयमतंद्रितः इति तिल
पूर्णकरकदानं अथान्नदानं कौर्म्योदाद्या ब्रह्मपुराणोक्तं मूल्यं पंचशतानि वा वि
त्तानुसारात्तत्रापि कनिष्ठं मत्तमध्यमं शतत्रयं हेममाषदानमध्यममिति निरूपस्य
णालंकरणं स्वर्णतारा विभूषणं सदक्षिणं वित्तशाठ्यपादतः शिवपुरं व्रजेत् स्मरणात्

दा॰चं॰ ज्जुः तारामौक्तिकजालाग्रजालंकाराः कौर्म्ये यथालाभोपपन्नं वापः प्रपच्छतिदंति
२८ नं ब्राह्मणाय दरिद्राय स्वर्गलोके महीयत इति ततो गजदानं गंधादिभिर्गजं द्विजं संपूज्य
दद्यात् दानवाक्यं तु अद्येत्यादि॰ मम सर्वपापक्षयो नरसिद्धचारणसेविताकचण
किंकिणीजालमालीविमानारोहणानरानेकमन्वंतरतरामोदाच्छिन्नास्यदेवराजत्
विष्णुपुरावाप्तिकामस्तत्प्रीतिकामश्च सालंकृतायामुकगोत्रायामुकशर्मणे ब्राह्म
णाय मंगजं कृस्वारज्जुस्थिरासनसंहितंकांचनमालादिकीर्णचामरगंधपुष्पाद्यलं
कृतं प्रजापतिदैवतं तुभ्यमहं संप्रददे न ममेति कुरंध्धस्वाद द्यात् करंशुऽदं दंऽः कृते
तद् गजदानकर्मणः सांगतासिध्यर्थं इदं सुवर्णं अग्निदैवतं दक्षिणात्वेन तुभ्यमहं संप्र
ददे न ममेति दद्यात् ततो द्विजो गजमारुह्य स्वेस्वस्य त्वेति॰ यथाशाखं कामस्तुतिं पठित्वा २८

इति गृण्हामि स्वस्तीति पठेत् यजमानो गजं प्रार्थयेदनेन मंत्रेण ऐरावतस्त्वतुर्दंतो गजा
नां नाशककल्मषः दिग्दंतिभिः पूज्यतमः पापं क्षयतु नः प्रभो सम्प्रति कुगजेंद्रस्त्वं सर
स्वसाभिषेचकः इंद्रस्य वाहनं श्रेष्ठ सर्वदेवैश्च पूजितः गजेंद्र मत्तमातंग देवसैन्य
विनाशक तव दानेन मे यांति सर्वदा सकमहत्स्वमिति ब्राह्मणेनयास्करं स्कंधे भू
यसीं दैत्यसैन्यविनाशक तव दानेन याम्यमिति इति गजदानप्रयोगः अथ दासीदा
नं वह्निपुराणे स्थिरं सत्ववत्संयुक्ते सौम्ये गृहान्विते दानकालं प्रयांसंतिसंतः पर्वणी
वा पुनः अलंकृत्य यथाशक्त्या वासोभिर्भूषणैस्तथा ब्राह्मणाय प्रदातव्या मंत्रेणा
नेनशक्तितः पंचवर्षाधिकालातु चत्वारिंशोत्समावपि दासी द्विजाय दातव्या दासी
दानेप्ययं विधिरित्यादि दानवाक्यं तु अद्येत्यादि॰ गोत्राय शर्मणे सालंकृतायसु

दा॰ चं॰ वर्णालंकारवतीं गंधपुष्पाद्यर्चितां प्रजापतिदेवतां अक्षय्यसुखावाप्तिकामस्तु
२९ भ्यमहं संप्रददे न मम इति द्विरसि एतां दद्यात् द्विजप्रार्थितां मंत्रस्तु वन्हिपुराणो
क्तं दासामया तुभ्यं श्रीवत्स प्रतिपादिता सर्वकामकरी भोग्यायेश्चं भद्रमस्तु
ते ततः सुवर्णदक्षिणां दद्यात् नमस्कुर्यात् अनुगत्वा तु सीमायां द्विजं चैव विस
र्जयेदिति इति दासीदानं काम्यं स्यं चतुर्बलिवर्दैरूढधान्याशतं तथा वित्ता
नुसारादैश्वर्योपकरणैर्युतं सदक्षिणं च विप्राय दत्त्वा शिवपुरं व्रजेत्॥
अष्टादश धान्यशतं रथोपकरणानि युग्यपाश्चावलीवर्दी नीरदक्षिणा च त्रिंशन्मा
शमिति सुवर्णमुत्तमा द्वादश मध्यमा अधमा शतेऽच्छमिति त्रिविध्यमाह
हेमाद्रि दानवाक्यं तु अद्येत्यादि॰ गोत्राय शर्मणे सालंकृतोपचतुर्बलीवर्दैर्यु २९

क्तं सोपस्करं धान्याशादशभिर्युतं विश्वकर्मदैवतं अक्षय्यस्वर्गलोकादि सुखावाप्तिका
मस्तुभ्यमहं संप्रददे न मम इति मंत्रस्तु रथारथनागाद्यमममस्ते विश्वकर्मणि विश्वरू
पायदेवाय अरुणाय नमोऽस्तु ते सुवर्णदक्षिणां दद्यात् इति शकटदानं अथ गंत्रीरथ
दानं गारुडे गंत्रीतुरगसंयुक्तां यो ददाति द्विजातये सर्वकामसमृद्धात्मा सदा गा ज्ञा
यते भुवीति गंत्रीरथं विशेषः सा चतुर्भिर्गजैरश्वैर्वृषैर्वोपेता द्वाभ्यां चोपेता दान
वाक्यं तु पूर्ववत् मंत्रस्तु गंत्रीमिमां प्रयच्छामि विश्वकर्माधिदैवतां दानेनानेन
भगवान् प्रीयतां मे परं पुमानिति ततः सुवर्णदक्षिणा इति गंत्रीरथदानं अथ
भसंगाशिविकादानं हेमाद्रौ मात्स्ये मार्गशुक्लैकादश्यां माघफाल्गुनयोः वैशाखे
वा हिरण्मयं हरिमभ्यर्च्य रात्रौ जागरं कृत्वा प्रातः कृतनित्यक्रिया अद्येत्यादि॰ गो

दा॰न॰ गोत्रायशर्मणे सुपूजितायइमां शिबिकां उक्तोपस्कारां अंगिरादैवतां इष्टभोगावाप्तये तु
३० भ्यमहं संप्रददे न मम इति ततः सुवर्णदक्षिणां दद्यात् तत्रैव वन्हिपुराणे देवलोकेषु
विपुलं भोगान् ततरमं ते विष्णुसायुज्यावाप्तिकामो विप्रस्य वर्षात्राने शिबिकावाहका
नां च वर्षपर्याप्तमन्नं च दद्यादिति हेमाद्रिः द्विजप्रार्थनां मंत्रस्तु शिबिकाने मपादता
यथा शक्त्या विभूषिता द्विजत्वं प्रतिगृण्हीष्व वांछितं तेन मे भवेदिति इति शिबिका
दानं अथ महीदानं कौर्मे गोचर्ममात्रभूमंडलमधिकं वा स्वशक्तितः त्रिधा सदक्षि
णं कृत्वा शिवपुरं व्रजेदिति देयं कसुवर्णदक्षिणेत्यर्थः अपि गोचर्ममात्रेण सम्यक्
दत्तेन मानवः धौतपापो विशुद्धात्मा स्वर्गलोके महीयत इति तथा दशहस्तेन दंडेन
त्रिंशद्दंडानुवर्तनं त्रिभागहीनं गोचर्ममानमाह प्रजापति तथा गवां शतं वृषश्चैको ३०

यत्र तिष्ठत्यतंत्रितं तद्धि गोचर्ममात्रं तु प्राहुर्वेदविदो जनाः तथा षष्टिवर्षसहस्राणि स्व
र्गे वसति भूमिदः आच्छेत्ता चानुमंता च तान्येव नरके वसेत् तथा भूमिं यः प्रतिगृण्हाति
भूमिं यश्च प्रयच्छति तावुभौ पुरुषौ लोके सूर्यमंडलभेदिनौ तथा यथा भूमिप्रदान
स्य कलां नार्हंति षोडशीं दानान्यन्यानि मे दत्तानि भूमिना सुद्धवंत्विदेति दानवाक्यं तु
अद्येत्यादि॰ गोत्रायशर्मणे सालंकृताया षष्टिवर्षसहस्रस्वर्गलोके शिवपुरनिवा
सकामः सर्वपापक्षयकामो वा इमां भूमिं सस्योद्भवां सवृक्षफलपुष्पायुतां विष्णुदैव
तां तुभ्यमहं संप्रददे न मम इति सासनकृत्वा तिलोदकं द्विजहस्ते दद्यादिति ब्राह्मणा
स्तु भूमिं प्रदक्षिणीकुर्वन् प्रतिगृण्हीयात् देवस्य त्वेति पथ्वाद्यारवे कामस्त्विति प
ठित्वा स्वस्तीति वदेत् मंडपवचनात् अत्र सुवर्णदक्षिणा मता मंत्रस्तु सर्वेषा

दा०चं० माश्रया भूमिर्वराहेण समुद्धृता: अनंतसस्यफलदा मत: शांतिं प्रयच्छ मे तथा अस्यां
३१ रोहंति बीजानि वर्षाकाले महीपते भूमिप्रदानात्सकला मम संतु मनोरथा: इति शि
वधर्मे विश्वामित्र: स्वदत्तां परदत्तां वा यो हरेद्वसुंधरां षष्टिवर्षसहस्राणि विष्ठा
यां जायते कृमि: सविष्टायां कृमिर्भूत्वा पितृभि: सह मज्जतीति तिपाद: इति शिवधर्मो
क्तं भूमिदानं अथ गृहदानं कौर्मे शांतित: सर्ववित्तेन पूर्णं गृहमपि तथा सदक्षिणं हि
जेद त्वा ब्रह्मलोके व्रजेन्नर इति ऐष्टिकं दारुकं चापि मृण्मयं चापि शक्तित: सर्वोपकरणो
पेतं योदद्याद्धि पुलं गृहं ब्राह्मणाय दरिद्राय विदुषे च कुटुंबिने सर्वकामसमायुक्तो ब्रह्म
सायुज्यमाप्नुयादिति ब्रह्मवैवर्ते नगादृहस्थापरो धर्मो नैव दानं गृहात्परं नान्नतोद
धिकं पापं न पूज्यो ब्राह्मणात्पर इति गृहनिर्माणप्रकारमाह नारद: स्नानागारं दि ३१

शि प्राच्यां आग्नेय्यां पचनालयं याम्यां शयनगेहं च नैऋत्यां शस्त्रमंदिरं शस्त्रमं
दिरं वारुण्यां प्रतिच्यां भोजनागारं वायव्यां पशुमंदिरं भांडागारं उत्तरस्यां मैशान्यां देव
मंदिरं इति कुर्यादिति शेष: तत्र कूपे दिग्विशेषफलं देवीपुराणे पूर्वमाश्रित्य कर्तव्य
कूपस्यादनिलेऽपि वा नैर्ऋत्ये स्वयं कुर्यान्मठादेवालयात्गृहादिति कृतं भयप्रदं लोके
तथा चास्याग्निजं भयं वायव्यां चापि देवस्य भयदं जायते कृतमिति वाराहमिहिर:।
पुष्टिं भवति पुत्रहानि पुरं भिनाशां मत्स्य शापदं शास्त्रबाधां किंच सौख्यं दिक्षु पूर्वादि कु
र्यात् कूपो मध्य गेहमर्थक्षयं चेत्यादि मात्स्ये देवता पंचकं तत्र चत्वारि शास्समाहृतं
पूजयित्वा यथान्यायं ततो दद्याद्गृहं गृही पूजयित्वा स्वयं वास्तुशांतिं कृत्वा दद्यादित्यर्थ:
अथ प्रसंगात्संक्षेपेण वास्तुशांति: प्रयोग: कर्ता शुभदिने आचम्य प्राणानायम्य देश

दा॰ वं॰ कालौ संकीर्णे अस्य वास्तोः शुभतासिध्यर्थं वास्तुशांतिं करिष्ये इति संकल्प्य तदंगतया
३२ गणेशपूजास्वस्तिवाचनमातृकापूजाभ्युदयिकश्राद्धाचार्यब्रह्मर्त्विग्वरणानि कृत्वा य
थाविभवं वस्त्रालंकारादिभिः संपूजयेत् तत्र आचार्यो पदचसंस्थितं भूतं भूत॰ अप
क्रामंतु भूतानि सेताभ्यां॰ भूतप्रेतपिशाचाद्या अपक्रामंतु राक्षसाः स्थानादस्माद्व्रज
न्त्वाकाशो भिभुवं तिमानित्यनेन सर्षपान्विकीर्य पंचगव्येन शुचि वोदक्षरस्त्र
चेन ततो न्विद्रमत्रं चेन॰ गृहं संप्रोक्ष्य गृहमध्ये प्राच्यामेशान्यां च चतुरंगुलं हस्तो
च्छ्रितं चतुरस्त्रं स्थंडिलं कृत्वा तस्येषानादिकोणचतुष्टये चतुरो लोहकीलान् वि
शंतु भूतले नागा लोकपालाश्च सर्वतः अस्मिन्गृहे वतिष्ठंतु आयुर्बलसदाकरेति
मंत्रेण लिखेत् प्रतिकीलं मंत्रावृत्तिः ततईशानकोणचतुष्कोणेषु अग्निभ्योप्य ३२

थ सर्वेभ्योपे चान्ये तत्समाश्रिताः तेभ्यो बलिं प्रयच्छामि पुण्यमोदनमुत्तममिति
मंत्रेण मंत्रावृत्या माषभक्तबलीन् दत्वा स्थंडिलोपरि कुंकुमादिना हेमरूप्यशला
कया वा प्राकूपश्चापताः प्राग्गतान् दश संस्थाः षडंगुलांतरा प्रणवादि नमोंतैर्दशना
मभिर्दशरेखाः कुर्यात् ॐ शांतायै नमः १ ॐ यशोवत्यै नमः २ ॐ कांतायै॰ ३ ॐ वि
शालायै॰ ४ ॐ प्राणवाहिन्यै॰ ५ ॐ सरस्वत्यै॰ ६ ॐ सुमत्यै॰ ७ ॐ नंदायै॰ ८ ॐ सुभद्रा
यै॰ ९ ॐ सुरथायै॰ १० इति दशरेखाः कृत्वा ॐ हिरण्यायै॰ १ ॐ सुव्रतायै॰ २ ॐ लक्ष्म्यै॰
३ ॐ विभूत्यै॰ ४ ॐ विमलायै॰ ५ ॐ प्रियायै॰ ६ ॐ विजयायै॰ ७ ॐ ज्वालायै॰ ८ ॐ वि
शोकायै॰ ९ ॐ इडायै॰ १० इति दक्षिणोत्तरायता प्राक्संस्थाः दशरेखाः कुर्यात् एव
मेकाशीतिपदं मंडलं संपद्यते तत्र मध्यस्थ नवकोष्ठानि रेखामार्जनेनैकी कुर्यात्

दा॰ स॰ एतेन नवपदं ब्रह्मस्थानं तस्य चतुर्दिक्षु चत्वारि पदानि विदिक्षु षट्‌ खलाकाराणि द्वादशको
णं चतुष्टोभयतेश्चाष्टाविंशतिविंशत्येकपदानि अवशिष्टानि भवंति द्वात्रिंशत्‌ पंच पंचेति पदा
३३ निते षु चतुर्ष्वेतैर्नमोन्तैर्वक्ष्यमाणनामभिर्देवता आवाह्य स्थापयेत्‌ तत्रेशानकोण
पदे वास्तोः शिरसि ॐ शिखिनमावाहयामि तद्दक्षिणैकपदे दक्षिणनेत्रे ॐ पर्जन्या
य॰ ॐ पर्जन्यमावाय॰ २ तद्दक्षिणे ततोपि पश्चिमत इति पदद्वये दक्षिणश्रोत्रे ॐ जयंता
य॰ जयंतमावा॰ ३ तद्दक्षिणपदद्वये दक्षिणबाहौ हृदये दुसे॰ ॐ कुलिशायुधाय॰ कुलिशा
युधमावा॰ ४ तद्दक्षिणपदद्वये दक्षिणबाहौ ॐ सूर्याय॰ सूर्यमावा॰ ५ तद्दक्षिणपदद्वये
दक्षिणबाहवेव ॐ सत्याय॰ सत्यमावा॰ ६ तद्दक्षिणपदद्वये दक्षिणकूर्परे ॐ भृशाय॰ भृश
मा॰ ७ तद्दक्षिणे अंसपंक्तिगतैकपदे दक्षिणबाहवेव ॐ आकाशाय॰ आकाशमा॰ ८ ३३

पार्श्वे एव गृहक्षताय॰ गृहक्षतमा॰ १२ तत्पश्चिमपदद्वये दक्षिणोरौ ॐ यमाय॰ यममा॰ १३ तत्पश्चि
ॐ आग्नेयकोणपदे दक्षिणबाहवेव ॐ वायवे चामुमा॰ ९ तत्पश्चिमैकपदे दक्षिणम॰
णिजंघे ॐ पूष्णे॰ पूषणमा॰ १० तत्पश्चिमे ततोप्युत्तर इति पदद्वये दक्षिणपार्श्वे ॐ वितथा
य॰ वितथमा॰ ११ तत्पश्चिमपदद्वये दक्षिणजानौ ॐ गंधर्वाय नमः॰ गंधर्वमा॰ १४ तत्पश्चि
मपदद्वये दक्षिणजंघायां भृंगराजाय॰ भृंगराजमा॰ १५ तत्पश्चिमे पादपंक्तिगतैकपदद
क्षिणस्फिजि ॐ मृगाय॰ मृगमा॰ १६ नैरृत्यकोणपदे पादयोः पितृभ्यो॰ पितृनावा॰ १७
तदुत्तरैकपदे वामस्फिजि ॐ दौवारिका॰ दौवारिकमा॰ १८ तदुत्तरे ततोपि प्रागिति पदद्वये
वामजंघायां ॐ सुग्रीवाय॰ सुग्रीवमा॰ १९ तदुत्तरपदद्वये वामजानौ ॐ पुष्पदंताय॰ पुष्प
दंतमावा॰ २० तदुत्तरपदद्वये वामोरौ ॐ जलाधिपाय॰ जलाधिपमा॰ २१ तदुत्तरपदद्व मपदद्वयेदक्षिण +२
येवामपार्श्वे ॐ असुराय॰ असुरमा॰ २२ तदुत्तरपदद्वये वामपार्श्वे एव ॐ शोषाय॰

दा॰ च॰ एतं नवपदं ब्रह्मस्थानं तस्य चतुर्दिक्षु चत्वारि पदानि विदिक्षु षट् खलाकाराणि द्वादशको
णे चतुष्टयं भवतेश्वाशाविंशतिविन्यस्यैकपदानि अवशिष्टानि प्रतिदिशं पंच पंचेति पदा
३३ नि तेषु चतुर्थ्यंतैर्नमोंतैर्वक्ष्यमाणनामभिर्देवता आवाह्य संस्थापयेत् तत्रेशानकोण
पदे वास्तोः शिरसि ॐ शिखिनमावाहयामि तद्दक्षिणे एकपदे दक्षिणनेत्रे ॐ पर्जन्या
य॰ ॐ पर्जन्यमावाहय॰ २ तद्दक्षिणे ततोपि पश्चिमतः इति पदद्वये दक्षिणश्रोत्रे ॐ जयंता
य॰ जयंतमावा॰ ३ तद्दक्षिणपदद्वये दक्षिणपार्श्वद्वये दुसे॰ ॐ कुलिशायुधाय॰ कुलिशा
युधमावा॰ ४ तद्दक्षिणपदद्वये दक्षिणबाहौ ॐ सूर्याय॰ सूर्यमावा॰ ५ तद्दक्षिणपदद्वये
दक्षिणबाहवेव ॐ सत्याय॰ सत्यमावा॰ ६ तद्दक्षिणपदद्वये दक्षिणकूर्परे ॐ भृशाय॰ भृश
मा॰ ७ तद्दक्षिणे अंसपंक्तिगते कपदे दक्षिणबाहवेव ॐ आकाशाय॰ आकाशमा॰ ८ ३३

मध्यगतनवकोष्ठकब्रह्मपदसंलग्नप्रागादिपदत्रये दक्षिणस्तने ॐ अर्यमणे॰ अ
र्यमणमा॰ ३७ तद्दक्षिणैकपदे दक्षिणहस्ते ॐ सवित्रे॰ सवितारमा॰ ३८ तत्पश्चिमे ब्रह्म
संलग्नपदत्रये जठरदक्षिणभागे ॐ विवस्वते॰ विवस्वंतमा॰ ३९ तत्पश्चिमपदे वृषणे
पदे विबुधाधिपाय॰ विबुधाधिपमा॰ ४० तदुत्तरब्रह्मसंलग्नमावजठरभागे ॐ मित्राय॰
मित्रमा॰ ४१ तदुत्तरैकपदे वामहस्ते ॐ राजयक्ष्मणे॰ राजयक्ष्माणमा॰ ४२ तत्प्राक्पदत्र
ये वामस्तने ॐ पृथ्वीधराय॰ पृथ्वीधरमा॰ ४३ तत्प्रागेकपदे उरसि ॐ आपवत्साय॰ आप
वत्समा॰ ४४ ततो मध्यमनवपदे तन्नाभ्योः ॐ ब्रह्मणे॰ ब्रह्माणमा॰ ४५ तदुत्तरवास्तोष्पते
र्वसिष्ठो वास्तोष्पतिस्त्रिष्टुप् छंदः वास्तुप्रतिष्ठापने विनियोगः ॐ वास्तोष्पते प्रतिजानी
ह्यस्मान्॰ इति सवर्णादिप्रतिमामग्न्युत्तारणपूर्वकं संस्थाप्य मंडलाद्बहिरीशानादिको

दा॰ चं॰ णेपुचरक्यै॰ चरकीमा॰ ४६ ॐ विदार्यै॰ विदारीमा॰ ४७ ॐ पूतनायै॰ पूतनामा॰ ४८ ॐ
३५ पापराक्षस्यै॰ पापराक्षसीमा॰ ४९ ततः पूर्वादिषु ॐ स्कंदाय॰ स्कंदमा॰ ५० अर्यमणे॰ अर्य
मणमा॰ ५१ ॐ जंभकाय॰ जंभकमा॰ ५२ ॐ पिलिपिच्छाय॰ पिलिपिच्छमा॰ ५३ ततः पूर्वा
घष्टदिक्षु ॐ इंद्राय॰ १ ॐ आग्नेये॰ २ ॐ यमाय॰ ३ ॐ नैर्ऋते॰ ४ ॐ वरुणाय॰ ५ वायवे॰ ६ ॐ कु
बेराय॰ ७ ॐ ईशानाय॰ ८ इत्यावाहनबाह्यपीठदेवताभ्यो नम इति संपूज्य प्रार्थयेत्
यथा मेरुगिरेः शृंगं देवानामालयः सदा तथास्मादिदेवानां गृहे मम स्थिरो भव इति सं
प्रार्थितः स्वतंत्रस्थंडिले अग्निस्थापनादि चतुष्यंते औदुंबरादि समिन्तिलाज्यैर्वास्तुमं
डलदेवताभ्यो नाममंत्रेण हुत्वादि पूर्णाहुत्यंतं कुर्यात् ततो मंडलदेवताभ्य उद्दिश्य एष
पायसबलिर्नम इत्यादिबलीन् दत्वा ह्रणु षपाना इति सूक्तादिना मंडलं त्रिः सूत्रावेष्ट ३५

पार्श्वे ऐवर गृहक्षताय॰ गृहक्षतमा॰ १२ तत्पश्चिमपदद्वये दक्षिणोरौ ॐ यमाय॰ यममा॰ १३ तत्पश्चि
ॐ आग्नेयकोणपदे दक्षिणपादे एव ॐ वाप्यवे चाग्मुमा॰ ९ तत्पश्चिमे एकपदे दक्षिणम
णिजंघे ॐ पूष्णे॰ पूषणमा॰ १० तत्पश्चिमे ततोप्युत्तर इति पदद्वये दक्षिणपार्श्वे ॐ वितथा
य॰ वितथमा॰ ११ तत्पश्चिमपदद्वये दक्षिणजानौ ॐ गंधर्वाय॰ गंधर्वमा॰ १४ तत्पश्चि
मपदद्वये दक्षिणजंघायां भृंगराजाय॰ भृंगराजमा॰ १५ तत्पश्चिमे वायव्यकोणगते एकपदे द
क्षिणस्फिजि ॐ मृगाय॰ मृगमा॰ १६ नैर्ऋत्यकोणपदे पादयोः पितृभ्यो॰ पितृनावा॰ १७
तदुत्तरे एकपदे वामस्फिजि ॐ दौवारिकाय॰ दौवारिकमा॰ १८ तदुत्तरे ततोपि प्रागिति पदद्वये
वामजंघायां ॐ सुग्रीवाय॰ सुग्रीवमा॰ १९ तदुत्तरपदद्वये वामजानौ ॐ पुष्पदंताय॰ पुष्प
दंतमावा॰ २० तदुत्तरपदद्वये वामोरौ ॐ जलाधिपाय॰ जलाधिपमा॰ २१ तदुत्तरपदद्व
ये वामपार्श्वे ॐ असुराय॰ असुरमा॰ २२ तदुत्तरपदद्वये वामपार्श्वे एव ॐ शोषाय॰

[illegible] +२

दा॰ चं॰ अत्रोषमा॰ २३ तदुत्तरे वास्तुपंक्तिगतैगपदैर्वाममणिबंधे ॐ पापाय॰ पापमा॰ २४ वा
३४ यव्यकोणपदे वामबाहौ वेव ॐ रोगाय॰ रोगमा॰ २५ तस्मागेकपदे वामप्रबाहौ वेव ॐ अहिर्बु
ध्न्याय॰ अहिर्बुध्न्यमा॰ २६ तस्मात्कृततोपि दक्षिणे चेति पदद्वये वामकूर्परे ॐ मुख्याय॰ मु
ख्यमा॰ २७ तस्मात्कृपदद्वये वामपार्श्वे ॐ भल्लाटाय॰ भल्लाटमा॰ २८ तस्मात्कृपदद्वये वाम
पार्श्वे ॐ सोमाय॰ सोममा॰ २९ तस्मात्कृपदद्वये वामांसे॰ सर्पेभ्यो नमः॰ सर्पानावा॰ ३० तस्मा
त्कृपदद्वये वामश्रोत्रे ॐ अदितेः॰ अदितिमा॰ ३१ तस्मात्कृ वास्तुपंक्तियगते कपदे वामने
त्रे दितये दितिमा॰ ३२ तद्दक्षिणशिखिपदाधःकोणपदे मुखे अद्भ्यो नमः॰ अपः आ॰ ३३ आग्ने
यवायुवायुपदाधःकोणपदे दक्षिणहस्ते सावित्राय॰ सावित्रं॰ ३४ नैरृत्ये पितृपदाधःको
णपदे मेढ्रे विजयाय॰ विजयं॰ ३५ वायव्ये रोगपदाधःकोणपदे वामहस्ते ॐ रुद्राय॰ रुद्रमा॰ ३६

यित्वा कलशोदकेन यजमानमभिषिच्य पुनः संपूज्य यथाशक्ति दक्षिणां दत्त्वा ब्राह्म
णान्भोजयेदिति केचित्त्वाचाराद्दानिके तु होमो नोक्तः तिलाद्द्रिद्रव्याणां विकल्प इति म
खकारः इदानीं तु नवग्रहसंकल्पितएष प्रयोगं कुर्वन्ति सा प्रदर्श्यते॰ तद्यथा यथा मेरु
गिरेः शृंगमिति प्रार्थनोत्तरं वास्तुमंडलान्नैरृत्यां पश्चिमायां वा कुंडे स्थंडिले वा चरदाना
मकाग्निं प्रतिष्ठाप्याग्नेरीशान्यां वास्तुमंडलादुत्तरे ईशान्यां वा नवग्रहदेवता आवाह्य
संपूज्य तत ईशान्यां ग्रहकलशं संस्थाप्य तत्र वरुणं संपूज्य देवदानवसंवादसुसाधैः सं
प्रार्थ्यान्वाधानं विदध्यात् अस्मिन्वास्तुकर्मण्यन्वाधानं अस्मिन्नित्यादि चक्षुष्यं
तमुक्त्वा प्रधानं आदित्यं सोमं भौमं बुधं गुरुं शुक्रं शनिं राहुं केतुं एता प्रधानदेवताः
प्रत्येकमष्टोत्तरशताष्टाविंशतिरष्टरष्टसंख्याकाभिर्वा अर्कादिसमिच्चर्वाज्याहुतिभिः

दा॰चं॰ तथा ईश्वरं। उमां। स्कंदं। विष्णुं। ब्रह्माणं। इंद्रं। यमं। कालं। चित्रगुप्तं। अग्निं। आपः। भूमिं। विष्णुं
३६ इंद्रं। इंद्राणीं। प्रजापतिं। सर्पान्। ब्रह्माणं। विनायकं। दुर्गां। आकाशं। अश्विनौ। वास्तोष्पतिं। लो
कपालान्। इंद्रं। यमं। नैर्ऋतिं। वरुणं। वायुं। कुबेरं। ईशानं। एतादेताः प्रधानदशांशेन तत्तत्स्व
मिश्रयोज्याहुतिभिः तथा शिखिनं। पर्जन्यं। जयंतं। कुलिशायुधं। सूर्यं। सत्यं। भृशं। आ
काशं। वायुं। पूषणं। वितथं। गृहक्षतं। यमं। गंधर्वं। भृंगराजं। मृगं। पितृन्। दौवारिकं। सुग्रीवं
पुष्पदंतं जलाधिपं। असुरं। शोषं। पापं। रोगं। अहिं। मुख्यं। भल्लाटं। सोमं। सर्पं। अदितिं
दितिं। आपं। सवित्रं। जयं। रुद्रं। अर्यमणं। सवितारं। विवस्वंतं। वसुधाधिपं। मित्रं। राजय
क्ष्माणं। पृथ्वीधरं। आपवत्सं। ब्रह्माणं। चरकीं। विदारीं। पूतनां। पापराक्षसीं। स्कंदं। अर्य
मणं। जंभकं। पिलिपिच्छं। एताः प्रधानदेवताः प्रतिद्रव्यमष्टोत्तराष्टाविंशतिरष्टसंख्या ३६

काभिर्वायवघृताक्ततिलसमिधान्यपायसाहुतिभिः वास्तोष्पतिमेतैर्द्रव्यैरष्टोत्त
रविंशतिरष्टसंख्याकाभिर्वापृवघृताक्ततिलसमिदाज्यपयाशतसंख्यायावास्तो
ष्पतिं चतुर्वारं वरुणा वास्तोष्पतिं पंचविंशतिपंचबिल्वफलैर्होमं जेवा पक्ष्ये शेषेण स्त
स्विष्टकृतमित्यादि आज्यभागांते यजमानः दउपकल्पितं हवनीयद्रव्यमन्वाधानो
क्तदेवताभ्यः न मम इत्युत्सृजेत् तत आचार्यादयः दिग्भ्यो होमं कृत्वा एव तिल ग्र
समिदाज्यपायसैस्त्रिरव्यादिपिलिपिच्छांताभ्यः त्रिपंचाशद्देवताभ्यो नाममंत्रैः प्रत्येक
मष्टाविंशत्यष्टाष्टाभिः संख्याकाभिराहुतिभिर्वा हुत्वा वास्तोष्पतिमेतैरेव द्रव्यैर्विंशति
तसंख्ययाहुत्वा सकृदयनो वास्तोष्पतिरसादिचतसृभिः ऋक्चममभिप्रत्यृचमृचंते
स्वाहाकारं पठन् जुहुयात् नात्र स्वाहाकारो ते होमः यथाविहोमेतु वास्तोष्पत इति च

शा॰ चं॰ त्वारो मंत्राः एकैकेन च मंत्रेण सप्तविंशतिराहुतयः इत्येतत्त्रयं ततो ये ते श्चतुर्भिर्बा
३७ ल्वोप्यतेभ्य बाम्लुणामिस्सिकया च एवं पंचभिः पंचबिल्वफलानि तद्वीजानि या गुडहुतः
तत आचार्यस्विष्टकृतादि प्रायश्चित्तहोमांते यजमानो लोकपालेभ्यो ग्रहपीठदेवता
भ्यश्च बलिं दत्वा पूर्णाहुतिं दत्वा त्रिरक्षादि पंचचत्वारिंशद्देवताभ्यः त्रिशिखिने एष पाय
सबलिर्नमः इत्यायुक्तिपूर्वकं सर्वेभ्योपि बलीन् दत्वा त्रिरक्षादि प्रीतये कांचनं द्विजेभ्यो
म्लसप्ती तयेधेनुं च दद्यात् ततो ग्रहकलशाबाम्लकलशोदकेन ऋत्विग्भिरभिषिक्तो
यजमानो ऋत्विग्भ्यो दक्षिणां दत्वा वाद्यादि तूर्यघोषपूर्वकं आचार्यऋत्विग्भिः सकुटुं
बो यजमानः स्वस्योग्रः पावमानमंत्रैर्गृहं त्रिः सत्वरेण वेष्टयित्वा समंतात् दिग्दिग्यमन्तो
भिरद्भिर्हिरण्मयश्चधायश्चांतातीयेन शान्तनेद्वौग्नीति पंचदशऋग्भिरितिनारायण ३७

ऋतिरितिसंतानीयेन इडैर्द्यावापृथिवीति पंचदशऋग्भिस्समुच्चयेन चेत्स्वनेति
ननचाश्वांकाम्नचोत्तरं त्रिः प्रदक्षिणं परिभ्रमन्प्रोक्षयत्वविच्छिन्नया चोदकधारया आपो
हिष्ठामयो भुव इति त्वं चैन विच्छिन्नां क्षीरधारां च परितो दत्वा वास्तुपीठमध्ये नवपदेसु
रूपां पृथ्वीं ध्यात्वा पृथ्वै नमः इति संपूज्य सर्वदेवमयवास्तु सर्वदेवमयं परमिति पठित्वा
ततो ग्रहस्याग्नेयकोणे यजमानपदेन जानुमात्रं गर्तं खात्वा मध्ये गोमयेनोपलिप्य
सुत्रके चंदनपुष्पाक्षतैरलंकृत्य धान्यबीजानि दध्योदनं च क्षिप्त्वा नवं जलपूर्णं कल
शं शुक्लैकपुष्पयुतं गंधाद्यर्चितमादाय जानुभ्यामवनीं गत्वा तज्जलं गर्ते ॐ नमो वरु
णायेति मंत्रेण क्षिपेत् जले प्रदक्षिणावर्ते पुष्पे चोर्ध्वमुखे शुभं ततो पद्ममृत्तिके प
रिकायां शाल्यादि सप्तधान्ययुतानि बीजानि दध्योदनं वा बालफलपुष्पाणि च क्षिप्त्वा न

दा॰चं॰ यथोक्तेन पूर्ववत्स्थापितरूप्यवास्तुप्रतिमामानीय पेटिकायां संस्थाप्य पेटिकायां पिधा
नपटेन पूजितोसि मया वास्तो होमाद्यैरर्चितैः शुभैः प्रसीद पाहि विघ्नेभ्यो देहि मे गृहजं सुख
३८ वास्तुमंत्रेण नमस्तेस्तु भगवन् गन्धाद्यैरर्चितप्रभो मद्गृहे धनधान्यादि समृद्धं कुरु सर्वदेति ततो गृ
हेशीकोणे गर्ते स्थाप्य सशैलसागरां पृथ्वीं यथा वहसि मूर्द्धनि तथा मां वह कल्याण संततसंपत्ति
भिः सह इति संप्रार्थ्य तथैव मृदा गर्तं पूरयेत् मृद आधिक्येधिकं फलं साम्ये समं न्यूनेनते
न्यूनं गर्तोपरि गोमयेनोपलिप्य गंधपुष्पाक्षतादि क्षिपेत् ततः आचार्यब्रह्मऋत्विजश्च सं
पूज्य तेभ्यो दक्षिणां दत्वा ग्रहपीठदेवता वास्तुपीठदेवताश्च संपूज्य उत्तिष्ठ ब्राह्मणस्पते॰
अभ्यारः यान्तु देवगणा इति विसृज्य ग्रहपीठं वास्तुपीठं आचार्याय दद्यात् ततः आ
चार्यः प्रणीताविमोकादि शिष्टं कर्म समाप्य अग्निं विसर्जयेत् ततो यजमानो ब्रह्मशिरस्का ३८

दश द्वादश वा त्रयोदश वा ब्राह्मणान्भोजयिष्ये इति संकल्प्य विप्रान्संपूज्य भूयसीं दत्वा प्र
मादात्कुर्वतां कर्म॰ यस्य स्मृत्येति कृत्वा कर्म ईश्वरार्पणं कृत्वा ब्राह्मणान्भोजयित्वा ते
भ्यः शिवं चास्त्विति त्रिवारं उक्ता शिवं चास्त्विति विप्रास्त्रीन्ब्रूयुः ततो यथासुखं सबंधुस्तत्प
तो भुंजीतेति एवंविधिना प्रतिसंवत्सरं वास्तुपूजनं कार्यं तेन गृहसंबाधितदुःखं नायु
यादिसुकृतं दानविवेके महादेवतनुजेन श्रीदिवाकरसूरिणा रचिता वास्तुशांतिरस्तु
पद्धतिर्बुधतोषदा इति पौष्यान्तशांतिप्रयोगः अथ भूमिदानप्रयोगः यजमानः कृ
तनित्यक्रियः पुण्यकाले गृहमध्ये चंदनेनाष्टदलं पद्मं विलिख्य तदुपरि प्रस्थमात्रं
तिलान्निक्षिप्य तदुपरि शय्यां सोपस्कारां स्थापयित्वा शय्योपरि सौवर्णमयीं लक्ष्मी
नारायणप्रतिमां अग्न्युत्तारणपूर्वकं पंचामृतादिना अभिषिंच्य संपूज्य प्रतिगृहीता

दान॰चं॰ रंच सपत्नीकं कृत्वा तं पुरे गृहीत्वा मंगलतूर्यघोषेण वक्ष्यमाणमंत्रैः गृहं प्रवेशयेत् तेच मंत्राः
एह्येहि नारायण दिव्यरूप सर्वामरैर्वंदितपादपद्म शुभाशुभानंद शुभामपीत्रा लक्ष्मी
२९ युतस्त्वं च गृहं द्वारणं नमः कौस्तुभनाथाय हिरण्यकवचाय च क्षीरोदार्णवसुप्ताय जग
द्धात्रे नमोस्तु ते नमो हिरण्यगर्भाय विश्वगर्भाय वै नमः चराचरस्य जगतो गृहभूता
य वै नमः भूलोकप्रमुखा लोकास्तव देहे व्यवस्थिताः नंदति यावत्कल्पांते तथास्मिन्
भवने गृही त्वत्प्रसादेन देवेश पुत्रपौत्रादितो गृहे पंचयज्ञक्रियायुक्तो वसेदाचंद्रता
रकमिति ततस्तं पूर्ववत्स्थापितं शय्यायां उदङ्मुखं उपविश्य सपत्नीकं यथाविभवं वस्त्रा
लंकारादिभिः संपूज्य स्वयमासने प्राङ्मुखो दर्भेष्वासीनो दर्भान् धारयमाणः पत्न्याः स
ह प्राणानायम्य देशकालौ संकीर्त्य मम समस्तपापक्षयकल्पकोटिशतावधि ब्रह्मलो २९

कमहीपमानकामः शिलाकाष्ठपक्वेष्टकादिनिर्मितं यथोपपत्तिसंपादितं कांस्यताम्रा
दिभाजनसर्वधान्यलक्षणघृततैलगुडशर्करागोमहिषीबलीवर्ददासदासीमंचतलि
काद्युपवितानादर्शतांबूलायतनैलालवंगादियुतवर्षपर्याप्तसर्वोपकरणान्वितं सदी
पिकाप्रद्योतितं विश्वकर्मदेवतं वा इदं गृहं गोत्राय शर्मणे अमुकशाखाध्यायिने सप
त्निकाय ब्राह्मणाय माल्यालंकृताय सुपूजिताय लक्ष्मीनारायणप्रतिमासहितं तुभ्यमहं
संप्रददे न मम इति दत्वा पठन् मंत्रौ तु इदं गृहं गृहाण त्वं सर्वोपस्करसंयुतं तव विप्रप्रसा
देन मम संतु मनोरथाः गृहं मम विभूत्यर्थं गृहाण त्वं द्विजोत्तम प्रीयतां मे जगद्योनि
र्वास्तुरूपी जनार्दन इति ततः प्रतिगृहीता गृहमध्यस्तंभं वदिढौरदेहितिं वामस्पृश्य
देवस्य त्वेति यजुषा प्रतिगृह्य स्वस्तीति कृत्वा यथाशाखं कामस्तुतिं पठेत् ततः सुवर्ण

दा॰चं॰ सहस्रमारभ्य एकसुवर्णपर्यंतं वित्तशाठ्यविवर्जितां दक्षिणां दद्यात् ततः पादुकोपा
नहछत्रचामरादिकं दत्वा संपन्नं गृहोपस्करभूषणादि सर्वं सुसंपन्नं संपूर्णमेवास्त्विति
४० मंत्रं वचनं गृहोपस्कारं दद्यात् ततो ब्राह्मणान्संपूज्य भूयसीं दक्षिणां दत्वा आशिषो
गृह्णीयात् प्रमादा॰ यस्य स्मृ॰ कर्मेश्वरार्पणं कुर्यादिति गृहदानफलमुक्तं मात्स्ये य
गेहं सर्वसंपन्नं पक्वेष्टं विनिवेदयेत् कल्पकोटिशतं यावद्ब्रह्मलोके महीयते सैकतं
दारुणं वापि यो दद्याद्विधिपूर्वकं वसेत्क्षीरार्णवे रम्ये नारायणसमीपतः मृण्मयं वा
पि यो दद्यात्दत्तं सोपस्कारान्वितं पुरेषु लोकपालानां मतिमन्वंतरे वसेदिति अथ प्रवि
ष्टां संसृष्टां वा प्रतिगृह्णीयादित्युक्तेः प्रविश्य गृहद्वारे देहलीं प्रविश्य पदे देहल्यां प्रति
गृहः कर्तव्यः तथैव संसृष्टरूपस्थूणां द्वारदेहलीं वा संसृष्टरूपमतिगृह्णीयादिति सांप्र ४०

दायिकाः इति गृहदानप्रयोगः अथ मठदानं स्कांदे कृत्वा मठं प्रयत्नेन शयनास
न संयुतं वेदिकां तु ण्यादि पुण्यकाले द्विजेभ्यो वा निवेदयेत् सर्वान्कामानवाप्नोति नि
ष्कामो मोक्षमाप्नुयात् इति मठदानं अथ धर्मशालादानं मार्कंडेयपुराणे कृत्वा
प्रतिश्रयगृहं पार्थिवानां निजगेहैकदेशं वा साधूनां यो निवेदयेत् प्रतिश्रयो धर्म
शाला तथा अक्षय्यपुण्यमुद्दिश्य तस्य स्वर्गापवर्गौ सर्वकामसमृद्धौ सोदेववद्दिवि
मोदत इति भविष्ये प्रतिश्रयः सुखीस्तीर्णे कार्यते जलधेनवे दीनानाथजनार्थाय च
किं न कृतं भवेदिति मत्स्यं गाल प्रतिश्रय धर्मशालादानं अथ कन्यादानं हेमाद्रौ सहस्र
मेधजनानां शतं चानडुद्दसमं दशानडुत्समं यानं दशयानसमो हयः दशवाजि
समा कन्या भूमिदानं च तत्समं तस्मात्सर्वेषु दानेषु कन्यादानं विशिष्यत इति च

वा॰चं॰ न्दिपुराणे श्रुत्वा कन्याप्रदानं च पितरश्च पितामहाः विमुक्ताः सर्वपापेभ्यो ब्रह्मलोकं व्र
जंति वै देवलः तिस्रः कन्या यथान्यायं पालयित्वा निवेद्य च न पिता नरकं याति ना
४२ रीवाक्षीप्रसूपिनीति वसिष्ठः हरकांक्षिति गौरीणां सप्तजन्मानुगं फलं धर्मेण वि
धिना दातुमसगोत्रेण युज्यत इति ऋष्यशृंगः वरगोत्रं समुच्चार्य प्रपितामह पूर्वकं
नाम संकीर्तयेद्विद्वान्कन्यायाश्चैवमेव हि तिष्ठेत्पूर्वमुखो दाता तिष्ठेत्सम्मुखो व
रः मधुपर्कार्चितायेनां तस्मै दद्यात्सदक्षिणां उदपात्रं तथा गृह्य मंत्रेणानेन दापा
येदिति तिष्ठेदिति अनुपविष्टे सर्वः पुनस्तत्रैव गौरीं कन्यामिमां विप्र यथाशक्ति वि
भूषितां गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय कन्ये ममाग्रतो भूयाः कन्ये मे देवि
विश्वयोः कन्ये मे पृष्ठतो भूयात्त्वत्तो ह्यामोक्षमाप्नुयात् मम वंशकुले जाता पा ४२

लिता वत्सराष्टकं तुभ्यं विप्र मया दत्ता पुत्रपौत्रप्रवर्द्धिनीति भूमिं गावश्च दासीवासां
सी च स्वशक्तितः महिष्यो वाजिनश्चैव दद्यात्स्वर्णमयीमपि ततः स्वगृह्यविधिना हो
माद्यं कर्म कारयेत् यथाचार विधेयानि मांगल्यं कुर्कमाणि चेति अथ कन्यादान प्रयो
गः आदौ वरं मधुपर्केण संपूज्य देशकालौ संकीर्त्य मम समस्तपितृणां निरतिशयानं
द ब्रह्मलोकावाप्त्यादि कन्यादान कल्पोक्त फलवाप्तये अनेन वरेण अस्यां कन्यायां
मुत्पादयिष्यमाणे सत्पात्र द्वादशावरान्द्वादशापरान्पुरुषान्पवित्री कर्तुं आत्मन
श्च श्रीलक्ष्मीनारायणप्रीतये ब्राह्मविवाहविधिना कन्यादानमहं करिष्ये कन्या कन
कसंपन्नां कनकाभरणैर्युतां दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया विश्वंभराः स
र्वभूताः साक्षिण्यः सर्वदेवता इमां कन्यां प्रदास्यामि पितृणां तारणाय च इति मंत्रोप

दा॰चं॰ ठित्वा स्वदक्षिणस्थभार्यादत्तपूर्वकजलधारामविच्छिन्नां नवकांस्यपात्रोपरि धृतक
४२ न्यांजलस्यपर्यस्थवरांजलिंदक्षिणहस्ते क्षिपन्वदेत् कन्यां तारयतु पुण्यं वर्द्धतां शिवा
आपः संतु सौमनस्यमस्तु अक्षतं चारिष्टं चास्तु दीर्घमायुः शांतिः पुष्टिश्च तुष्टिश्चास्तु
यच्छ्रेयस्तदस्तु यत्पापं तत्प्रतिहतमस्तु पुण्याहं भवंतो ब्रुवंतु अमुकगोत्र अमुकशर्माहं
ममसमस्तेत्यादि इसतं पूर्ववदुक्त्वा अमुकप्रवरोपेतायामुकप्रपौत्राय अमुकगोत्रा
यामुकप्रवरायामुकपौत्रायामुकगोत्रायामुकपुत्रायामुकशर्मणे श्रीधररूपिणे वरा
यामुकप्रवरोपेतां अमुकगोत्रां अमुकप्रपौत्रीं अमुकपौत्रीं अमुकस्य पुत्रीममुकना
म्नीं श्रीधररूपिणीं कन्यां वरार्थिनीं प्रजापतिदैवत्यां धर्मप्रजोत्पत्तिहेतुकर्मभ्यस्तुभ्यम
हं संप्रददे कन्यां प्रतिगृह्णातु भवानिति वरहस्ते कुशाक्षतजलं निक्षिपेत् प्रजापतिः ४२

प्रीयतामिति मनसा स्मरेत् न ममेति न वदेदिति केचित् ततो दाता गौरीं कन्यामिमां वि
प्र स्मारभ्य पुत्रपौत्रप्रवर्द्धनीमिसंतानकं आत्मरिता धर्मे चार्थे च कामे च नातिचर
तव्यात्वयेयं नातिचरामि इति वरः एवं मम समस्तेत्यादि पुत्रपौत्रप्रवर्द्धिनीमिसं
तंसुचारत्रयं कार्यमिति शौनकः ततो वरः देवस्यत्वा भ्यां प्रतिगृह्णामि ॐ स्वस्ती
त्युक्त्वा कन्याया दक्षिणांसमभिमृश्य क इदं कस्मा अदादिति पाथ शारवं कामस्तु
तिं पठित्वा एवीं प्रतिगृह्णात्विति जपित्वा धर्मसिध्यर्थं कन्यां प्रतिगृह्णामि इति व
देत् ततो दाता देशकालौ संकीर्त्य कृतस्य कन्यादानस्य सांगतासिध्यर्थमिदं सुवर्ण
अग्निदैवतं दक्षिणात्वेन तुभ्यमहं संप्रददे न ममेति वरहस्ते दद्यात् ॐ स्वस्तीति
वरः ततो दाता जलभोजनभाजनानि गोमहिष्याश्वगजदासीदासभूषाहना

दा॰चं॰ लंकारादियथाविभवसंकल्पपूर्वकंवरायदद्यात् अन्यद्यथाचारंकार्यमितिविस्त

४३ रस्तःप्रयोगस्त्वेदोज्ञेयः इतिकन्यादानप्रयोगः अथकपिलादानं तत्रदशधाक
रोधोलंकवराहे सुवर्णप्रतिमाकपिलापूर्वाद्वितीयागौरपिंगला तृतीयाचैवरक्ताक्षी
चतुर्थीगुडपिंगला पंचमीबहुवर्णास्यात्षष्ठीचश्वेतपिंगला सप्तमीश्वेतपिंगाक्षीअ
ष्टमीकृष्णपिंगला नवमीपाटलाप्रोक्तादशमीपुच्छपिंगला एकादशाविधाख्या
ताकपिलास्तेमहामुने सर्वाएतामहाभागास्तारयंतिनसंशयइति आदित्यपुराणे
सहस्रंयोगवांदद्यात्कपिलांत्वेकएवहि सममेवपुराप्राहब्रह्माब्रह्मविदांवरइति त
थाशुक्लशृंगींरौप्यखुरांसवस्त्रांकांस्यदोहिनी सवत्सांकपिलांदत्वाचंद्रान्स्वप्नसं
प्रसमुद्धरेत् यावंतिचास्यारोमाणिसवत्सायांभवंतिहि सुरभिलोकमासाद्यरमं ४३

तितावतींसमाइति महाभारते समानवत्सांकपिलांधेनुंदद्यात्पयस्विनीं सुव्रतांवस्त्र
संवीतांब्रह्मलोकेमहीयतेइति अथकपिलादानप्रयोगः पुण्यकालेकृतनित्यक्रियो
द्येत्यादिः ममगोसहस्रफलप्राप्तयेवत्सगोरोमसमसंख्याकामधेनुलोकनिवासकामः
इमांकपिलांसुवर्णशृंगींरौप्यखुरांताम्रपृष्ठींकांस्यदोहांघंटाभरणांसोपस्करांगोत्रा
यशर्मणेब्राह्मणायतुभ्यमहंसंप्रददेनममेतिदद्यात् मंत्रस्तुमात्स्ये कपिलेसर्वदेवा
नांपूजनीयासुरोहिणी तीर्थदेवमयीयस्मादतःशांतिंप्रयच्छमे इतिमंत्रेणप्रदक्षि
णीकुर्यात् ततःसुवर्णदक्षिणांदद्यात् उक्तोपस्करकपिलादानफलंमात्स्ये वस्त्रंच
तुर्गुणंप्रोक्तंदक्षिणांचचतुर्गुणं एतैरलंकृतांधेनुंघंटाभरणभूषितां कपिलांविप्रमु
ख्यायदत्वामोक्षमवाप्नुयात्इति द्विगुणोदक्षिणेपेतामहतींकपिलास्मृता उपस्कराः

सुवर्णवस्त्रं शृंगवस्त्रारोहनपात्राद्याः सामान्यगोदाने वक्ष्यमाणाः दत्ता सा विप्रमुख्या
य स्वर्गमोक्षफलप्रदा सप्तजन्मकृतात्पापान्मुच्यते दत्तसंयुता यान्यान्प्रार्थयते का
मान् तांस्तान्प्राप्नोति मानवः इति महाकपिलादानप्रयोगः अद्येत्यादि॰ मममम
त्तजन्मप्रकृतपापनाशपूर्वकं पुत्रपौत्रादिसुखस्वर्गमोक्षकामो वा विष्णुप्रीतिकामो
वा यथाकामं फलमुद्दिश्य गोत्राय शर्मणे सालंकृतां यद्दमां महाकपिलां द्विगुणोपस्करो
पेतां रुद्रदेवत्यां तुभ्यमहं संप्रददे न मम इति दद्यात् ततः सुवर्णदक्षिणां दद्यात् समापये
त् मंत्रस्तु पूर्वमेवोक्ताः इति महाकपिलादानप्रयोगः अथ दशमहादानानि अथ दश
धेनुदानानि यास्तु पापविनाशिन्यः कथिता दश धेनवः तासां स्वरूपं वक्ष्यामि नामानी
च नराधिपः प्रथमा गुडधेनुः स्यात् घृतधेनुस्तथापरा तिलधेनुस्तृतीया तु चतुर्थी जल

धेनुका क्षीरधेनुस्तु विख्याता मधुधेनुस्तथापराः सप्तमी शर्कराधेनुर्दधिधेनुस्त
थाष्टमी रसधेनुस्तु नवमी दशमी स्यात्स्वरूपतः कुंभान् द्रवादिधेनूनां इतरासां तु रा
शयः सुवर्णधेनुस्तिलधेनुरत्र केचिच्छंति मानवाः नवनीततिलतैलेन तथान्येपि मह
र्षयः रसधेनुस्तिलधेनुर्वा योजयेत् एतद्विधानमपि मात्स्ये कृष्णाजिनं चतुर्हस्तं
प्राग्ग्रीवं विन्यसेद्भुवि गोमयेनोपलिप्तायां दर्भानास्तीर्य सर्वतः लघ्वेणकाजिनं
न तद्वत् वत्सस्य परिकल्पयेत् लघुकृष्णाजिनं प्राङ्मुखीं कल्पयेद्धेनुमुदक्पादां सवत्सकां
प्राक्शिरसां सवत्सां उत्तरभागस्थितवत्ससहितां उत्तमा गुडधेनुः स्यात् सदा भारचतु
ष्टयी वत्सभारेण कुर्वीत भाराभ्यां मध्यमा स्मृता अर्द्धभागेन वत्सः स्यात्कनिष्ठा भारके
ण तु चतुर्थांशेन वत्सः स्यात् गृहवित्तानुसारतः तुलापलशतं प्राहुर्भारस्यार्द्धं शाति

दा॰चं॰ तुलेति तुलास्त्रियां पलशतं भारः स्याद्विंशतिस्तुलाः इत्यमरः भारपलसहस्रात्मको वान
८५ वतीस्कन्धे हेमाद्रौ परिभाषायां धेनुवत्सौ घृतस्यैतौ सितसूक्ष्मांबरावृतौ शुक्तिकर्णा
विक्षुपादौ शुचिमुक्ताफलेक्षणौ सितसूत्रशिरालौ तौ सितकंबलकंबलौ ताम्रगुड
पृष्ठौ तौ सितचामररोमकौ ककुत्सदेवोगुडकः विद्रुमभ्रूयुगोपेतौ नवनीतस्त
नान्वितौ क्षौमपुच्छौ कांस्यदोहौ इंद्रनीलकतारकौ सुवर्णशृंगाभरणौ राजतखु
रसंयुतौ नानाफलमयैर्दंतैर्घ्राणरंध्रकरावुभौ गंधकरंडकपूरादिपात्रविरोघ्राः
एवं रचित्वा धूपदीपादिभिरभ्यर्चयेत् वस्त्रमुक्तादीनि भारतो मानाधिक्ये फलाधि
क्यं अथास्य प्रयोगः यजमानः कृतनित्यक्रियः पुण्यकाले शुचिर्देशे इत्यादि मम स
मस्त पापक्षयद्वारा श्री परमेश्वर प्रीत्यर्थं गुडधेन्वादि दानं करिष्य इति संकल्प्य विप्रं ८५

वस्त्राभरणादिभिः संपूज्य प्रदक्षिणीकृत्य सर्वपापक्षयकाम इमामुकधेनुं गोत्राय शर्म
णे ब्राह्मणाय सुपूजिताय तुभ्यमहं संप्रददे न मम इति तिलहस्ते सकुशतिलजलगोपुच्छं
दद्यात् विप्रस्तु देवस्य त्वेति प्रतिगृह्य स्वस्तीत्युक्त्वा यथाशाखं कामस्तुतिं पठेत् त
तः सुवर्णदक्षिणां दद्यात् प्रार्थनामंत्रास्तु या लक्ष्मीः सर्वभूतानां या च देवेष्ववस्थिता ॥
धेनुरूपेण सा देवी मम पापं व्यपोहतु विष्णुवक्षसि या लक्ष्मीः स्वाहा या च विभावसौ
दा॰च॰ चंद्रार्कशक्रशक्तिर्या सा धेनुर्वरदास्तु मे स्वधा त्वं पितृमुख्यानां स्वाहा यज्ञभुजां तथा सर्व
पापहरा धेनुस्तस्माच्छांतिं प्रयच्छ मे एवमामंत्रितां धेनुं ब्राह्मणाय निवेदयेत् एतदेव
विधानं सर्वधेनूनां प्रत्यक्षधेनुव्यतिरिक्तानामित्यर्थः नक्षत्ररचनायां स्वत्रानुपयोगा
त् ततो भूयसीं दक्षिणां दत्त्वा ब्राह्मणाय निवेदयेदिति एतदेव विधानं स्यात्तथा चोपस्क

दा॰चं॰ राःस्मृताः अयने विषुवे पुण्ये व्यतीपाते तथा पुनः गुडधेन्वादयः सर्वा उपरागादिपर्वसु।
४९ यथाश्रद्धं प्रदातव्यं भुक्तिमुक्तिफलप्रदमिति अथ द्रोणपरिमाणतिलधेनुरुक्ता तत्स
कालांतरं विष्णुधर्मोत्तरे अनुलिप्ते महीपृष्ठे वस्त्राजिनकुशावृते धेनुं तिलमयीं कृत्वा
सर्वरत्नैरलंकृतां धेनुं द्रोणेन कुर्वीत आढकेन तु वत्सकं स्वर्णशृंगीं रौप्यखुरां गंध
प्राणवतीं तथा कुर्याच्च शर्कराजिह्वां गुडास्यामाविकं वत्सलां इक्षुपादां ताम्रपृष्ठिं शु
चिमुक्ताफलेक्षणां प्रशस्तपत्रश्रवणां फलदंतमयीं शुभां शंखमुष्टिं कुर्वीत न
वनीतस्तनान्वितां ईदृक्संस्थानसंपन्नां कृत्वा श्रद्धासमन्वितः कांस्योपदोहनां
दद्यात्केशवः प्रीयतामिति इति कर्तव्यता मंत्रास्तु वह्निपुराणे तिलोऽसि पितृदैव
त्यो निर्मितोऽसि वेदगोसवः ब्रह्मणा तन्मयी धेनुं दत्ता प्रीणातु केशव इति मंत्रांतरमुक्तं ४९

प्रतिमा तिलधेन्वादिनी विक्रयाः उक्तं हेमाद्रौ ब्रह्मवैवर्ते दानकाले तु देवत्वं प्रति
मानां प्रकीर्तितं धेनूनामपि धेनुत्वं शुल्कं दानयोगतः दातुर्वै दानकाले तु धेनवः
परिकीर्तिताः विप्रस्य व्ययकाले तु द्रव्यं तदिति निश्चयः दानसंबंधि विप्रेण द्रव्य
मागच्छतो गृह्णं तत्सर्वं विदुषा त्येन कि यत्स्वेच्छया विभो कुटुंबभरणं कार्यं धर्मकार्यं
च सर्वशः अन्यथा नरकं यांति सेवमाद्दपितामहा इति इति तिलधेनुदानं अथ घृ
तधेनुदानं विष्णुधर्मोत्तरे तिलाभावे तथा दद्यात् घृतं तु प्रयतः नरः वासुदेवं जगन्ना
व थं घृतक्षीराभिषेचनं संपूज्य पुष्पैस्तु धूपैर्गंधदीपादिभिर्नरैः तत्रैव विधानमाह ग
व्यस्य सर्पिषः कुंभं पुष्पमालादिभूषितं कांस्यापिधानसंयुक्तं सितवस्त्रयुगेन च हि
रण्यसहितं तद्वन्मणिविद्रुममुक्तिकं अत्र पलसहस्रपरिमाणः कुंभः द्वादशाप

लाधिकं पंचशतपलाधिकं वा दृष्टपश्चिमया न्यायादानं कारयेद्रौप्यमयां तथा सौवर्णचा
क्षिणां कुर्यात् शृंगे चागुरुकाष्ठजे सप्तधान्यमये पार्श्वे पट्टोर्णे च तन च कंबले पट्टोर्णधौ
तकौशेयं कर्पूरं घ्राणे फलमयास्तनान् शर्करया जिह्वा गुडक्षीरमयं मुखं सौम पुच्छं रो
माणि सितसर्षपैः ताम्रपृष्ठि एतादृशीं कृत्वा विधिना संपूज्य तथा ब्राह्मणं यथाविभ
वं वस्त्रालंकारादिभिः संपूज्य दद्यात् विधिस्तु भागवतमंत्रात्मकोदे घृतं गावः प्रसूयं
ते घृतं भस्यां प्रतिष्ठितं घृतेमाश्विश्वदेवा स्यघृतं मे संप्रदीयतामिति दानफलमपि
तत्रैव घृतक्षीररसनाः पयोयत्र पापसकर्दमाः तेषु लोकेषु सर्वेषु पुण्येषु पजायते
सकामानामियं सृष्टिः कथिता नृपसत्तमः सृष्टिफलं विष्णुलोकं नरा यांति निःका
माधेनुदाननरश्चेनि दक्षिणा तु हिरण्यमेवेति हेमाद्रिः स्वर्णप्रभृति शक्त्या चेत्युक्तं मदन

रत्ने इति घृतधेनुदानं अथ जलधेनुदानं स्कांदे जलकुंभं नरव्याघ्र सुवर्णरजतान्वितं
सुवर्णशृंगं रजतखुरान्वितमिति रत्नगर्भमशेषस्तु ग्राम्यैर्धान्यैः समन्वितं सितवस्त्र
युगच्छिन्नां दूर्वापल्लवशोभितां कुष्ठमांसीमुरोशीरवालकामलकैर्युतां प्रियंगुपत्रस
हितां सितयज्ञोपवीतिनं सच्छत्रं सदुपानत्कं दर्भविष्टरसंस्थितं चतुर्भिः संभृतं भप
तिलपात्रैश्चतुर्दिशं स्थगितं दधिपात्रेण घृतक्षौद्रवतामुखे तिलपात्राणि तान्यम
यानि दधिपात्रं कांस्यमयं उपोषितं वासुदेवं जलेशायमभ्यर्च्य संकल्प्य जलधेनुं विप्रं च
वस्त्रालंकारादिभिः संपूज्य सवत्सां जलधेनुं गुडधेनुं च दद्यात् ततो या लक्ष्मीरित्यादि
पूर्वोक्तमंत्रैः संप्रार्थयेत् इति जलधेनुः अथ क्षीरधेनुदानं स्कांदे क्षीरधेनुं प्रवक्ष्या
मि तां निबोध नराधिप अनुलिप्ते महीपृष्ठे गोमयेन नराधिप गोचर्ममात्रमानेन कुशा

दा॰चं॰ नाम्नीयमर्चनं तस्योपरि मद्राराजन्यसेत्कृष्णाजिने ततः तत्र गोमयेन कुंडलिकायां
४८ कृत्वा क्षीरकुंभं न्यस्थाप्य चतुर्थांशेन वत्सकं शृंगाणि चंदनागरुकानि प्रशस्तपत्र
श्रवणां तिलपात्रोपरि स्थिता मुखं गुडमयं देहमेवा जिह्वा शर्करया फलैः दंताः मुक्ताफ
लेक्षणा इक्षुपादा दर्भरोमा सितकंबलकंबला एतां दृशां सवत्सामभ्यर्च्य द्विजं चव
स्त्रालंकारादिभिः संपूज्य॰ अद्येत्यादि॰ गोत्राय शर्मणे ब्राह्मणाय सालंकृताय इमां
क्षीरधेनुं पूर्वोक्तसोपस्करयुतां समस्तपापक्षयकामस्तुभ्यमहं संप्रददे न मम इति
वदेत् देवस्यत्वा स्वस्ति कृत्वा यथाशाखं कामस्तुतिं पठेत् ततो यलक्ष्मीरित्यादि
मंत्रैः प्रार्थयेत् इति क्षीरधेनुदानं अथ मधुधेनुदानं स्कांदे मधुधेनुं प्रवक्ष्यामि स
र्वपापप्रणाशिनीं अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्तरे धेनुं मधुमयीं कृत्वा संप ४८

र्णां घृतं पूरितां तद्वच्चतुर्थभागेन मधुमवत्सां परिकल्पयेत् धेनुं द्विजं च पूर्ववदभ्यर्च्य
अद्येत्यादि॰ गोत्राय शर्मणे सालंकृताय सौवर्णमुखीं अगरुचंदनशृंगीं ताम्रपृष्ठीं स
त्पुछां इक्षुपादां सितकंबलां गुडमुखीं शर्कराजिह्वां मौक्तिकनेत्रां फलदंतां दर्भरोमां
प्रशस्तपत्रश्रवणां नवनीतस्तनीं सप्तधान्योपेतां ततश्चत्वारि पात्राणि चतुर्दिक्षु
विन्यसेत् वस्त्रयुग्मेनाछाद्य घंटाभरणभूषितां कांस्यदोहिनीं सुपूजितां पुच्छदे
शोपविष्टायं मधुवाता ऋतायत इति मंत्रमुक्त्वा इमां मधुधेनुं सर्वपापक्षयकामस्तु
भ्यमहं संप्रददे न मम इति ततः सुवर्णं दक्षिणां दत्वा यालक्ष्मीरित्यादि पूर्वोक्तमंत्रैः प्रा
र्थयेत् इति मधुधेनुदानं अथ शर्कराधेनुदानं स्कांदे तत्र शर्कराधेनुं शृणु राजन्य
थार्पितः अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्तरे भारचतुष्टयपरिमिता तच्चतुर्थांशे

दा॰चं॰ वत्सः भारद्वयेअष्टमांशा इति सशर्करया वा कार्यो सर्वधान्यानि चतुर्दिक्षु संस्थाप्य अद्ये
४९ त्यादि॰ गोत्राय शर्मणे सालंकृताय इमां शर्कराधेनुं सुवर्णशृंगीं मौक्तिकनयनां गुडमुखीं
पिष्टमयीजिह्वां कंबलपट्टसूत्रेण वेष्टितां कंठाभरणभूषितां इक्षुपादां रौप्यखुरां न
वनीतस्तनीं मंत्रताम्रवर्णश्रवणां सितचामरभूषितां पंचरत्नसमायुक्तां दर्भरोमां कां
स्योपदोहिनीं गंधपुष्पाद्यर्चितां मम सर्वपापक्षयकामस्तुभ्यमहं संप्रददे न मम इति द
द्यात् सुवर्णं दद्यात् ततो या लक्ष्मीरित्यादि मंत्रैः संप्रार्थ्य प्रसीदं दद्यात् विप्रमुखं
नेक्षेदिति पंचरत्नानि तत्परार्के कनकं हीरकं नीलं पद्मरागं च मौक्तिकं पंचरत्नमिदं
प्रोक्तं ऋषिभिः सर्वदर्शिभिरिति इति शर्कराधेनुदानं अथ दधिधेनुदानं स्कांदे तत्र
भूलेपनं कुशकृष्णाजिने आस्तीर्ण सप्तधान्योपरि दधिकुंभं संस्थाप्य चतुर्थांशेन व ४९

त्सं कृत्वा गोत्राय शर्मणे सालंकृताय सुवर्णमुखीं मन्त्रताम्रपत्रश्रवणां मुक्ताफलेक्षणां
चंदनागरुशृंगीं मुखे विशेषगंधद्रव्ययुक्तां शर्करयाकृतजिह्वां श्रीखंडेनकृतघ्राणां
फलमयदंतां सितकंबलछन्नां दर्भरोमां सूत्रमयपुच्छां रौप्यखुरीं वा नवनीतस्तननाम्री
सुपदां श्रीसर्वाभरणभूषितां वस्त्रयुग्मेन वेष्टितां गंधपुष्पाद्यर्चितां इमां दधिधेनुं सर्व
पापक्षयकामो दधिक्राव्णो इति मंत्रं पठित्वा तुभ्यमहं संप्रददे न मम इति दद्यात् गुण
दुधेनुं मंत्रेण वा दद्यात् ततः सुवर्णदक्षिणां दत्वा या लक्ष्मीरित्यादि मंत्रैः संप्रार्थयेदि
ति इति दधिधेनुं अथ रसधेनुदानं स्कांदे रसधेनुं महाराज कथयामि समासतः अनुलि
प्तमहीपृष्ठे कृष्णाजिनकुशोत्तरे इक्षुरसस्य घटं पूरयित्वा तच्चतुर्थांशेन वत्सं संपा
द्य अद्येत्यादि॰ गोत्राय शर्मणे सालंकृताय इमां सुवर्णशृंगाभरणसंयुतां रौप्यखुरां व

दा·चं· स्वर्णपुच्छां रक्तपादां पुष्पकंबलां ताम्रपृष्ठीं पुष्परोमां ब्रीहियुतां चतुर्दिक्षु दीपसमायुक्तां
सर्वगंधविभूषितां पूर्वादिदिक्षु तिलपात्रचतुष्टययुतां सुपूजितां सर्वपापक्षयपूर्वकं
एकविंशतिकुलोद्धरणकामस्तुभ्यमहं संप्रददे न मम इति सुवर्णदक्षिणां दद्यात् मंत्र
स्तु गौः धेनु उक्ता एवं ज्ञा चोपस्कारा श्वा एवमुच्चार्य पित्वा तु दीयते वै द्विजन्मने दशापू
र्वान्परांश्चैव आत्मानं चैकविंशतिरिति इति निरूपयेत् तुदानं अपस्वरूपतो गोदानं
अंगिराः गोरेकस्यैव दातव्या श्रोणि पापकुटुंबिने सा हि तारयते पूर्वान् सप्त सप्त च
सप्ततेति देवलः सुशीलां लक्षणवतीं युवतीं क्षमवत्ससंमितां बहुदुग्धवतीं स्नि
ग्धां धेनुं दद्याद्विचक्षणे इति गोदानप्रयोगः कृतनित्यक्रियः पुण्यकाले अद्येत्यादि
यथाशक्ति यथाज्ञानं गोदानमहं करिष्य इति संकल्प्य सवत्सां धेनुं च द्विजं च यथावि ५०

भववस्त्रालंकारादिभिः संपूज्य शृंगीमूलादिस्तनांतस्थानेषु देवताः पूजयेत् त
द्यथा शृंगमूले ब्रह्माविष्णुभ्यो नमः ब्रह्मविष्णू पूजयामि शृंगाग्रे सर्वतीर्थेभ्यो नमः
सर्वतीर्थं पूजयामि शिरोमध्ये शिवाय नमः शिवं पू० ललाटे देव्यै० देवीं पू० नासिका
याप रांमुखाय षण्मुखं पू० नासापुटयोः कंबलाश्वतराभ्यां० कंबलाश्वतरौ पू० कर्णयोः अ
श्विभ्यां अश्विनौ पू० चक्षुषोः शशिभास्कराभ्यां० शशिभास्करौ पू० दंतेषु वायवे० वायुं पू०
जिह्वायां वरुणाय० वरुणं पू० हुंकारे सरस्वत्यै० सरस्वतीं पू० गंडयोः पक्षमासाभ्यां० पक्ष
मासौ पू० ओष्ठयोः संध्याभ्यां० उभे संध्ये पू० ग्रीवायां इंद्राय० इंद्रं पू० कुक्षिदेशे रक्षो
भ्यो रक्षांसि पू० असिसाध्येभ्यो संध्यान् पू० पादेषु धर्माय० धर्मं पू० जंघासु अधर्मा
य० अधर्मं पू० खुरमध्ये गंधर्वेभ्यो० गंधर्वान् पू० खुराग्रे पन्नगेभ्यो० पन्नगान् पू० खु

दा॰चं॰ राणां पश्चिमभागे अप्सरोभ्यो॰ अप्सरसः प्र॰ ईशानकोणे रुद्रेभ्यो॰ एकादशरुद्रान् प्र॰ सर्वसंधिषु वसु
भ्यो॰ वसून् प्र॰ नपाम्भिश्रोणितटे पितृभ्यो॰ पितृन् प्रजया॰ लांगूले सोमाय॰ सोमं प्र॰ आदित्यर
५१ श्मिभ्यो॰ आदित्यरश्मीन् प्र॰ गोमूत्रे गंगायै॰ गंगां प्र॰ गोमये यमुनायै॰ यमुनां प्र॰ क्षीरे सरस्वत्यै॰
सरस्वतीं प्र॰ दधिनि नर्मदायै॰ नर्मदां प्र॰ घृते अग्नये॰ अग्निं प्र॰ रोमसु अष्टाविंशतिदेवकोटि
८ भ्यो॰ अष्टाविंशतिदेवकोटीः प्र॰ उत्तरे पृथिव्यै॰ पृथिवीं प्र॰ पयोधरेषु समुद्रेभ्यो॰ समुद्रान् प्र॰
एता देवता अंगेषु संपूज्य॰ अद्येत्यादि॰ गोत्राय शर्मणे सुपूजिताय पृथ्वीदानसमफलका
मः सर्वपापक्षयकामो विष्णुप्रीतिकामो वा इमां प्रत्यक्षधेनुं सुवर्णशृंगीं रौप्यखुरां ताम्र
पृष्ठीं घंटाग्रैवेयभूषितां मुक्तालांगूलां कांस्योपदोहनीं सितवस्त्रप्रच्छादितां सर्वाभरण
भूषितां सोपस्करां रुद्रदैवतां तुभ्यमहं संप्रददे न मम इति तिलपात्रे घृतोत्कं गोपुच्छं कृत्वा चि ५१

प्रदत्ते सतिलकुशोदकं दद्यात् मंत्रास्तु यज्ञसाधनभूता या विश्वस्यान्नप्रदायिनी विश्व
रूपधरो देवो प्रीयतामनया गवा ततो दानप्रतिष्ठासिद्ध्यर्थं सुवर्णदक्षिणां दत्वा प्रार्थये
त् नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो न
मः॰ गावो ममाग्रतः संतु गावो मे संतु पृष्ठतः गावो मे हृदये संतु गवां मध्ये वसाम्यहमिति
पठित्वा धेनुं द्विजं च प्रदक्षिणीकृत्य किंचिदनुव्रजेदिति इति गोदानप्रयोगः अथ धेनु
तद्वर्णादिगोदानफलमुक्तं पाद्मे श्वेता सुखप्रदा प्रोक्ता चंद्रलोकप्रदायिनी कृष्णा स्वर्गप्रदा प्रो
क्ता गौरी स्यात्कुलवर्द्धिनी रक्ता रूपप्रदा प्रोक्ता पीता दारिद्र्यनाशिनी पुत्रप्रदा कृष्णसारा नीला
धर्मविवर्द्धिनी कपिला सर्वपापघ्नी नानावर्णा च मोक्षदेति समानवर्णा तो वत्सदानफलं
भारते रोहिणी तुल्यवर्णां तुल्यवत्सां च पयस्विनीं प्रदत्वा वत्ससंवीतां सर्वलोके महीयते स

दा॰चं॰ मानवत्सांधवलां धेनुं दद्यात्पयस्विनीं सुव्रतां वस्त्रसंवीतां स अग्निलोके महीयते वातरेणुस
५२ वर्णां तु सवत्सां कांस्यदोहिनीं प्रदद्याद्वस्त्रसंवीतां वायुलोके महीयते समानवत्सां धूम्रां तु
धेनुं दद्यात्पयस्विनीं धूम्रवस्त्रसमायुक्तां यमलोके महीयते अपां समानवर्णां तु सवत्सां
कांस्यदोहिनीं प्रदद्याद्वस्त्रसंवीतां वरुणं लोकमश्नुते हिरण्यवर्णां पिंगाक्षीं सवत्सां प्रद
द्याद्वस्त्रसंवीतां कौबेरं लोकमाप्नुयात् पलालधूम्रवर्णां तु सवत्सां प्रदद्याद्वस्त्रसंयुक्तां
पितृलोके॰ सवत्सां पीवरां दत्त्वा त्रिंशति कंठमलंकृतां विश्वेदेवमसंचारस्थाने अवस्थाप
यते समानवत्सां गौरीं तु धेनुं॰ सवत्सां कांस्यदोहां तु वसूनां लोकमाप्नुयात् वत्सोपपन्ना
नीलांगीं सर्वरत्नसमन्वितां गंधर्वाप्सरसो लोको दत्त्वा माप्नोति मानवद्रति संकल्पेनु तत
लिंगं संकीर्त्य दद्यात् इति समानवर्णगोवत्सदानफलं अथ कृष्णधेनुदानं मात्स्ये अद्ये ५२

त्यादि संकल्पादिकं पूर्ववत् मंत्रास्तु कृष्णधेनो नमस्तुभ्यं त्वं च विष्णुशिवात्मके त्रिजं
न्मार्जितपापानि भ्रूवं दानात्सु नाशयेदिति अथ हेमशृंगीदानं मात्स्ये दशसौवर्णके शृंगे
खुराः पंचपलान्विताः पंचाशत्पलिकां कांस्यं ताम्रं चापि तथैव च वस्त्रं च त्रिगुणं धेन्वा द
क्षिणा चतुर्गुणमिति एवं विधिवद्दातुः फलमुक्तं नंदिपुराणे विधिना तु यथा दत्त्वा पात्रे धे
नुः सदक्षिणा दातारं तारयत्येजंतं त्रकुलानामयुतं शतमिति महाभारते प्रासादापचसौव
र्णाः शय्यारत्नोज्वलास्तथा वराश्चाप्सरसो यत्र तत्र गच्छंति गोप्रदा इति तथा यावंति रोमा
णि भवंति धेन्वास्तावंति वर्षाणि महीयते सः स्वर्गाच्युतश्चापि ततो त्रिलोके कुले समुत्पद्य
ति गोमतां सः तथा सालंकृतां सवत्सां च धेनुं संप्रयच्छन्ति ये सरत्नपूर्णां पृथिवीं ते नरदत्त्वा
न संशयः इति हेमशृंगीदानं इति स्वरूपतो गोदाननिरूपणं अथ कार्पासधेनुदानं मात्स्ये

दान॰ अतः परं प्रवक्ष्यामि धेनुं कार्पाससंज्ञिकां शुचिः सर्वं विश्वस्य गुप्त्यर्थं ब्राह्मणः स्वांगकैः कृतं सां च कार्या
५३ सभारेण श्रेष्ठा धेनुः प्रकीर्तिताः मध्या मायर्द्धेन तदर्द्धेन कनीयसी पूर्ववद्दक्षधान्यं च
हिरण्यं च तथैव च वत्सकं तु चतुर्थांशादानमाचेन्निधीयते कुर्वीत पूर्ववद्दक्षधान्यादुप
स्कृतं भुवि ततो धाराहोक तिलधेनुदानवत् क्रियाकलापादिसंकल्पादारम्भदानांतं कृत्वा
प्रार्थयेत् मंत्रस्तु हेमकुंदेंदुसदृशोक्षीरार्णवसमुद्भवे सोमप्रियेसुधन्याख्येसौरभेयी न
मोस्तु ते दत्तेयमिंदुनाथाय ब्राह्मणाय कस्मायच अत्रिनेत्रप्रजाताय सोमराजाय चेन्न
मः यस्त्वेवं परया भक्त्या ब्राह्मणाय प्रयच्छति सयाति चंद्रलोकं वै सोमेन सह मोदत इति
इति कार्पासधेनुदानं अथ लवणधेनुदानं भविष्ये तत्र युधिष्ठिरं प्रति कृष्ण शृणु
राजन्प्रवक्ष्यामि लवणस्य प्रकल्पितां गोमयेनानुलिप्ते तु दर्भसंस्तरसंस्थितां आविके ५३

चर्म विन्यस्य पूर्वां प्रागभिमुखं संस्थितां वस्त्रेणाच्छादितं कृत्वा धेनुं कुर्वीत भक्तिमान् आ
ढकेनैव कुर्वीत बहुवित्तोपकल्पितां गां विप्रं च यथाविभवं वस्त्रालंकारादिभिः संपूज्य
अद्येत्यादि॰ गोत्राय शर्मणे सुपूजिताय इमां लवणधेनुं फलवत्सनीं सिंधुभुक्तिकरणीं स
तु पिंडकपोलां प्रवाल्यांकं वल्पदस्त्र गौरेयकांता प्रष्टश्रीं गुडपानांकं बल्ललांगूलांम
धुयोनिकां सर्वाभरणभूषितां सर्वपापक्षयकामो विष्णुप्रीतिकामो वा तुभ्यमहं संप्रददे
न मम मे त्रि पुत्रभार्यादियुतः प्रदक्षिणीकृत्य दद्यात् शेषं मधुधेनुदानवत् मंत्रास्तु लवणे
वै रसाः सर्वे तिष्ठंति सर्वदेवताः सर्वदेवमयी देवी लवणाख्ये नमोस्तु ते इति पुराणांत
रे षोडशप्रस्थमितां चतुर्थांशेन वत्स इति उक्तं लवणधेनुदानं अथ सुवर्णधेनुदा
नं वन्हिपुराणे सुवर्णधेनुश्चाप्यत्र सुवर्णश्चतुर्दश मुनिर्षिश्च सुवर्णैश्च सत्तभिर्मध्य

दा०चं० मामता चतुर्भिश्चकनीयास्याच्चतुर्थांशेन वत्सक गुडधेनुविधानेन दत्त्वा सर्वफलमश्ना
५४ अत्रविद्वत्परोप्येण वत्सइति केचित् तथा अद्येत्यादि० प्रबलश्रृंगीघृतपात्रस्तनवतीं पय
रोमांकर्परागरुनासिकांमिष्टान्नरसवासितांरोरवश्रृंगोत्तरांभुक्तिललाटस्थांनारिकेल
श्रवणांगुडजानुकांपंचगव्यापानवतींकांस्यपृष्ठांपट्टसूत्रलांगूलांसप्तधान्यसमा
युक्तांफलपुष्पोपेतांछत्रोपानत्समन्वितांसुवर्णधेनुंरुद्रदैवत्यांसवत्सामेधफलवा
प्तिकामः कुलसहस्रस्यस्वर्गेनिवासकामश्चगोत्रायशर्मणेसुपूजितायतुभ्यमहंसंप्र
ददेनममेतिदद्यात् मंत्रास्तु सुवर्णधेनुंविप्रायप्रतिपाद्यह्रींनरः हिरण्यरेतापुरु
षः पुराणः कृष्णपिंगलः सप्तहेमछविःस्रष्टाविश्वात्माप्रियतांममेति अनेनैवतुम
त्रेणधेनुदानंप्रकीर्तितं अश्वमेधसहस्रस्यफलमाप्नोत्यसंशयः कुलानांचसहस्र ५४

ध्या

स्यस्वर्गेनयतिगोप्रदइति इतिसुवर्णधेनुदानं अथवंध्यात्वहरंसुवर्णधेनुदानं वा
युपुराणे वंध्यातुचतुर्विधोक्ता वंध्याकाकवंध्यास्त्रीप्रसूतामृतप्रजाइति काकवंध्या
पत्याशेषास्त्वष्टाएव धनरूपविशेषमाह कर्मविपाकेहिरण्येनयथाशक्त्यासवत्सांका
रयेद्दृढांधेनुपलनवंतस्यपादेनविधिरब्रवीत् रौप्यखुरांरत्नपुच्छेनियोज्यंघंटामुभयो
रपिगलेवध्वारत्नमयंतिलकंललाटेचभीयात् एतांदृष्ट्वासमभ्यर्च्यपायसेनैवखंडखेल्ला ८
मोदकान्अपूपानगुडलवणजीरकंसुवर्णदक्षिणांचचकंघृतरूपेनिधायएकंपायन
कंधेनवेअन्यानिपतिपुत्रवतीभ्योब्राह्मणस्त्रीभ्यःषड्विंशोवादद्यात् ततःवेदपारगम
मलोलुपंब्राह्मणंरिणग्रस्तंदरिद्रंकुटुंबिनमाहूयस्वकुलायथाविभवंवस्त्रालंकारादि
भिःसंपूज्यततोधेनुंसवत्सांसंपूज्यअग्निमुपसमाधायसमिदाज्यचरुद्रव्यैःसोमोधे

दा॰चं॰ नुमितिमंत्रेणैसेकमष्टोत्तरशतंसंरक्ष्ययाहुत्वास्वयमुदङ्मुखप्राङ्मुखायोपविष्टाय
५५ गोपुच्छंतद्धस्तेनिधायदद्यात् अद्येत्यादि॰गोत्रायशर्मणेसंपूजितायद्वमांसालंकृतांसु
वर्णधेनुंसवत्सांरौप्यखुरांरत्नपुच्छांघंटापुतकंठांरत्नतिलकांचायनोपेतांवस्त्रयुगछ
न्नांमुक्तालांगूलांममजीवत्ससंतानप्रतिरोधकीभूतसकलदुरितनिरासपूर्वकआ
युष्मत्सुपुत्रावाप्तिकामोवंध्यात्वहरामिमांसुवर्णधेनुंयथाशक्तिसोपस्करांरुद्रदैव
त्यांतुभ्यमहंसंप्रददेनममेतिसकुशतिलोदकंदद्यात् मंत्रास्तु यपवीयेधनुर्यागीरसः
सत्रेवसिष्टसुरभिस्तथा दुहिताचतथाभानोरग्नेश्चवरुणस्यच याश्चगावःप्रवर्ततेव
नेषुपवनेषुच प्रीणंतुमताःसर्वापुत्रपौत्रप्रवर्द्धिनीं प्रयच्छंतुदिवारात्रंममविछेदंचसंत
तेः देवस्यत्वासवितुःस्कृत्वायथाशास्त्रंक्रमस्तुतिंपठेत् ततःसुवर्णदक्षिणांदत्त्वा ५५

दत्वाप्रार्थयेत् मंत्रास्तु वंध्यात्वंकाकवंध्यात्वंकन्याप्रसवएवच तथैवमृतवंध्यात्वंदोषंमम
चतुर्विधं दानेनानेनहरतुयासाकामदुघाममेतिगांप्रार्थयित्वाप्रदक्षिणीकृत्यविसृज्यभू
यसींदक्षिणांदत्वायथाशक्तिब्राह्मणान्भोजयित्वाजीवत्वसंतानावाप्तिरस्त्विनितान्सं
प्रार्थ्यजीवत्संसंतानावाप्तिरस्त्विनितेब्रूयुः ततःसुहृद्युतोभुंजीतेति इतिवंध्यात्वहरसु
वर्णधेनुदाने अथमृतवंध्यानिवारणविधानं मात्स्ये यःकम्पशृंगींरौप्यखुरांमुक्तालांगूलभूपि तां
कांस्योपदोहनांराजन्सवत्सांद्विजपुंगवे प्रयच्छमानोयोदद्याद्धेनुंद्रविणसंयुतां तावद्वत्
सोयोनिगर्भेयावद्दर्भंनमुंचति तावद्द्वाश्पृथिवीज्ञेयासशैलवनकानना देवलः अलंकृत्य
उक्तविधिनासुवर्णत्रिपलान्विता देयाचद्विपलामध्यमापलैकादक्षिणाधमा चरादे
तुसुवर्णसाहस्रेनदद्यार्द्धंसुत्स्मयुक्तंसुवर्णस्यतदर्धेनतदर्द्धेनचायुनः तस्मार्द्धंतुशतं

दा० चं० वापि पंचाशान्नवतोर्द्धकं यथाशक्त्यापि दातव्या वित्तशाठ्यं विवर्जितेति हेमाद्रौ उभयतोमुखीं
५६ स्वर्णनिष्केण दत्वा सद्यः शुद्धे सात्मकेभ्यश्वमस्त्र इति सुवर्णनिष्कदक्षिणायुते नापि दद्यादि
त्यर्थः अत्र निष्कश्चत्वारिंशन्माषक एव ग्राह्यः अशक्तो विंशतिमाषकोवा अथ दानमंत्रो
गः शुचिरद्येत्यादि० उभयतोमुखीदानं च कर्तुं गोत्रस्य प्रजां करिष्य इति संकल्प्य द्विजं कुटुंबि
नं दरिद्रं वेदपारगं सच्छीलं दत्वा यथाविभवं वस्त्रालंकारादिभिः संपूज्य गामपि संपूज्य ॥
ॐ त्वं महीमवनीं विश्वधेनां तुचतवे वयाय रक्षंति अरमयो नमसेजदर्णः सुतरणा अकृ
णोरिंद्रसिंधवनिति गामनुमंत्र्य प्रदक्षिणीकृत्य अद्येत्यादि० गोत्रायशर्मणे अमुकशा
खाध्यायिने इमां धेनुं सवत्सकामुभयतोमुखीं ससमुद्रसशैलवनोपेतपृथ्वीदानसमफ
लवाप्तये धेनुवत्सरोमसंख्यायुगदेवलोकगमनपितृपितामहप्रपितामहकुलशत ५६

नरकोत्तारणपूर्वकघृतक्षीरवहवदकुल्या कुदधिपायसकर्दमे दन्ताधिकरणकेक्षितकामो
रुद्रदेवत्याममां तुभ्यमहं संप्रददे न मम इति दद्यात् सघृततिलपूर्णकांस्यपात्रयुतगोपुच्छं त
द्धस्ते जलकुशान्दत्वा प्रार्थयेत् मंत्रास्तु इमां प्रदाणोभयमुखीं भवान् ममास्तु वै मम
वंशविशुद्धश्च सदा स्वस्तिकरो भवेति विप्रो देवस्य त्वेति प्रतिगृह्य स्वस्तीत्युक्त्वा यथाशा
खं कामस्तुतिं पठेत् ततः सुवर्णमारभ्य पंचविंशति चतुर्द्दिं सुवर्णमितां दद्यात् तलोन
न्नमिति ततो विप्रास्तु इरावती धेनुमती हि भूतं सूयवसिनी मनवे दशस्या व्यस्कभ्ना
रोदसी विष्णवे ते दाधर्थ्य पृथिवीमभितो मयूखैः १ स्योना पृथिवी नो भवान्नृक्षरा निवेश
नी यच्छानः शर्म सप्रथः २ इति मंत्रद्वयं पठित्वा वदेत् प्रतिगृह्य मीमां धेनुं कुटुंबा
येविशेषतः स्वस्तिर्भवतु मे नित्यं रुद्रमातर्नमोस्तु ते इति नत्वा गृहीतायां दक्षिणेन

श्रा॰ चं॰ पाणिनावत्समाकृष्य स्थापयेत ॐ गर्भेनुसंमचे षामवेददेवानांजनिमानिविश्व ज्ञांनमा॰
५७ पुरमायासीररक्षनयज्ञोनाजरासानिरसयमिमितिमंत्रेणगर्भमाकृष्येत निष्कासितेस
सतिरुत्स्यंतरमाह ततोयजमानः प्राणानायम्य अद्येत्यादि कृतस्याभयतोमुखीदान
कर्मणः सांगतासिध्यर्थंदे वादि मंत्रैस्तर्पणंहोमंचकरिष्ये इतिसंकल्प स्थंडिले अग्नावा
ध्यायअग्निंप्रतिष्ठाप्यान्वादध्यात् अस्मिन्नन्वाहिताग्नावित्यादि चक्षुषीआज्येनेत्यंतमु
क्त्वातचप्रधानेत्रिः पृथिवी द्यौः गौरींसकृदाज्येनप्रजापतिंचतुरग्नीत्याआज्येनशेषेण
स्विष्टकृतमित्यादिसद्योयक्ष्येइत्यंतमुक्त्वासमिधउपरिधायबर्हिषीसंनह्यपरिसमुह्यादि
चक्षुष्यंतंकृत्वाकुशास्ततभस्मोअग्नेः पश्चादेवसाक्षताभिः अद्भिर्वक्ष्यमाणैर्मंत्रैः देवादी
स्तर्पयेत् तेचमंत्राः येदेवासोदिव्येकादशस्थ पृथिव्यामध्येकादशस्थाअप्सुक्षितोमहि ५७

नैकादशस्थतेदेवासोयज्ञमिमंजुषध्वं ॐ देवांस्तर्पयामि १ ॐ उशंतस्त्वानिधिमह्यु
शंतःसमिधीमहि उशन्नुशतआवहपितॄन्हविषेअत्तवे पितॄंस्त॰ २ इमंमेगंगेयमु
नेसरस्वतीशुतुद्रिस्तोमंसचतापरुष्ण्या असिक्न्यामरुद्वृधेवितस्तयार्जीकीयेशृणुह्या
सुखामयाविधावति सरितस्तर्प॰ ३ अद्भिःसुतोमनिश्चनोप्रचोदयन रोदसीमातरा
शुचिः रोमाण्यव्यासमयाविधावतीमधोधारापिन्वमाना दिवेदिवे पर्वतांस्तर्प॰ ४॥
ॐ वनस्पतेशतवल्शोविरोहसहस्रवल्शाविवयंरुहेम यंत्वायमयंस्वधितिस्तेजमानःप्र
णिनायमहतेसौभगाय वनस्पतींस्त॰ ५ ॐ समुद्रज्येष्ठाःसलिलस्यमध्यात्पुनानायंत
निविशमानाः इंद्रायावज्रीवृषभोरराधताआपोदेवीरिहमामवंतु ॐ समुद्रांस्तर्प॰
६ अहिरिवभोगैःपर्येतिबाहुंज्यायाहेतिंपरिबाधमानः हस्तघ्नोविश्वावयुनानिविद्वा

दा॰चं॰ त्वमांत्वमांसंपरिपातुविश्वतः नागास्त॰ ७ ॐ मधुवाताऋतायतेमधुक्षरंतिसिंधवः माध्वीर्नः
५८ संत्वोषधीः॰ ॐ पृथीस्त॰ ८ इत्यभिमंत्र्यपयित्वाचतत्र आज्याहुतीर्जुहुयात् ॐ इलेद्यावापृथी
वीपूर्वचित्तयेअग्निंघर्मसरुचयामंनिश्ये यामिर्भरेकारुत्राममत्रापजिन्वपत्नीभिरुषत्र
तिभिरक्षिनागतंस्वाहा पृथिव्याइदंनमम १ ॐ महीद्यौःपृथिवीचनइमंयतंमिमिक्षतां
पिपृतांनोभरिमभिः स्वाहा पृथिव्याइदंनमम २ ॐ त्र्यीपृथीवहुलेंद्रेअंतेउपेद्रवम
नसायद्वतेअस्मिन्दधातेयेशुभगेसुमती द्यावारक्षतंपृथिवीनोअन्वात्स्वाहा पृथि
व्याइदंनमम ३ गौरिर्मिमायसलिलानितक्षत्येकपदीचभूषीसदस्त्राक्षरापरमेव्योम
न्त्स्वाहा॰ गौर्याइदं॰ ४ इतिचतस्र आज्याहुतीर्हुत्वाततः समस्तव्याहृतिभिश्चतुरान्नी
स्वाहुतीर्हुत्वाप्रजापतयइदंनममेतिसजेत् ततः स्विष्टकृदादिहोमतंत्रोषंसमाप्यभय ५८

सींदक्षिणांदत्वागामानुत्रज्यगोमतींविद्यांमरणभावसे गावोवामुपतिष्ठंतुहेमशृंगपः
पयोमुचः सुरभ्यः सौरभेयश्चसरितः सागरास्तथा १ गावः पत्रपाम्यदंहंनित्यंगावः पत्रपं
तुमांसदा गावोस्माकंचपंतानांसांयतोगावस्ततोवयं २ घृतक्षीरप्रदागावोघृतयोन्योघृ
तावहाः घृतनद्योघृतावर्तास्तामेसंतुसदागृहे घृतंमेहृदयंनित्यंघृतंनाभ्यांप्रतिष्ठितं
घृतंमेसर्वतश्चैवघृतमध्येवसाम्यहं ४ गावोमेऽग्रतसंतुगावोमेसंतुपृष्ठतः गावोमेहृ
दयेसंतुगवामध्येवसाम्यं ५ गावः सुरभयोनित्यंगावोगुग्गुलसन्निभाः गावः प्रतिष्ठाभू
तानांगावः स्वस्त्ययनंमहत् ६ अन्नमेवपुरंगावोदेवानांहविरुत्तमं पावनंसर्वभूतानांरक्षं
तिचवहंतिच ७ हविषामंत्रपूतेनतर्पयत्यमरान्दिवि॰ ऋषीणामपिहोत्राणांगावो
होमेप्रतिष्ठितां ८ सर्वेषामेवभूतानांगावः शरणमुत्तमं गावः पवित्रंपरमंगावोमंग

दा॰चं॰ दमुत्तमं ९ गावः सर्वस्य लोकस्य गावो धन्याः सनातनाः नमो गोभ्यः श्रीपतिभ्यः सौरभेयीभ्य
५९ एव च १० नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः पुनः प्रदक्षिणं कृत्वा धेनुं द्विज वरं
चतमिति ११ इति जपित्वा नमस्कृत्य विसृज्य पायसादिना सम्यक् द्वादश ब्राह्मणान्भो
जयित्वा तेभ्यो दक्षिणां दत्वा स्वस्त्ययनं वाचयित्वा सुहृद्युतो भुंजीतेति इति उभयतोमु
खीदानप्रयोगः अथ गोदानप्रसंगे वृषदानमथाभिधीयते तत्र स्कंदपुराणे उसाय
सत्यानि तृणं चरंतिति तदेवभ्यः सकलं वदंति नभारखिन्नाः प्रवदंति किंचिद्दोषे
जीवति जीवलोकः ब्रह्मपुराणे पुरा निर्मितवान् ब्रह्मा वृषभं धर्मरूपिणं श्वेतवर्णं चतुः
पादं सत्वैकगुणसंयुतं धारणाद्धर्म इत्याहुर्धर्मे विधृताः प्रजाः प्रजाधरत्वपंथमोध
मेमूर्तिर्वृषो यतः ततो वृषभदा[redacted]नेन दत्तं स्यात्स चराचरं कृत्वा तस्याश्वेतस्यं त्रैवस्त्रो ५९

पानहमुत्तमं वृषं संपूज्य पुष्पाद्यैर्वितताच्छादनेन नरः श्रद्धयानैव यो दद्यात् न तं मुंच
ति धर्मराट् सर्वभोगैः सुखैश्चैव दातारं योजयत्यसौ आदित्यपुराणे यो ददाति अनडु
हं सुशीलं साधुवाहिनं उभयोपार्श्वयोर्दद्यात् छत्रोपानहकंबलं शीलवेदांगसंपन्ने इष्टे
श्रोत्रिये द्विजे नरः पुष्ये वा जन्मनक्षत्रे अयने विषुवे षु च दत्वा तस्य अनड्वाहं तस्मिन्स्था
ने महामुने क्षुत्पिपासार्दितस्यापि अग्रतः प्रतिपद्यते महाभारते त्रिलिकं दमनड्वा
हं सर्वरत्नैरलंकृतं दत्वा प्रजापतेर्लोकान् विशोकः प्रतिपद्यते इति कं दमनड्वाहं मलं
बगलकंवकं तथा अनड्वाहं ब्राह्मणायाप्ये धुर्यं दत्वा युवानं बालनं विनीतं हलस्य
वोढारमनंतवीर्यं प्राप्नोति लोकान् दशधेनुदास्य स्कंदपुराणे निष्पेषसद्गुणोपेतमनड्वा
हं त्रिवाग्नये दशधेनुप्रदानस्य फलं शोभनमाप्नुयात् बृहस्पतिः वेदवृत्ताय स्याद्वृषभ

दा॰चं॰ प्रदानेवेदा चाग्निर्गोयुगस्य प्रदाने देवलः वृषयुग्मं च वृषं चापि दत्वा गत्वे स्वरालयं भुंक्ते मन्वंत
६० रं भोगान् द्विगुणान् युग्मलांगला अनड्वाहौ तु यो दद्याद्द्विजे सीरेण संयुतौ अलंकृत्य यथाश
क्त्या सुभाद्रौ स्म लक्षणौ सर्वपापविशुद्धात्मा सर्वकामसमन्वितः वर्षाणि वसते स्वर्गे
रोमसंख्याप्रमाणतः योददाति बलीवर्दं युक्तेन विधिना शुभं अंगं गोप्रदानात्साभुंक्ते दश मं
गुणं फलं महाभारते युवानमिंद्रियोपेतं शतेन सह यूथपं गवेंद्रं ब्राह्मणेंद्राय भूरिशृंग
मलंकृतं ऋषभं ये प्रयच्छंति श्रोत्रियाय परंतप ऐश्वर्यं तेभिजायंते जायमाना पुनः पुनः
शतेन स्त्रीगवीनामिति शेषः भूशृंगस्वर्णशृंगमयः शांतं धुरंधरं त्वाष्ट्रो पानह संयुतं दश
धेनुप्रदानाद्यत्फलं तत्समश्नुते भविष्योत्तरे युधिष्ठिर उवाच युष्मद्वाक्यामृतमिदं श्रु
तवानाहं जनार्दनः न तृप्तिमधिगच्छामि जातकौतुहलं हि मे गोपतिः किल गोविंद त्रिषु ६०

लोकेषु विश्रुतः गोवृषस्य प्रदानेन त्रैलोक्यमभिनंदति तन्मे वृषप्रदानस्य फलमेक
थयाच्युत श्रीकृष्ण उवाच वृषदानफलं दिव्यं शृणुष्व कथयामि ते पवित्रं पावनं
चैव सर्वदानोत्तमं तथा दशधेनुसमो नड्वान् एकश्चैव धुरंधरः दशधेनुप्रदानाद्धि वृष एको
विशिष्यते वृषभश्चापि पुष्टांगो ह्यरोगः पांडुनंदनः युवा भद्रः सुशीलश्च सर्वदोषवि
वर्जितः धुरंधरस्तापयति एक एव कुलं महत् त्राता भवति संसारे नात्र कार्या विचार
णात् अलंकृत्य वृषं शांतं पुण्येह्नि समुपस्थिते रौप्यलांगूलसंयुक्तं ब्राह्मणाय निवे
दयेत् मंत्रेणानेन राजेंद्र शृणुष्व वदतो मम धर्मस्त्वं वृषरूपेण जगदानंदकारक अ
ष्टमूर्तेरधिष्ठानमतः पाहि सनातन दत्वैवं दक्षिणायुक्तं प्रणिपत्य विसर्जयेत् सप्तज
न्मकृते पापं वाङ्मनःकायकर्मणा तत्सर्वं विलयं याति गोदानसुकृतेन वै यो नं वृष

भसंयुक्तं दीप्यमानं सुशोभितं आरुह्य कामगं दिव्यं स्वर्लोकमधिरोहति यावंति तस्य
रोमाणि वृषभस्य महीपते तावद्वर्षसहस्राणि गोलोके महीयते गोलोकात् च्यवती
र्णस्तु इहलोके द्विजो भवेत् सर्वपानीमहादेवसर्वब्राह्मणपूजितः भोजनस्थितेभोऽस्मै
दद्यात् कंधुरं च यच्छति येऽत्र वृषमंत्रोपगुणोपपन्नं दत्तेन यद्दद्याति गोदशकेन पुण्यं सम्यं भ
वंति भुचितानत्फलभागिनस्ते इति निरूपभदानविधि अथ मर्त्यगोदुग्धयनोमुखीमति
ग्रहप्रायश्चित्तं ममउभयतोमुखीमतिग्रहदोषपरिहारार्थं कृच्छ्रत्रयप्रायश्चित्तं
यथामत्याम्नायेन करिष्यइतिसंकल्प्य कृच्छ्रत्रयप्रायश्चित्तं इति उभयतोमुखीगोदान
निरूपनं अथ दशदानानि मत्स्यनरसिंहेनाग्नकृष्णः उक्त्वा सादीनि दानानि दशवक्ष्या
म्यतस्तु गोपतिलहिरण्याज्यं वासोधान्यं गुडानि च रूप्यं लवणमित्याहुर्दशदाना ६१

न्यानुक्रमात् एतानि दशदानानि नराणां मत्स्यजन्मनो कुर्यादभ्युदयार्थं च प्रेतेऽपि द्विपर
श्चेति हेमाद्रिः तत्रादौ गोदानं नैमित्तिके पर्वणि कृत्वा एवं मम समस्तपापक्षयार्थं इमां गां धे
नुं सवत्सां रुद्रदैवत्यां सवर्णदक्षिणायुतां गोत्राय शर्मणे सुपूजिताय तुभ्यमहं संप्रददे न
ममेति मंत्रस्तु यज्ञसाधनसंभूता विश्वस्याघप्रणाशिनी विश्वरूपधरो देवः प्रीयता
मनया गवा गवामंगेषु तिष्ठंति प्रार्थयेदपि इति गोदानं अथ भूमिदानं मात्स्ये निवर्त
नमिताभूर्देयादिग्राहस्तेन दंडेन त्रिंशद्दंडा निवर्तनमिति स्मरणात् दानान्यन्या
नि सर्वाणि कनकादीनी यानि च तानि भूमिप्रदानस्य कलां नार्हंति षोडशीमिति अ
घेत्यादि० गोत्राय शर्मणे सुपूजिताय षष्टिवर्षसहस्रपरिमितस्वर्गनिरासकामः स
र्वपापक्षयकामश्च इमां भूमिं बहुसस्यप्रदां विष्णुदैवत्यां तुभ्यमहं संप्रददे न मम इति

दा॰ चं॰ दद्यात् मंत्रस्तु सर्वेषामाश्रया भूमिर्वराहेण समुद्धृता अनंतसस्यफलदा अतः शांति
६२ प्रयच्छ मे यस्माद्देव निवीजानि काले चैव महीतले तस्मात् दाराच्च सकला मम संतु मनोर
थाइति इति भूमिदानं अथ तिलदानं तिलास्तु द्रोणात्रयमिता देया मणपंचकपरि
मिता भवंति अद्येत्यादि॰ गोत्राय शर्मणे इमे तिलाः सोमदेवताः विष्णुदेवता वा सर्वपा
पक्षयकामस्तुभ्यमहं संप्रददे न मम इति दद्यात् मंत्रस्तु महर्षेर्गोत्रसंभूताः काश्यप
रूपतिलाः स्मृताः तस्मादेषां प्रदानेन मम पापं व्यपोहतु इति तिलदानं अथ हिर
ण्यदानं तच्च निष्कत्रयमितं निष्कद्वादशमाषको निष्कः अद्येत्यादि॰ गोत्राय शर्मे
णे इदं हिरण्यं अग्निदैवतं समस्तपापक्षयकामस्तुभ्यमहं संप्रददे न मम इति दद्यात् मंत्र
स्तु हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे इति हि ६२

रण्यदानं अथाज्यदानं घृतं तुलामितं दद्यात् विंशतिसेटकमितं भवति अद्येत्यादि॰
गोत्राय शर्मणे इदमाज्यं विष्णुदैवतं समस्तपापक्षयकामस्तुभ्यमहं संप्रददे न मम इति
दद्यात् मंत्रस्तु कामधेनोः समुद्भूतं सर्वक्रतुषु संस्थितं देवानामाज्यमाहारमतः शां
तिं प्रयच्छ मे इति आज्यदानं अथ वस्त्रदानं सूक्ष्मवस्त्रद्वयं बहुमूल्यं द्वादशहस्तमितं तु वा
लन्यतं तुभ्यमहं संप्रददे न मम इति मंत्रस्तु शीतवातोष्णसंत्राणं लज्जायाः रक्षणं परं
देहालंकारणं वस्त्रमतः शांतिं प्रयच्छ मे इति वस्त्रदानं अथ धान्यदानं सार्द्धखारीत्री
ह्यपादेषाः तच्च सार्द्धशतद्वयपरिमितं मणपंचकं चेति गोत्राय शर्मणे इदममुकसस्यं
प्रजापतिदैवतं समस्तपापक्षयपूर्वकैहिकामुष्मिकसकलशुभफलवाप्तिकामस्तुभ्य
महं संप्रददे न मम इति मंत्रस्तु सर्वदेवमयं धान्यं सर्वोत्पत्तिकरं महत् प्राणिनां गी

अ

दा॰चं॰ वनोपायमतः शांतिं प्रयच्छमे इतिधान्यदानं अथगुडदानं गुडमितं दद्यात् गुडं च पलप
६३ ञ्चकमिति स्मरणात् अद्येत्यादि गोत्रायशर्मणेऽयं गुडो रसराजः सौम्यदैवतः समस्तपाप
क्षयकामस्तुभ्यमहं संप्रददे न मम इति मंत्रस्तु गुडमिक्षुरसोद्भूतं रसानामग्र्यं परं दाने
नानेन मे यस्मादतः शांतिं प्रयच्छमे प्रार्थनामंत्रस्तु यथा च सर्वदेवानां नारीणां पार्वती
यथा तथा रसानामग्र्यः सदैवेक्षुरसो मम तस्मात्सर्वांसिद्धिं ददस्व गुड सर्वदेति इतिगु
डदानं अथ रजतदानं पलत्रयमितं रौप्यं दद्यात् गोत्रायशर्मणे समस्तपापक्षयकाम
शिवविष्णुपितृप्रीतिकामस्त्विदं रजतं चंद्रदैवत्यं तुभ्यमहं संप्रददे न मम इति दद्यात्
मंत्रस्तु पितॄणां वल्लभं यस्माद्विष्णुशंकरयोरपि रजतं पातु मे नित्यं शोकसंसारसाग २
रादिति इतिरौप्यदानं अथ लवणदानं लवणं सार्द्धखारिकं दद्यात् सार्द्धशतमणमि

तं सार्द्धमणकत्रयं सेरकचतुष्टयं च भवति गोत्रायशर्मणे इदं लवणं सर्वरसोत्कृष्टं
सौम्यदैवतं सर्वपापक्षयद्वारा शिवप्रीतिकामस्तुभ्यमहं संप्रददे न मम इति मंत्रस्तु य
स्मादन्नरसाः सर्वे नोत्कृष्टा लवणं विना शंभोः प्रीतिकरा यस्मादतः शांतिं प्रयच्छमे अ
न्नादिस्वादुतां यान्ति लवणेन विना क्वचित् तस्माल्लवणदानेन मम संतु मनोरथाः
इतिलवणदानं इति दशदानानि अथ पंचधेनुदानानि तानि देशाचारानुरूपाणि
तत्रादौ पापधेनुदानं स्कांदे दानोपस्करास्तु गोदानोक्ता एव सर्वे ज्ञेयाः अद्येत्यादि
गोत्रायशर्मणे सुपूजिताय इमां पापधेनुं यथाशक्ति सोपस्करां रुद्रदैवत्यां मनोवाक्
कायकर्मभिः आजन्मार्जितपापनाशकामस्तुभ्यमहं संप्रददे न मम इति मंत्रस्तु आ
जन्मोपार्जितं पापं मनोवाक्कायकर्मभिः तत्सर्वं नाशमायातु पापधेनुप्रदानतः इति

अ

दा॰ चं॰ सुवर्णदक्षिणां दद्यात् इति पापधेनुदानं अथ ऋणधेनुदानं आले अद्येत्यादि॰ गो
त्राय शर्मणेस्तु इति ताय इमां ऋणधेनुं यथाशक्ति सोपस्कारां रुद्रदैवत्यां मम जन्मार्जि
६४ तैहिकामुष्मिक ऋणपातक छेदनकाम स्तुभ्य महं संप्रददे न मम मेति मंत्रस्तु ऐहिका
मुष्मिकं लौकिके सततं जन्मार्जितं ऋणं तत्सर्वं नाशमायातु ऋणधेनुप्रदानतः इति सुव
र्णदक्षिणां दद्यात् ऋ॰ इति ऋणधेनुदानं अथ प्रायश्चित्तधेनुदानं आले अद्येत्यादि
गोत्राय शर्मणे इमां प्रायश्चित्तधेनुदानं यथाशक्ति सोपस्करां रुद्रदैवत्यां मम जन्म
प्रभृति अद्ययावदाचरित पापस्याकृत प्रायश्चित्तकामः इमां तुभ्यमहं संप्रददे न म
मेति मंत्रस्तु प्रायश्चित्तं समुत्पन्नं निष्कृतिर्न कृता क्वचित् तस्य पापविशुद्ध्यर्थं ऋ
णधेनुं ददाम्यहं ततः सुवर्णदक्षिणां दद्यात् इति प्रायश्चित्तधेनुदानं अथ मोक्ष ६४

धेनुं आले मोक्षदो वासुदेवस्तु वेदशास्त्रेषु गीयते तत्प्रीतये द्विजाग्र्याय मोक्षधेनुं
ददाम्यहं इत्युक्त्वा अद्येत्यादि॰ गोत्राय शर्मणे इमां मोक्षधेनुं सोपस्करां रुद्रदैवत्यां
विष्णुप्रीति संसार मोक्षकाम स्तुभ्यमहं संप्रददे न मम मेति इ धातु मंत्रस्तु मोक्षदं ही
हृषीकेशं मोक्षदं द्विजनार्दनं मोक्षधेनुप्रदानेन मम मोक्षोस्तु यत्नतः ततः सुवर्ण
दक्षिणां दद्यात् इति मोक्षधेनुं अथ उत्क्रांतिधेनु आले उत्क्रांति वैतरिण्या च दशदा
नानी चैव हिते पितृत्वात् मे तव शाश्वधर्मेण दास्ये दिति तद्यथा यो मुमूर्षुः पुरुषः स्वयं
चेतनवेलायां प्राणिपं वेदपारगं ब्राह्मणमाहूय अद्येत्यादि गोत्रस्यामुकशर्मणो मम
सुखेन प्राणोत्क्रमणार्थमिमामुत्क्रांतिधेनुं यथाशक्ति सोपस्करां रुद्रदैवत्यां गोत्रा
य शर्मणे सं पूजिय तुभ्यमहं संप्रददे न मम मेति मंत्रस्तु उत्क्रांतौ मम देहस्य सुखेन

दा॰ चं॰ ब्राह्मण सिद्धये तुभ्यं संप्रददे नाम्नेधेनुमुत्क्रांतिसंज्ञितामिति ततः सुवर्णं दक्षिणां दद्यात्
६५ गोरभावे तत्स्वरूपं भूतं गोमूल्यं वा दद्यात् पित्रादेरुत्क्रांतौ तु पुत्रादिभिर्दद्यात् तत्र मुमू
र्षुपरस्थाने पित्रादेरिति प्रवदेत् इत्युत्क्रांतिधेनुः अथ वैतरणीदानं ब्रह्मवैवर्ते पा
सो वैतरणी नाम यमद्वारे महानदी शतयोजनविस्तीर्णा पृथुत्वे सा महासरित् अ
गाधनंतरूपा च दृश्यमाना द्भयप्रदा पूयशोणितवेगमस्थिकर्दमा नाम सुदारुणं उष्णं चैव प
निस्त्रिंशं च मारुतेनातिसावर्त्तं दातारं तारयत्यस्मात्तस्माद्वैतरणी स्मृता अनेन वि
धिनैव व्यतीपातदिने तथा पादस्थीमयधाकृष्णां कुर्याद्वैतरणीं सुधीः स्वर्णशृंगीं रौप्य
खुरां कांस्यपात्रोपदोहनां कृष्णवस्त्रयुगच्छन्नां सप्तधान्यसमायुतां पीसद्रोणत्रिशिख श्री
रतां ताम्रपात्रे आसीनं देहमंडोद्दंडयुतमहिषारूढं पात्राद स्तंस्वरूदं दमयं उडुपं पद्मसूत्र

वेणुपद्वं वेधेनुं कृत्वाच्छोपानत्समायुक्तं मृत्युकालेवादद्यात् ततो गां विप्रं च यथाविभवं
वस्त्रालंकारादिभिः संपूज्य यमप्रतिमां च संपूज्य अद्येत्यादि० अमुकगोत्रस्यामुकशर्मणः
मम यमद्वारस्थितवैतरण्याख्यनद्युत्तरणार्थं इमां कृष्णां गां सवत्सां यथाशक्ति सोपस्क
रां यमप्रतिमासहितां कृष्णवस्त्रयुगच्छन्नां रत्नमाल्याद्यलंकृतां स्वर्णशृंगाद्युपस्कारोपे
तां कार्पासद्रोणत्रिरात्रकृद्दद्रव्यसांगां गोत्राय अमुकशर्मणे तुभ्यमहं संप्रददे न मम इति मंत्रस्तु यम
द्वारे पथे घोरे घोरा वैतरणी नदी तर्तुकामः प्रयच्छामि कृष्णां वैतरणीं तु गां मंत्रस्तु विष्णु
रूप द्विजश्रेष्ठ देवपंक्तिपावन तर्तुं वैतरणीमेतां कृष्णां गां ते ददाम्यहं ततः सुवर्णं
दक्षिणां दत्वा धेनुं मंत्रप्रस्थानुव्रजेत् तन्मंत्रस्तु धेनुके त्वं प्रतीक्षस्व यमद्वारे महाप
थे उत्तितीर्षुरहं देवी वैतरण्यै नमोस्तु ते इति प्रार्थयित्वा प्रणमेत् ततो भूयसीं दद्यात्

दा॰चं॰ इति वैतरणीदानं अथ महिषीदानं भविष्ये महिषीदानमहात्म्यं कथयामि युधिष्ठिर:
६६ पुण्यं पवित्रमायुष्यं सर्वकामप्रदं तथा चंद्रसूर्यग्रहे कार्त्तिक्यां अयने सित चतुर्दश्यां संक्रा
न्तौ संपन्नौ सर्वारिष्टविनाशाय चित्तमात्रास्यापदस्या अथ प्रसूता दोषवर्जिता च दद्यात्
आदौ महिषीं चिमं चयथा विभवं वस्त्रालंकारादिभि: संपूज्य यमरूपाये महिष्येन मः
तिन त्वां प्रार्थयेत् महिषी त्वं समस्ता च लक्ष्मीरूपेण संस्थिता प्रार्थितासि मया देवी म
म मार्गं निवारयेति तथा महिषी यमरूपात्वं विश्वामित्रविनिर्मिते पूजितादस्मे पापं
सर्वदानफलप्रदे इंद्रस्याप्सरसो देवि महिषीरूपविष्णुना सर्वभोगप्रदे देवि दीर्घशृं
गी नमोस्तु ते अथेत्यादि॰ गोत्रायशर्मणे सुपूजिताय दीर्घायुष्यादिकामुष्मिकयज्ञया
जित्वबहु पितृतरणात्म शुभविंशतिधेनुदानसमफलप्राप्ति सर्वदोत्तमपुत्रपौत्रबहु ६६

त्वसूर्यलोकनिवासमहाराज्याप्तिकामश्च इमां महिषीं सालंकृतां रत्नवस्त्रावृतां स्वर्णशृंगीं
रौप्यखुरां ताम्रदोहां हेमतिलकां सप्तधान्ययुतां घंटाभरणां धेनूपस्करां यमदैवत्यां तुभ्य
महं संप्रददे न मम इति सकुशतिलजलं दद्यात् विप्रा देवस्य त्वेति पठन् एषि देवोस्य
दास्वस्तीति इच्छ यथा द्वारवं कामस्तु इति पठेत् दाता तु इंद्रादिलोकपालानां या राजमहि
षी शुभा महिषीदानमाहात्म्यात्सास्तु मे सर्वकामदा धर्मराजस्य साहाय्ये यस्याः पुत्रः प्र
तिष्ठित: महिषीसुरस्य जननी या सास्तु मे वरदा मम इति दत्वा प्रदक्षिणीकृत्य ब्राह्मणे तां
पयस्विनीमिति दक्षिणां तु दद्यात् पंच त्रिको वास्तु यथा वर्ण: अति निकृष्ट: दत्वा भूयसीं च द
त्वा कर्मेश्वरार्पणं कुर्यात् भविष्यपुराणे अनेन विधिना दत्वा महिषीं द्विजपुंगवे सर्वा
न्कामानवाप्नोति इह लोके परत्र च ब्राह्मण: सर्वकामस्तु क्षत्रियो जयकाम्यया धनका

दा॰ चं॰ मस्तु चैवस्तोवैष्णुद्रोभिलषितामियादिति महिषीदानमप्येवमेतेयं इति महिषीदानं अ
६७ थ मेषीदानं भविष्ये शृणु पार्थ परं दानं सर्वकल्मषनाशनं यद्दत्वा विविधं पापं सद्यो
विलयमृच्छति अयने विषुवे ग्रहणे दुष्टे दुःस्वप्नचित्रचिंतानुसारे काले तीर्थे गृहे वा का
र्येशांकरं ब्रह्माणं विष्णुं गौरीं गायत्रीं श्रीसहितां यथाशक्ति सुवर्णप्रतिमाः कृत्वा शाश्वा
सदानं गृहे लोकपालान् ग्रहांश्च कृत्वा सं पूज्य स्नातस्त्रिमतस्तत्र स्वोक्तेनाग्निं प्रतिष्ठाप्य
स्थापितदेवतामंत्रैस्तिलाज्यैरष्टोत्तरशतमष्टाविंशतिरष्टासंख्याका हुतीर्जुहुयात् त
तो मेषीं द्विजं च वस्त्रालंकारादिभिर्यथाविभवं संपूज्य अद्येत्यादि॰ सर्वपापक्षयदुः
स्वप्नसूचितारिष्टविनाशपुत्रपौत्रधनकीर्तिप्राप्तिकामः इमां मेषीं तिलसुवर्णकाद्यं
किंतां कौशेयपरिधानां सप्तधान्यसमायुक्तां पुष्पोपहारान्सन्मुखस्थापितलवणां ६७

ब्रह्मविष्णुशिवादिप्रतिमायुक्तामुक्तोपस्करां गोत्राय शर्मणे सुपूजिताय इमां तुभ्य
महं संप्रददे न मम इति दत्वा सुवर्णदक्षिणां दत्वा मंत्रस्तु चाजनः कापजनिनं सलिंचिन्म
मदुष्कृतं तत्सर्वं विलयं यातु त्वद्दानानुपसेवितम् इति प्रतिमास्थापितं तिलकुंभे वस
स्य तं विधिं तस्य प्रवक्ष्यामि विश्वामित्रेण निर्मितां अजां विप्रं यथाविभवं वस्त्रालंका
रादिभिः संपूज्य अद्येत्यादि गोत्राय शर्मणे इमां अजां सप्तधान्योपरिस्थितां वस्त्रमाल्यो
पशोभितां वस्त्रेनेत्रां हेमशृंगीं ताम्रपृष्ठीं रौप्यपादां सदोहनपात्रां सपुत्रां त्वाष्ट्रदे
वत्यां तुभ्यमहं संप्रददे न मम इति कुशौ तिलोदकं दत्वा दद्यात् मंत्रस्तु मंत्राचासे अ
जे लक्षणे यक्ष संपत्करे शुभे स्रष्टा त्वं दह मे पापं जन्मांतरशतैः कृतम् इति यथा त्वं
पूर्वं ब्रह्मणा सृष्टा पवित्रं भवती परं त्वत्प्रसत्तो स्थितापश्चात्तस्माच्छांतिं प्रयच्छ मे

शा॰चं॰ रेवत्स्येत्येति शृंगे प्रतिगृह्य ततः सुवर्णं दक्षिणां दद्यात् इत्यजादानं अथ मंदाग्निहरं
६८ मेषदानं बौधायनः अग्नेर्मांद्यं भवेद्यस्य यस्त्रेताग्नेर्विनाशकः वक्ष्यामि तत्प्रतीकारं यथो
क्तं लक्षणापुरा पलार्द्धेन तदर्द्धेन तदर्द्धेनापि वा पुनः राजते कारयेत्सौम्यं अग्नेर्वाहनमु
त्तमं सौवर्णाश्च खुराः कार्याः श्वेतवस्त्रेण वेष्टयेत् तत्र श्वेतगंधश्वेतपुष्पं मधूत्कटं च
पं दद्यात् द्रोणत्रयतंडुलराशौ स्थितं पूजयेत् मेषादाग्नेयां दिशि समिदाज्यतिलैः
मः कार्यः अथ प्रयोगः पुण्यकाले अद्येत्यादि मम पूर्वकर्मविपाकोत्पन्नत्रेताग्नि
नाशजनिताग्निमांद्यत्वनिरासार्थं श्रीमज्जठराग्निप्रबलत्वसिध्या आयुरारोग्यसिध्यर्थं
मेषदानं करिष्ये इति संकल्प्य मेषप्रतिमां प्रत्यक्षं मेषं वा संस्थाप्य आग्नेयां स्वगृह्यो
क्तविधिनाग्निं कृत्वा समिदाज्यतिलैरष्टोत्तरशतमष्टाविंशतिसंख्यया वा जुहुयादे ६८

तैर्मंत्रैः समिदाज्यचरुतिलाहुतिभिः ॐ अग्निर्मूर्द्धा० अग्नय इदं न मम ॐ अग्ने
नय सुपथा० ॐ अग्निनाग्निः समिध्यते० इति त्रिभिर्मंत्रैर्विचक्षितसंख्यया समिदा
ज्यतिलैर्हुत्वा स्विष्टकृतादि प्रणीताविमोकांतं कृत्वा कुंभादिकैर्यजमानमभिषिंचेदे
तैर्मंत्रैः बौधायनः आपोहिष्ठास्तिसृभिः ऋचा हिरण्येति तृचेन च पवमानानुवाकेन
मार्जयेद्रोगिणं ततः शान्नो वातानुवाकेन शांतिं चापि प्रकल्पयेत् तस्मै हुतवते रो
गी प्राङ्मुखाय उदङ्मुखः सदक्षिणं पूजिताय प्रदद्याद्दानमनेन मम इति गोत्राय शर्म
मणे सोपस्करं मेषं प्रत्यक्षं राजतं वा वरुणदैवतं संकल्प्योक्तफलकामस्तुभ्यमहं संप्रद
दे न मम इति दत्वा प्रार्थयेत् बौधायनः देवानां यो पुरा हव्यवाहनः सर्वपूजितः तस्य त्वं
वाहनं यस्माद्देवेन्द्रैर्महर्षिभिः अग्निमांद्यं पूर्वकर्मविपाकोत्पन्नं मम तत्सर्वं नाश

दा॰चं॰ यक्षिप्रं जठराग्निमवर्द्धयेति चित्रस्य शृंगे देवस्य त्वेति मंत्रेण सच यथाग्रास्वं कामस्त्वांतिं
६९ पठित्वा यथाशक्ति भूयसीं दत्वा ब्राह्मणांश्च भोजयित्वा सुहृद्युतो भुंजीतेति इति मंदाग्नि।
हरमेव प्रदानं अथ दशाचलदानानि मात्स्ये प्रथमो धान्यशैलः स्याद्द्वितीयो लवणा
चलः गुडाचलस्तृतीयोस्याच्चतुर्थो हेमपर्वतः तिलशैलः पंचमस्यात्षष्ठः कार्पासप
र्वतः घृताचलः सप्तमस्याद्रत्नाचलस्तथाष्टमः नवमो राजतः शैलो दशमः शर्कराचल
इति कालमाह मात्स्ये अयने विषुवे चैव व्यतीपाते दिनक्षये शुक्लपक्षे तृतीयायामुप
रागे तिथिक्षये विवाहोत्सवयज्ञेषु द्वादश्यामथवा पुनः शुक्लायां पंचदश्यां वा पुण्यर्क्षे वा
विधानतः तीर्थे वायतने वापि गोष्ठे वा भवनांगणे तत्र चतुर्हस्तं दशहस्तं मंडपं प्रागुदक्प्रवणं
वा प्राच्यामुदीच्यां वा एकमेव द्वारं न चत्वारि तोरणमप्येकमेव मंडपं गोमयेनोपलिप्य ६९

कुशानास्तीर्य तन्मध्ये पर्वतं कुर्यात् पर्वतेनैर्निष्कभैर्युतं धान्यं द्रोणसहस्रेण तूत्तमो
गिरिः पंचशतको मध्यमः त्रिभिः शतैः कनिष्ठः मेरुव्रीहिमयो महान् मध्ये तदुपरि
मंदारपारिजाताख्यकल्पवृक्षाद्यपादेममयास्थापयः मध्ये कल्पतरुः मंदारपारिजातौ दक्षि
णोत्तरयोः पूर्वपश्चिमयोर्हरिचंदनसंतानौ मुक्ताफलवज्रगोमेदगारुत्मतानानीलरत्न
वैडूर्यरत्नानि मुक्ताफलादीनि पूर्वादिगवस्थितराजशृंगचतुष्टये निवेश्यानि मंदा
रश्रीखंडखंडेरभितःप्रवालवालान्वितःशुक्तिशिलातलस्थात् शर्कराचलस्तु ह
रिचंदनसंतानाख्यपकौ तत्र पूर्वादिदिक्षु ब्रह्मविष्णुरुद्रास्त्वर्कप्रतिमाः पश्चिमे यो
न्युचिसंयोश्चदेवाः प्रागादिदिक्चतुष्टये क्रमेण पूर्वोक्तमुक्ताफलादिभिर्भूषितं रौप्य
शृंगचतुष्कं तदुर्ध्वाणिर्दिक्पतौप्यमिंद्रादिलोकपालाष्टप्रतिमाकं समंतात् श्रीखंडे

दा॰चं॰ र्वतानां स्थाने प्रवालकीलानां सुक्तिप्रागादिषु मेघानां श्वेतपीतकर्बुररक्तवस्त्राणि वंशाना
मिश्रकृजलस्थगतं गंधपुष्पनानाफलानि च परितः संस्थाप्य पंचवर्णवितानकं चोपरि श्र
७० श्रीयान् ततो वै मेरोः षोडशांशेन प्राच्यां मंदारं तदुपरि नरहरूपगणत्रयं कदंबं च सौव
र्णकदंबमूले देमः कामदेवः अरुणोदसरस्थाने दुग्धपूर्णरौप्यपात्रं रौप्यं चैत्ररथाख्यं वन
गंधपुष्पफलवस्त्राणि च स्थापयेत् याम्ये मेरुषोडशांशेन गोधूममयं गंधमादनं तदुपरि
सौवर्णं जंबूवृक्षं तन्मूले सुवर्णउदंष्ट्रगुरुं बंधनं दमानसरस्थाने सघृतं रौप्यपात्रं रौप्यं गंधमाः
ल्यवनं नानाफलवस्त्रमाल्यानि च स्थापयेत् पश्चिमे मेरुषोडशांशं सतिलमयं विपुलपर्वतं
तदुपरि सौवर्णवटं तन्मूले दक्षिणामुखीं सवत्सां सुवर्णधेनुं भद्रसरस्थाने मधुपूर्णरौप्यपा
त्रं रौप्यं सावित्रं वस्त्रफलमाल्यानि च स्थापयेत् एवं कल्पमाणपर्वतेष्वपि मेरुद्रव्य चतु ७०

र्थांशेन लवणादिद्रव्येण प्रागादिषु विष्कुंभपर्वतान्नेयाः अत्राचार्यस्त्वेक ऋत्विजश्चत्वा
रः प्राच्यामेकमेव कुंडमिति तत्रैव जुहुयुः अथ यजमानः कृतनित्यक्रियः पुण्य
काले अद्येत्यादि॰ अप्सरसो गंधर्वयुत विमानकरणक स्वर्गलोकगमनसाग्रमन्वंत
रकालदेवलोकनिवासोत्तर भूलोकराजराजत्वकाम ईश्वरप्रीतिकामो वा धान्य
पर्वतदानं करिष्य इति संकल्प तदंगत्वेन गणेशपूजां स्वस्तिवाचनं मातृकापूजनादि
नांदीश्राद्धं कृत्वा आचार्य ऋत्विजश्च वृत्वा मधुपर्कादीनां संप्रज्ञ मंडपपूजाद्याचार्य
नियोगानंतं कुर्यात् ततः आचार्येण वस्त्रद्रव्यस्थापनादि कुंडसमीपस्थितकलशस्थाप
नांतं कुर्यात् अथ ऋत्विजः प्राक्कुंडेष्वदादिचिह्नादेवताभ्यस्तत्तन्मंत्रैर्घृतान्कृति
ले पृथक्पचरुताभ्यां मीलिताभ्यां कुंडेष्वेतिनित्रिभिः साधनैः प्रत्येकमष्टचारं हुत्वा

दा॰च॰ दशलोकपालेभ्यो दशचक्रेभ्य एकादशरुद्रेभ्यो द्वादशादित्येभ्यश्च मन्त्रेक्रमश्याष्टसं
ख्यया चर्वाज्याहुतीर्जुहुयुः ततः पुरुषसूक्तेन ब्रह्माविष्णुरुद्रेभ्यः समित्तिलैर्योऽसर्वका
७१ मोदेवधनुमदस्कामधेनुभ्यस्तिलैर्घृतेन वा अष्टोत्तरशतं जुहुयुः तत्र चतुःपंचाशा
द्वैवतास्तिलैर्घृतेन चेति ततो यजमानो मयरुस्वमजपेत् तच मंत्रः त्वदेवगणधाम
निधिर्बिंदुमस्मद्देवदेवामरपर्वतेन नाशपाशक्षेमं विधत्स्व कुरु शांतिमतुलमानः सं
पूजितः परमभक्तिमनामया यत्तमेव भगवानीश ब्रह्माविष्णुमहेश्वरदिवाकरः मू
तोन्तर्तपरं श्रीजमनः पाहि सनातन यस्मात्त्वं लोकपालानां विश्वमूर्तेश्च मंदिर रुद्रा
दिसवसूनां च ततः शांतिं प्रयच्छ मे यस्मादमरस्यमरैर्नारीभिश्च शिरस्तव तस्मा
न्मामुद्धराशेषदुःखसंसारसागरात् मंदरस्य तु यस्माच्चैत्ररथेन त्वा भद्राश्वपमुखेन च ७१

शोभने मंदरश्रिमलं तुष्टिकरो भव गंधमादनस्य तु यस्माच्चडामणिर्नैबुद्धिपस्त्वं गंध
मादन गंधर्ववनसोभावानतः कीर्तिर्दृढास्तु मे सुपार्श्वस्य तु उत्तरैः कुरुभिर्यस्मात्सावित्रे
णवनेन च सुपार्श्वशोभसे नित्यमतः श्रीरस्त्वयास्तु मे सुपार्श्वस्य तु उत्तरैः कुरुभिर्यस्मा
त्सावित्रेण वनेन च ततः सर्वैर्जागरणे कृते प्रातः स्नाताः कृतनित्यक्रियः कुंडसमीपस्थ
कलशजलेन सपरिवारं यजमानमभिषिंचेयुः ततो यजमानो गृहीतकुसुमो मेरुं प्रद
क्षिणीकृत्योपतिष्ठेत् अन्नं ब्रह्मरसः प्रोक्तः अन्ने प्राणप्रतिष्ठिताः अन्नाद्भवंति भूतानि
जगदन्नेन वर्त्तते अन्नमेव यतो लक्ष्मीरन्नमेव जनार्दनः धान्यपर्वतरूपेण पाहि तस्मा
न्नमो नम इति उपस्थाय पुष्पांजलिं प्रक्षिप्य नमस्कृत्य प्राङ्मुखो पवित्रपो दङ्मुखो
भ्य गुर्वादिभ्यः क्रमेण गिरीन्दद्यात् अद्येत्यादि गोत्राय शर्मणे सालंकृताय गुरवे

अप्सरोगंधर्वयुतविमानकरणकस्वर्गलोकगमनानंतरं ज्ञातावधिससपदेवलोकनि
दा॰चं॰ वासोत्तरभूलोकराजराजित्वप्राप्तिकामइमं धान्यमयमेरुं सौवर्णमंदरादिरूपपंचक
७२ सौवर्णब्रह्मविष्णुरुद्राकोटिप्रतिमायुक्तं मुक्ताहारकादिप्रतिमायुक्तं मुक्ताहीरकादिभिरपि
नरौप्यमयशृंगचतुष्कशोभितरौप्यमयेंद्रादिदशलोकपालप्रतिमायुतं रौप्यमयनि
तंबान्वितं रक्षकं शोभितं कुंदरं दिक्चतुष्टयस्थापितरौप्यपात्रस्थितपट्टोदमस्त्रवण
सहितं तुभ्यमहं संप्रददे न मम इति गुरुहस्ते दद्यात् स च ॐ स्वस्तीति देयस्पत्तेति प्रति
ष्टस्य यथाशास्त्रं क्रमस्तुतिं पठेत् यजमानः कृते तद्धान्यमयमेरुपर्वतदानकर्मणः
सांगतासिद्ध्यर्थं इमां गां दक्षिणां तेन तुभ्यमहं संप्रददे न मम इति दद्यात् चतुर्विंशतिथे
नुपक्षिगावो दो गुरवे चतस्रश्चतस्रः ऋत्विग्भ्यः दशापक्षे तु गुरवे षट् ऋत्विग्भ्य एकैका ७२

एकपक्षे तु गुरवे एकामेव कपिलां ऋत्विग्भ्यः सुवर्णदक्षिणां दद्यादिति मदनरत्नादयः
एवं पूर्वस्थितमंदराख्यं विष्कंभसप्रतिमं सोपस्करं गोत्रायशर्मणे ऋत्विजे तुभ्यमहं सं
प्रददे न मम इति दद्यात् एवमेव दक्षिणास्थं गोधूममयं गंधमादनपर्वतं तथा पश्चि
मस्थं तिलमयं विपुलाख्यपर्वतं तथा उत्तरदिग्स्थं माषमयं सुपार्श्वनाख्यं पर्वतं ऋत्वि
ग्भ्यो दद्यात् लवणाचलादिदानप्रयोगेषु धान्यपदस्थाने लवणादिपदं प्रक्षेप्य तेम
स्कलानि तु तत्र तत्र वाक्ष्यामः ततो गुरवे दद्यात् यजमानो देवताः संपूज्य आवाहितदेव
ताश्च संपूज्य नमस्कुर्यात् गुरुस्तादेवता विसर्जयेत् ततो यजमानो मंडपं स्वर्णपीठं प्रति मो
पकारादि सर्वं गुरवे प्रतिपाद्य भूयसीं दत्वा ममाद्य कृतेतत्कर्मीयस्य स्मरणेति च विष्णुस्म
त्वा कर्मेश्वरार्पणं कृत्वा ब्राह्मणान् भोजयित्वा आशिषो गृहीत्वा स्वयं सुहृतो भुंजीतेति

शु

दा॰चं॰ इति धान्यमेरुपर्वतसाधारणप्रयोगः अथ लवणाचलदानं पाद्मे उत्तमः षोडशद्रोणः
कर्तव्यो लवणाचलः मध्यमः स्यात्ततोऽर्द्धेन चतुर्भिरधमः स्मृतः वित्तहीनो यथाशक्त्या
७३ द्रोणादूर्ध्वं तु कारयेत् चतुर्थांशेन विष्कुंभपर्वतान्कारयेत् पृथक् अयं न्यासः सर्वविष्कुं
भपर्वतेषु ज्ञेयः रतिमदनः विधानं तु पूर्ववत् इमं तरूंश्च लोकपालान् कामदेवादीनपि
पूर्ववत् तयैव संपूज्य प्रार्थयेत मंत्रास्तु सौभाग्यरससंभूतो यतोऽयं लवणो रसः तदात्म त
कत्वेन मां पाहि पापतुभ्यं नमो नमः यस्मादन्नरसाः सर्वे नोत्कृष्टा लवणं विना प्रियं च शिव
योर्नित्यं तस्माच्छांतिं प्रयच्छ मे विष्णुदेहसमुद्भूतं यस्मादारोग्यवर्द्धनं तस्मात्पर्वतरूपेण
पाहि संसारसागरात् अद्येत्यादि॰ कल्पपर्यंतमुमालोकप्राप्त्यनंतरं परमगतिप्रा
प्तिकामः ईश्वरप्रीतिकामो वा लवणाचलदानं करिष्य इति संकल्प्य अयमेव विशे ७३

षोऽन्यत्सर्वं पूर्ववत् इति लवणाचलदानं अथ गुडाचलदानं पाद्मे अथातः संप्रवक्ष्यामि
गुडपर्वतमुत्तमं यत्प्रदानान्नरः स्वर्गं प्राप्नोति सुरपूजितं उत्तमो दशभिर्भारैर्मध्यमः पं
चभिर्मतः त्रिभिर्भारैः कनिष्ठः स्यात्तदर्धेऽल्पवित्तवान् तुला स्त्रियां पलशतं भारः स्या
द्विंशतिस्तुलेत्यमरः विधिस्तु पूर्ववत् प्रार्थनामंत्रास्तु यथा देवेषु विष्णुरात्मा प्रवरश्च जना
र्दनः सामवेदस्तु वेदानां महादेवस्तु योगिनां प्रणवः सर्वमंत्राणां नारीणां पार्वती यथा
यथा रसानां प्रवरः सदैवेक्षुरसो मतः मम तस्मात्परां लक्ष्मीं ददस्व गुड सर्वदेति यस्मा
त्सौभाग्यदायिन्या भ्राता त्वं गुडपर्वतः निवासश्चापि पार्वत्यास्तस्मान्मां पाहि सर्वदेति
अद्येत्यादि॰ सकलपापक्षयोत्तरगंधर्वैः पूज्यमानत्वपूर्वकल्पशतावधि गौरीलोकप्राप्त्य
नंतरं संपन्नापराजिता पुराणे सप्तद्वीपाधिप[illegible]ति स्वकाम ईश्वरप्रीतिकामो

दा॰ चं॰ वा इति संकल्प्य दाने च विशेषोऽन्यत्सर्वं पूर्ववत् इति गुडाचलदानं अथ सुवर्णाचलदा
७४ नं पाद्मे उत्तमः पलसाहस्रो मध्यमः पंचभिः शतैः तदर्धेनाधमस्तु स्यादल्पवित्तोऽपि शक्ति
तः अल्पवित्तः पलादूर्ध्वं कुर्यात् धान्यपर्वतवद्विधानं पर्वतं संपूज्य प्रार्थयेत् मंत्रो
तु नमस्ते ब्रह्मबीजाय ब्रह्मगर्भाय ते नमः यस्मादनंतफलदस्तस्मात्पाहि शिलोच्चय
यस्मादग्नेरपत्यं त्वं यस्मात्तेजो जगत्स्तते हेमपर्वतरूपेण तस्मात्पाहि सदा ममेति
दानवाक्यं तु अद्येत्यादि॰ सकलपापक्षयोत्तरकल्पावधि आनंदकारकब्रह्मलोका
नंतरं परमपदप्राप्तिकाम इति संकल्प्य दानवाक्ये तु विशेषः अत्र सर्वं गुर्वागुर्वादिभ्यः
त एवं देयं दल्पद्रव्यविषयं बहुद्रव्येषु तुलापुरुषदानवद्दद्देवतुर्थांशो वा गुरवे देत्याश
स्याद्विशिष्टेभ्यो देयमिति हेमाद्रिः इति सुवर्णाचलदानं अथ तिलाचलदानं पाद्मे ७४

उत्तमो दशभिर्द्रोणैः पंचभिर्मध्यमोत्तमः त्रिभिः कनिष्ठो राजेंद्र तिलशैलः प्रकीर्तितः
इति इक्षुविष्कंभादि तु सर्वं पूर्ववत् मंत्रास्तु यस्मान्मधुवने विष्णोर्देहस्वेदसमुद्भवाः तिला
कुशाश्च माषाश्च तस्माच्छन्नो भव त्वं हि हव्यकव्येषु यस्माच्च तिलैरेवाभिरक्षणं भवादुद्ध
र शैलेंद्र तिलाचल नमोऽस्तु ते दानवाक्यं तु अद्येत्यादि॰ सकलपापक्षयदीर्घायुष्यपुत्र
पौत्रसमन्वितानंतरपितृदेवगंधर्वपूर्वकपूज्यमानत्वपूर्वकयक्षलोकगमनानंतरमक्षय
वैष्णवपदप्राप्तिकाम इति संकल्प्य च दानवाक्ये विशेषोऽन्यत्सर्वं पूर्ववत् इति तिलाच
लदानं अथार्धोदयव्रतेन तिलपर्वतदानं स्कांदे पूर्वान्हे संगमे स्नात्वा शुचिर्भूत्वा समा
हितः सर्वपापविशुध्यर्थं नियमस्थो भवेन्नरः नियमं मंत्रस्तु चिरं वस व्रतं देवाकरि
ष्ये भुक्तिमुक्तिदं भवंतु संनिधौ मे च त्रयो देवास्त्रयोग्नयो नम इति तथा ब्रह्मविष्णु

दा॰चं॰ मदेशानां सौवर्णी पलसंख्यया शक्त्यात्र यत्नतः कुर्यादुपस्करसमन्वितं संपूज्य विप्रवर्ये
७५ भ्योदद्यात्त्रिजन्म वा नुयादिति अथास्य दानप्रयोगः यजमानः कृतनित्यक्रियः पुण्यका
ले तीर्थादौ स्नात्वा आचम्य अद्येत्यादि मम अभिमतफलावाप्ति मेरुदानसमफलावाप्तये च
अधोदये तिलपर्वतदानं करिष्ये इति संकल्प्य वेदपारगान् ब्राह्मणान् वृत्वा यथा विभ
वं वस्त्रालंकारादिभिः संपूज्य तत्तिलपर्वते ब्रह्मादीनां प्रतिमाः स्वर्णमयाः संस्थाप्य
षोडशोपचारैः संपूज्य ब्रह्मादीनामंगपूजां कुर्यात् तद्यथा नमो विश्वसृजे तुभ्यं स
त्याय परमात्मने देवाय देवपतये यज्ञानां पतये नमः ॐ ब्रह्मणे नमः पादौ पूजयामि
इत्यक्षतगंधपुष्पाणि क्षिपेत् ॐ हिरण्यगर्भाय॰ ऊरू॰ ॐ परमात्मने नमः जानुनि॰
ॐ वेधसे॰ जंघे॰ ॐ पद्मोद्भवाय॰ गुह्यं॰ ॐ हंसवाहनाय॰ कटिं॰ ॐ चतुराननाय॰ वक्षः॰ ॐ ७५

सावित्रीपतये॰ बाहू॰ ॐ ऋग्वेदाय॰ पूर्ववक्त्रं॰ ॐ यजुर्वेदाय॰ दक्षिणव॰ ॐ सामवेदाय॰ प
श्चिमव॰ ॐ अथर्ववेदाय॰ उत्तरव॰ ॐ चतुर्मुखाय॰ वक्त्राणि॰ ॐ हंसाय॰ नेत्राणि॰ ॐ क
मलासनाय॰ शिरांसि॰ लोकेशाय॰ सर्वांगं पूजयामि॰ ततो लोकपालान्सवितः ततस्तैः
प्रपूजयेत् ततो विष्णुं गरुडादिहिरण्यगर्भः पुरुषप्रधानाव्यक्तरूपधृक् सर्वादिसमुत्क्लो
नंतपूजां गरुडासनमस्कृता इति सिमार्थ्यं पूजयेत् ॐ अनंताय॰ पादौ पू॰ विश्वरूपधृते॰
उरू॰ मुकुंदाय॰ जानुनी॰ ॐ गोविंदाय॰ जंघे॰ ॐ प्रद्युम्नाय॰ गुह्यं॰ ॐ पद्मनाभाय॰ ना
भिं॰ ॐ लंबोदराय॰ उदरं॰ ॐ कौस्तुभवक्षसे॰ वक्षः॰ ॐ चतुर्भुजाय॰ बाहू॰ ॐ विश्वमु
खाय॰ मुखं॰ ॐ सहस्रशिरसे॰ शिरांसि॰ ॐ सर्वेश्वराय॰ सर्वांगं॰ ततः श्रियादि पू
जा आदित्यचंद्रनयनदिग्वासादेत्यसरन पूजाशनामयं भक्त्या गरुडाणकरुणा

दा॰चं॰ करोति ततः महेश्वर महेशान नमस्ते त्रिपुरांतक जीमूतकेतुपतये नमस्ते वृषभध्व
७६ जेति आद्यमंत्रेण संप्रार्थ्य द्वितीयेन नत्वा प्रपूजयेत् ॐ ईशानाय॰ पादौ॰ ॐ चंद्रशे
खराय॰ जानुनी॰ ॐ पशुपतये॰ जंघे॰ ॐ शंकराय॰ ऊरू॰ ॐ उमाकांताय॰ गुह्यं॰ ॐ नी
ललोहिताय॰ नाभिं॰ ॐ कृत्तिवाससे॰ उदरं॰ ॐ नागयज्ञोपवीतिने॰ बाहू॰ ॐ पंचव
क्त्राय॰ वक्त्राणि॰ ॐ त्रिलोचनाय॰ लोचनानि॰ ॐ रुद्राय॰ शिरांसि॰ ॐ विश्वेश्वरा
य॰ सर्वांगं पूजयामि॰ इत्यंगपूजा ततः पंचामृताद्युपचाराः पीतं छत्रं कमंडलुं श्वे
तवस्त्रयुगं ब्रह्मणे पीतांबरद्वयं विष्णवे॰ लोहितवस्त्रयुगं शिवाय॰ कमलैस्तुलसीप
त्रैर्बिल्वपत्रैः क्रमेण ततो ब्रह्माणं संपूज्य ततो ब्रह्मविष्णुशिवानां नाममंत्रेणाष्टोत्त
रशतं तिलैर्घृताक्तैर्हुत्वा होमं कारयेत् ततस्तिलपर्वतं प्रति मात्रयं द्राध्यात्रयं दद्यात् ७६

संकल्पोक्तफलं संकीर्त्य गोत्राय ब्राह्मणे सुपूजिताय तुभ्यमहं संप्रदद॰ मंत्रौ तु यस्मान्मधुवने
विष्णोर्देहस्वेदसमुद्भवाः तिलाः कुशाश्च माषाश्च तस्माच्छं नो भवत्विह हव्यकव्येषु य
स्माच्च तिलैरेभाभिरक्षणे भवदुद्धर शैलेंद्र तिलाचल नमोस्तु ते इति अन्यत्सर्वं ति
लाचलदानवत्कुर्यात् स्कांदे अर्द्धोदये तु संप्राप्ते सर्वं गंगासमं जलं शुद्धात्मानो द्विजाः
सर्वे भवेयुर्ब्रह्मसंमिताः यत्किंचिद्दीयते दानं मेरुतुल्यं च तद्भवेदिति यथा चात्र दानवि
शेषो निर्णयामृते स्कांदे चतुःषष्टीपलं मुख्यं ममंत्रं तत्र कारयेत् तत्र अर्द्धोदये चत्वारिं
शत्पलं वापि पंचविंशतिमेव वा तत्तु कांस्यमयं प्रोक्तं तत्रैव एवं सुघटितं कार्यं कांस्यभा
जनमुत्तममिति निधाय पायसं तत्र पद्मं अष्टदलं लिखेत् पद्मस्य कर्णिकायां तु कर्षमात्रं
सुवर्णकं तदभावे तदर्धं वापि कारयेत् कृत्वा तंदुलैः शुक्लैः पद्मं अष्टदलं भुवि अग्रे

दा॰च॰ त्रेस्थापयेत्तत्र ब्रह्मविष्णुशिवात्मकं तेषां पूजा ततः कार्या श्वेतमाल्यैश्च शोभनैः वस्त्रा
११ दिभिरलंकृत्य ब्राह्मणाय निवेदयेदिति अद्येत्यादि॰ ससमुद्रकसमग्रसम्यक्पृथ्वीदा
नसमफलावाप्तिकामो गोत्राय ब्राह्मणायालंकृताय इदं पापसंहारितं कांस्यपात्रं अष्ट
दलपद्मस्थितं सस्वर्णं सपर्यं वस्त्रादिभिरलंकृतं ब्रह्मविष्णुशिवात्मकं विष्णुदैवतं तु
भ्यमहं संप्रददे न मम इति मंत्रस्तु स्वर्णपापसामंत्रं यस्मादेतत्त्रयीमयं आवयोस्तारकं
यस्मात्तद्ब्राह्मणद्विजोत्तमेति कांस्यपात्रदानफलमुक्तं स्कांदे समुद्रमेखलां पृथ्वीं सम्य
ग्दत्त्वा तु यत्फलं तत्फलं लभते मर्त्यः कृत्वा दानमनंतकमिति अमंत्रं पात्रं इत्तसहोदये
तिलाचलदानं कांस्यपात्रदानं च अथ कर्पासाचलदानं कार्पासपर्वतस्तद्वद्विंशद्भारै
रिहोदितः दशभिर्मध्यमः प्रोक्तः कनिष्ठः पंचभिः स्मृतः अत्यर्धतो भारेरेकेण वा कुर्यात् १७

विधिस्तु धान्यपर्वतवत् दानं तु प्रभातायां आवर्ष्या अरुणोदये सूर्योदयात् प्राक् नाडिका
चतुष्टयमध्ये इत्यर्थः अद्येत्यादि॰ सतुष्टयेमध्ये इत्यर्थ अद्येत्यादि सकलपापक्षयोत्तरा
कल्पावधिरुद्रलोकनिवासानंतरं भूलोकराजत्वकाम इति संकल्प्य दानवाक्ये च वदेत्
मंत्रस्तु त्वमेवावरणं यस्माल्लोकानां इह सर्वदा कार्पासाचल तस्मात्त्वमघौघध्वंस
कारको भवेति इति कार्पासाचलदानं अथ घृताचलदानं विंशत्या घृतकुंभाना
मुत्तमः स्याद्घृताचलः मध्यमस्तदर्धेन तदर्धेनाधमः स्मृतः अल्पवित्तस्तु द्वाभ्यां
वापि कुर्यादिति विष्कुंभादि पर्वताश्चतुर्थांशेन कार्याः कुंभपलसहस्रात्मकं इत्युक्तं
दानविवेके घृतकुंभपात्ररूपएव शालितंदुलपूर्णपात्राणि कुंभानामुपरि निवेशये
त् अहतशुक्लवस्त्रैरावेष्टयेत् इक्षुदंडफलान्वितैः अन्यत्सर्वं धान्यपर्वतवद्बोध्यं उ

दर्यां प्रान्य घटिचतुष्टयमध्ये दद्यात् अद्येत्यादि सकलक्षय पूर्वकं हंससारसंयुक्तकिंकि-
णीजालमालाकेवर्णविमानकरणकन्याकरलोकगमनपूर्वकसिद्धचारणकामेति वि
द्याधरार्धिनत्वविसर्ष्टपित्सदितम्भतं संप्लवावधिक विचरणकामेति संकल्प्य दानवाक्य
ति चैव कर्त्तव्यं मंत्रौ तु संयोगात्तष्ठ्नमुत्सन्नं यस्मादम्ृतं तनेजसे तस्मात्तष्ठ्ना चिविश्वात्मा
प्रीयतां मम शंकरः यच्चतेजोमयं ब्रह्म घृतेन च प्रतिष्ठितं घृतपर्वतरूपेण तस्मात्त्वं पा
हि भूधरेति इति घृताचलदानं अथ रत्नाचलदानं पाद्मे अथातः संप्रवक्ष्यामि रत्ना
चलमनुत्तमं मुक्ताफलसहस्रेण पर्वतः स्यादिहोत्तमः मध्यमः पंचशतिकस्त्रिशतानां
चाधमः स्मृतः चतुर्थांशेन विष्कुंभादयः वज्रगोमेदौ पूर्वे वैदूर्यनीलेदक्षिणे पद्मरागयु
तः सुपर्ण पश्चिमे वैडूर्ययुतो विद्रुमः उत्तरे दानवाक्यं तु अद्येत्यादि अनेकजन्मकृतब्र ७८

ह्महत्यादिपापक्षयोत्तरमहेश्वरपूजितत्वपूर्वकसागरकल्पशतावधि विष्णुलोकनि
वासानंतरं आयुरारोग्यगुणोपेतसप्तद्वीपाधिपत्यकामइतिसंकल्प्य दानवाक्यं च वक्त
व्यं मंत्रौ तु यथा देवगणाः सर्वे सर्वरत्नेष्ववस्थिताः त्वं च रत्नमयो नित्यमतः पाहि महा
चलइति तस्माद्रत्नप्रसादेन शांतिं कुरु नगेश्वर रत्नाचलप्रदानेन तस्मान्मां पाहि सर्व
वेदेति अन्यत्सर्वं धान्यपर्वतवत् इति रत्नाचलदानं अथ रौप्याचलदानं पाद्मे दशा
भिः पलसाहस्रैरुत्तमो राजताचलः पंचभिर्मध्यमः प्रोक्तो दैन्येनाधमः स्मृतः अश
क्तो विंशतिपलादूर्ध्वं कुर्यात् विष्कुंभादयस्तु तुरीयांशेनेति अन्यत्सर्वं धान्यपर्व
तवत् दानवाक्यं तु अद्येत्यादि सकलपापक्षयपूर्वकदशसहस्रगोदानसमफला
वाप्तिपूर्वकगंधर्वादिअप्सरोगणपूज्यमानत्वविशिष्टवैभवेनयावदाभूतसंप्लवं सोम

दा॰ चं॰ लोकनिवासकाम इति संकल्प्य दानवाक्यं च वक्तव्यं मंत्रस्तु पितॄणां वल्लभं यस्माद्
मैंदोः शंकरस्य तु रजतं यातु तस्मान्नः शोकसंसारसागरादिति इति रौप्याचलदानं॥
७९ अथ शर्कराचलदानं पाद्मे अष्टभिः शर्कराभारैरुत्तमः स्यान्महाचलः चतुर्भिर्मध्य
मः प्रोक्तोऽल्पदर्धेनाधमः स्मृतः भारेण स्वल्पवित्तोपि भारार्धेनापि वा पुनः चतुर्थांशो
न विष्कुंभादयः मंदारपारिजातकल्पवृक्षादयो हेममाः एवं पूर्ववत् पूर्वपश्चिमयोर्ह
रिचंदनसंतानौ धनदोदङ्मुखो गंधमादने प्राङ्मुखश्चानंदमूर्तिर्विपुलाचले हैमसु
पार्श्वे दक्षिणामुखी सुरभी अन्यत्सर्वं धान्यपर्वतवत् अद्येत्यादि॰ सकलपापक्षय
मानंतरं कल्पशतावधि विष्णुलोकनिवासानंतरं सप्तद्वीपाधिपत्यानंतरं जन्मायु
तत्र यावच्छिन्नायुरारोग्यादिकाम इति संकल्प्य दानवाक्यं च वक्तव्यं मंत्रास्तु आ ७२

रोग्यस्तत्सारोयं परमः शर्कराचल तस्मान्मानंदकारी त्वं कुरु शैलेंद्र सर्वदा अमृ
तं पिबतां ये तु निपेतुर्भुवि शीकराः देवानां तत्समुत्थोयं पाहि नः शर्करान्विल मनोभव
धनुर्मध्यादुद्भूता शर्करायतः तन्मयोसि महाशैल पाहि संसारसागरादिति स च ब्रा
ह्मणभोजनं स्वशक्त्या कार्यमेव दाता पूर्वं द्युःकृतोपवासः परेद्युर्दानानंतरमक्षारल
वणो भुंजीतेति एवं प्रसन्नचित्तो दानं दद्यादिति इति शर्कराचलदानं इति दशाचल
दानानि अथ शिखरदानानि विष्णुधर्मे गुडेक्षुलवणधान्यकाजातिशर्करा खर्जू
रतंदुलद्राक्षाक्षौद्रं मलयजेन च फलैर्मनोहरै रम्यैः शिखराणि प्रदापयेत् माघमासे शौ
र्पवेन्नालिकेरादिणौ पुत्राप्यां तृतीयायां प्रोष्ठपदशुक्लतृतीयायां वा दद्यात् शिखरप्रमाणं
तु भारत्समप्रमाणं प्रादेशाभ्यधिकं शरीरार्धप्रमाणं समं प्रादेशं वा अथाप्यसत्तान

रा॰चं॰ प्रयोगः उक्तकाले यजमानः कृतनित्यक्रियः पूर्वाह्णे अद्येत्यादि॰ दुःखसौभाग्यत्वाभावे
८० पूर्वककल्पकोटिशतत्रयपापच्छिन्ना गौरीभवननिवासानंतरं पृथ्वीपतीलकामः स्वो
गुडदानं करिष्ये इति संकल्प गणेशपूजनादि नांदीश्राद्धांतं कृत्वा आचार्यवरणादि य
थाविभवं वस्त्रालंकारादिभिर्मधुपर्कपूजांतं कृत्वा गोमयेनोपलिप्तायां भुवि रक्तपत्रा
ण्यास्तीर्य मले द्विहस्तविस्तारं उपरि हस्तमात्रविस्तारं रक्तदलमयं कुशालं धृत्वा आ
चार्यवरणादि यथाविभवं कृत्वा तदभ्यंतरे रक्तवस्त्रेणावेष्ट्य गुडादिद्रव्येणा पू
र्य उपरि रक्तपत्रकदमास्तीर्य तत्र कौमादिवस्त्रोपरि शंखेंदुवर्णाभं चंद्रमौलिं पद्मास
नासनस्त्रक्कमंडलुवरदाभयकरां देवीं गौरीं शिखरांशत्रेणावेष्ट्य कुंकुमादिना पू
जयेत् अथांगपूजा ॐ भवान्यै नमः पादौ पू॰ ॐ कामिन्यै॰ जानुनी पू॰ ॐ कामदेव्यै॰

ऊरू॰ ॐ जगद्धात्र्यै॰ नाभिं॰ ॐ आनंदायै॰ हृदयं॰ ॐ नंदायै॰ स्तनौ॰ ॐ शस्त्रास्त्रधा
रिण्यै॰ बाहू॰ ॐ शितिकंठायै॰ कंठं॰ ॐ सुमुखायै॰ मुखं॰ ॐ ललितायै॰ शिरः॰ ॐ
त्रिलोचनायै॰ नेत्राणि॰ ॐ चंद्रशेखरायै॰ भालं॰ ॐ सर्वात्मकायै॰ सर्वांगं॰ इत्यंग
पूजा ततोंजलिना पुष्पाण्यादाय प्रदक्षिणीकृत्य पठेत् यस्मान्निवासः पर्वत्याः शिख
रस्यैव हरस्य तु तस्मान्मां पाहि भगवान् त्वं गौरीसहितः सदेति पुष्पांजलिं समर्प्य गी
तवाद्यनिर्घोषैर्जागरं कुर्यात् ततः प्रभाते कृतस्नानादिनित्यक्रियः शिखर पश्चिम
भागे प्राङ्मुख उपविश्य अद्येत्यादि॰ संकल्पोक्तफलसंकीर्त्य गोत्राय शर्मणे इदं गुड
शिखरं गौरीप्रतिमासहितं सोपस्करं तुभ्यमहं संप्रददे न मम इति दद्यात् ततः सुवर्णं
दक्षिणां च दत्त्वा भूयसीं च दत्त्वा ब्राह्मणान् भोजयेत् तद्दिने क्षीरेण घृतं वा वाग्यतो भुक्त

दा॰चं॰ केशान्तर्णां माश्री पात् इक्षुरक्षादित्रिखरपरस्थाने संकल्पात्तत्प्रदं तत्र तत्र वक्तव्यमि
८१ त्ति शेषः अथ समस्तपापहरं त्रिशूलदानं वायुपुराणे कृष्णपक्षे चतुर्दश्यामष्टम्यां वासि
तेतरे कुर्याद्वादशानिष्केण त्रिशूलं लक्षणान्वितं सुवर्णमानेन तु निष्कचतुष्कः सौवर्णिकः
षट्पंचाशदधिकशतद्वयपलमूल्यो वा इति पक्षत्रयं शक्त्या तैर्यन्नाभौ निधाय संपू
र्णं तिलताम्र विनिर्मितं पात्रमाढकसमानं तत्र शूलं न्यसेत्ततः त्रिशूलाय नम इति
नाममंत्रेण पूजां कुर्यात् ततो विरूपाक्षं हेमकमलोपरि संपूज्य अघोर इति मंत्रेणाग्र
णि पर्यस्त ततो विप्रं दृष्ट्वा यथाविभवं वस्त्रालंकारादिभिः संपूज्य अद्येत्यादि॰ बुध्यावृद्धि
पूर्वकायवाङ्मनः कृतकर्माद्याजन्मार्जितान्यन्यजन्मोपार्जितशूलपीडाजनितपापा
पनोदकामोयं त्रिशूलं यथाशक्तिसोपस्करः गोत्राय शर्मणे तुभ्यमहं संप्रददे न मम ८१

दत्वा प्रार्थयेत् मंत्रास्तु भगवन्नुभयनेत्रघ्नदक्षयज्ञप्रमर्दनः ॰त वायुधप्रदानेन
पापं नश्यतु शंकर युगान्ते येन लोकानां त्वमंतकविनाशन विदग्धं तत्त्वपापेन पा तेन
पं व्यपोहय येन दग्धं क्षणार्धेन त्रिपुरं सुरदुर्जयं तेन पशुपते नाशु मम शूलं विनाश
य यदि बुद्धिकृतं पापं मनोवाक्कायमानसं तत्सर्वं क्षयमेवाशु शूलदानप्रभावत इति
ततः सुवर्णदक्षिणां द्विजभोजनं च भूयसीं दद्यात् इति त्रिशूलदानं अथ दारिद्र्यहरं
कुबेरमूर्तिदानं वायवीये पत्राद्वैनतदर्द्धार्धेन वा सार्द्धमाषद्वयादारभ्य पंचाशन्मा
षावधिकां वा कुबेरमूर्तिं पुष्पकविमानस्थां पार्श्वयोः पद्मशंखाकारयुतां कृत्वा शुभे
न्हि अद्येत्यादि॰ मम दारिद्र्यविनाशाय विशिष्टधनप्राप्त्यर्थं कुबेरमूर्तिदानं करिष्य
इति संकल्प्य श्वेतवस्त्रयुगाकृतां धनदमूर्तिं यथाशक्ति द्विचतुरेकद्रोणतंदुलराशौ तां

इत्यादि तिमंत्रस्तु गणनाथो विघ्नहरो गौरीसुतुरभीष्टदः अस्य दानेन मे शांतिः प्रसन्नो
स्तु सदा ममेति इति गणेशमूर्तिदानं अथ जगदंबिकादानं देवीपुराणे संकल्पादि पू
र्ववत् मंत्रस्तु आदिमाया महाशक्तिर्विश्वमाया जगन्मयी दानेनास्याः प्रसन्नास्तु
सर्वदा मम शोभवीति मंत्रस्तु वीणापुस्तकसंयुक्ता वाग्मूर्तिः समलंकृता गृहाणास्त्वं
द्विजश्रेष्ठ वाक्सिद्धिस्तु कुले ममेति इति सरस्वतीमूर्तिदानं अथ शालग्रामदानं
हेमाद्रौ पाद्मे शालग्रामशिलाचक्रं यो दद्याद्दानमुत्तमं भूचक्रं तेन दत्तं स्यात्सशै
लवनकाननमिति अथेत्यादि सशैलवनकाननभूचक्रदानसमफलकामोयं शाल
ग्रामो घंटाशंखादिशोपस्करणस्तुलसीपत्राद्यर्चितः सवस्त्रताम्रादिपात्रास्थितो
यथाशक्ति सोपस्करः सालंकृतो गोत्राय शर्मणे सालंकृताय तुभ्यमहं संप्रददे न ममेति

मंत्रस्तु महाकोशनिवासेन च क्रोधैरूपसोभितः शालग्रामप्रदानेन मम संतु मनोर
था इति सुवर्णदक्षिणा सर्वत्र विराजिते एवं संकल्पादि सर्वदेवमूर्तिशिलादाने ष्वपि
नियोजनीयं मणिः शालग्राम इति हेमाद्रिणाख्यानं घोरप्रतिग्रहे सुवगणित
मिति इति शालग्रामशिलादानं अथ शिवनाभिदानं लिंगपुराणे संकल्पादि पू
र्ववत् मंत्रस्तु शालग्रामशिलापुण्या भुक्तिमुक्तिप्रदायिनी शिवनाभप्रदानेन म
म संतु मनोरथा इति तथा ममकोशनिवासस्त्वं शालग्राममहेश्वर प्रीयतां तव दाने
न ब्रह्मा विष्णु महेश्वराः इति शिवनाभिदानं अथ लिंगदानं लिंगपुराणे संकल्पादि
पूर्ववत् मंत्रस्तु सालंकारमहालिंगनिवासस्त्वं वृषध्वज प्रीयतां तव दानेन शिव गो
पायनस्तु मे तथा कैलासवासी गौरीशो भवान् भगुनेत्रभृत् चराचरात्मको लिंग

रु

दा॰चं॰ रूपीदिशतु वांछितमिति रुद्राक्षमालां लिंगं दद्यात् कोटिपुण्यं भवति अथ मारकतलिं
८४ गदानं मंत्रस्तु इदं मारकतलिंगं रौप्यपीठसमन्वितं धान्यैर्द्रोणैर्दशभिर्युक्तमेकादशफ
लान्वितं संप्रदद्याद्विधानेन पृथ्वीदानफलं लभेदिति रुद्राक्षमालायुक्तं संकल्पायुक्त
मेव काश्मीरलिंगदाने तु मारकतपदस्थाने काश्मीरपदं वदेत मंत्रस्तु मृत्युंजयेश
गौरीशाश्रुतम्यां रूपचार्दनं संप्रदानेन तेशंभो मम संतु मनोरथाः इति इति लिंगदा
नं अथ घंटादानं पाद्मे अद्येत्यादि ममाकल्पघंटानादश्रवणलोकनिवासकामो
गोत्राय शर्मणे सुपूजिताय इमां घंटां विष्णुदेवतां तुभ्यमहं संप्रददे न मम इति मंत्रस्तु
घंटादेवप्रियानित्यं देवत्रासकरी सदा संप्रदानेन मे तस्या विजयोस्तु सदा मम इति सु
वर्णदक्षिणां इति घंटादानं अथ शंखदानं पाद्मे अद्येत्यादि गोत्राय शर्मणे अयं शं ८८

खविष्णुदैवतः तुभ्यमहं संप्रददे न मम इति मंत्रस्तु शंखः शुभकरो नित्यं सर्वमंग
लदायकः तस्मादस्य प्रदानेन शांतिरस्तु सदा मम इति सुवर्णदक्षिणा इति शंख
दानं अथ कालचक्रदानं मृत्युंजयकल्पे अद्येत्यादि महामृत्युनिरासार्थं कालचक्र
दानं करिष्ये इति संकल्प शक्तितो रौप्यकृतं चंद्राकारमुक्तामालात्मकं रत्नमयुक्तं का
लचक्रं विप्रं च गंधालंकारादिभिः संपूज्य दद्यात् गोत्राय शर्मणे सुपूजिताय इदं का
लचक्रं मुक्तामणिविभूषितं सप्रजिनमपमृत्युविनाशकाम तुभ्यमहं संप्रददे न मम
इति मंत्रस्तु इमं तेराजतं चक्रं इंदुरश्मीसमाकुलं मम मृत्युविनाशाय दत्तमायुर्विवृद्धय
इति ततः सुवर्णदक्षिणां कृत्वा अग्निं प्रतिष्ठाप्य ॐ कालचक्राय नमः स्वाहेति अनेन
मंत्रेणाष्टोत्तरशतं घृताक्ततिलैर्हुत्वा पायसादिना द्वादशब्राह्मणान्भोजयित्वा सय

दा०चं० मस्मरात्लवणासरुद्रुंनीतेति इतिकालचक्रदानं अथापमृत्युहरं यममूर्तिदानं म
८५ त्युंजये लोहपात्रे स्थितं कांस्यं तत्र पञ्चमस्तराजितं तस्मिन्कालेश्वरः कर्णे पुरुषाकारतां
गतः तद्रूपं तु ईषत्सीतोदंडहस्तो रक्तदृक्पाशहस्तकः रुद्रो वस्त्रालंकृतस्य द्रोणीणा
मभयप्रद अलंकृतः स्वर्णालंकारैस्त्रिलोकारैहुतैर्हृतः त्रिलोहकांस्यताम्रपित्तला
ख्यं पुरुषाकारैहुतैर्दंडहस्तैः कृत्वा महिषपृष्ठे अष्टम्यां वा चतुर्दश्यां दद्यात् दक्षिणां तय
तपूर्णो घटः सुवर्णं वा एवं कृत्वा दानेनापमृत्युनाशनम्मुच्यते नात्रोपसृष्टः इति अ
पमृत्युहरं यममूर्तिदानं अथ कालपुरुषदानं भविष्ये ज्ञेयं निष्कत्रातं पार्थ दानेषु वि
धिरुत्तमः मध्यमस्तु तदर्धेन तदर्धेनाधमस्मृतः अस्वशक्तौ पंचसौवर्णेन चानतो
ल्मेन तु प्रतिगृहीता दुःखशोकावहः स्यात् चतुर्थ्यां च चतुर्दश्यां भद्रायां करणे वा ८५

कुर्यात् कालपुरुषस्वरूपमाह रौप्यदंष्ट्रानं सुवर्णनेत्रं खड्गोद्यतकरं मांसपिंडयुतं वा
मकरं जपाकुसुमकुंडलं रक्तस्रग्विणं शंखमालाधरं छुरिकान्तं कटिदेशं अतिदीर्घं कृष्णा
जिनयुतं निर्माय अद्येत्यादि अपमृत्युव्याधिसर्वबाधानिवारणायाद्यैश्वर्यप्राप्ति
धर्मश्रीपुत्रपौत्रादिकराज्यांतपरमपदावाप्तिकामो वा कालपुरुषदानमहं करिष्ये
कालपुरुषं संपूज्य भविष्य द्विजदत्वा यथाविभवं वस्त्रालंकारादिभिः संपूज्य पुष्पांज
लिं गृहीत्वा पठेत् सर्वकालप्रसेयस्मात्कालस्त्वं तेन वाच्यते ब्रह्मविष्णुशिवादीनां त्व
मसाध्योसि सुव्रत पूजितस्त्वं यथाशक्त्या पार्थिवस्यांयया सुखमिति यद्युष्मसेन च
विमोक्षकुरु च नमोस्तु ते इति संप्रार्थ्य अद्येत्यादि अपमृत्युव्याधिइत्यादि राज्यप
रमपदावाप्तिकामो तं संकल्प वस्तु लं संकीर्त्य गोत्राय शर्मणे सुपूजिताय इमं कालपु

दा॰ चं॰ इत्थं सालंकृतं उक्तोपस्करं विष्णुदैवतं तुभ्यमहं संप्रददे न मम इति दत्वा प्रार्थयेत् पूर्वोक्तसंख्या
८६ कां सुवर्णं दक्षिणात्वेन दत्वा तं विसृज्य तन्मुखं नेक्षेत संन्यस्त क्रोच्च नमः कृष्णाय पृथिवी त्रिविक्रमतरि
समितिन्निपलान्हस्तौ पादौ प्रक्षाल्याचम्य भयसीं दक्षिणां दत्वा विप्रान् संभोज्य सुहृद्युतो
भुंजीतेति इति संपत्करं दानं अथ कृष्णाजिनदानं सौरपुराणे कृष्णाजिनं च मद्दिर्भीमे
श्रीचस्त्राधेनवः ब्रह्मलोकप्रदायीस्यात् तुलापुरुषएव चेति मात्स्ये वैशाखविपौर्णमा
सी ग्रहणं शशिसूर्ययोः पौर्णमासी तु या मासे आषाढी कार्त्तिकी तथा उत्तरायणे द्वा
दश्यां वा तस्यां दाने महाफलमिति अथास्य दानप्रयोगः पूर्वोक्तकाले गोमयेनोप
लिप्ते देशे आविकं वस्त्रेन तदुपरि सशृंगं सखुरं प्राग्ग्रीवं कृष्णाजिनमास्तीर्य सुवर्णशृ
गं रौप्यदंतं मौक्तिकपुच्छं स्वर्णनाभं कृत्वा तदुपर्यात्मप्रमाणांस्तिलान् संस्थाप्य वा ८६

ससा छायं संगपत्रलानि चत्वारि पात्राणि कांस्यघृतदुग्धमधुपूर्णानि चत्वारि मद
श्च प्रागादि दिक्षु दानदेशाद्दिक्षं पक्वान्नरवामत्रणं कुंभं च संस्थाप्य देशकालौ संकीर्त्य
मम सप्तजन्मजन्मोपार्जित पापनाशपितृपितामह सकलपरिवारभाग्यधनेदेशायं वि
मोद कामसकलइष्टफलावाप्तिकाम ब्रह्मलोकावाप्तिकाम श्चरुष्णाजिनदानमहं करिष्ये
इति संकल्प्य जीर्णपीतवाससा स्वांगानि संमृज्य यानि कानि च पापानि मया लोभात्कृतानि च
लोहपात्रप्रदानेन प्रनश्यंतु मम शुचे इति मंत्रेण सतिलं लोहपात्रं कृष्णाजिनस्य वा
मपादे निवेशयेत् यानि कानि च पापानि कर्मोत्थानि कृतानि च कांस्यपात्रप्रदानेन
क्रो तानि नश्यंतु मे सदेति मधुमयं स्यपात्रं कृष्णा॰ दक्षिणपादे निवेशयेत् परापवाद
पैशून्याकृथामांसस्य भक्षणात् तदुत्थं तु मे पापं ताम्रपात्रादिनश्यतु इति मंत्रेण

दा॰चं॰ सतिलं ताम्रपात्रं कृष्ण॰ वामहस्ते निवेशयेत् कन्यान्तरं तथा चैव परदारप्रमर्दनं रौप्यपा
८७ त्रप्रदानेन क्षिप्रं नाशं तु यातु मे इति मंत्रेण मधुमयं रौप्यपात्रं दक्षिणहस्ते॰ जन्मजन्मस
हस्रेषु कृतं पापं कुबुद्धिना सुवर्णपात्रदानान्नाशयाशु जनार्दन इति मंत्रेण साक्षतं हेम
पात्रं मध्ये तथा हेम मुक्ता विद्रुम दाडिम मातुलिंगानि धाय मृण्मय पात्रे कर्णयोः संस्थाप्य
द्विजं दत्वा यथा विभवं वस्त्रालंकारादिभिः संपूज्य पुनर्देशकालौ संकीर्त्य अमुकगोत्रोऽमुक
शर्माहं मम सप्तजन्मोपात्तादि॰ ब्रह्मलोकावाप्त्यं नमुक्तागोत्राय शर्मणे संपूजिताय
तुभ्यमहं इदं कृष्णाजिनं यथाशक्ति सोपस्करं वृषध्वजप्रीतये तुभ्यमहं संप्रददे न ममेति
एतद्दक्षिणापरिमाणं तु गारुडे सुवर्णनिष्कशतं तदर्धं वा ततो न्यूनं त्वेनाधिकफलं अ
स्येत्यस्य सद्विजो राजन् चित्रिरूपसमोऽपि सः दाने च सद्य कृते च दूरतः परिवर्जयेदिति॥ ८७

गारुडे उक्तं स्वर्गदात्येष्यतेन विप्रं मंडलं स्नानमाचरेत् तद्दक्षं कुंभसंदिने नीत्वा सेध्ये च
तुष्पथेऽ इतिनतो भूयसीं दक्षिणां दत्वा आशिष्यो गृह्णीयात् दानेनानेन सकलो शि
पापनाशो भवेदिदानेनफलं चेति हेमाद्रिः हेमाद्रि विज्ञो वल्लभग्रंथान्तरादवगन्तव्य इति
कृष्णाजिनदानं अथ शय्यादानं महाभारते यजमानः पुण्यप्रदेशे निर्मलस्थले नि
क्षिप्य तस्मिन् शय्यां मार्कीयेन स्याः समंतादीशानादि कोण चतुष्टये त्रिरेभागपंचदु
भाजनकमानं घृतकुंकुमगोधूम जलपूर्णकुंभमुर्वीवें घृतपूर्ण कलशोसन धान्यानि च
संस्थाप्य अद्येत्यादि मम समस्तपापक्षयकामारोग्यगणमेव्यसुत विमानकरणकेंद्रपुरग
मनानंतरं षष्टिसहस्रवर्षाधिकरणक क्रीडनस्त्री सहस्रसमावृत स्वर्गलोकसमानाधिवतत्व
नंदनान्तरं षष्टियोजनमंडलगो राज्यभोगानंतर शिवसायुज्यतावाप्तिकामः शय्यादानमहं

दा०चं० करिष्येइतिसंकल्प्यद्विजंसपत्नीकंकृत्वायथाविभवंवस्त्रालंकारादिभिः संपूज्यब्राह्मण्यायां
८८ लक्ष्मीनारायणप्रतिमांसुवर्णमयींसंस्थाप्यसंपूज्यसपत्नीकविप्रेणसहब्राह्मण्यांप्रदक्षिणीकृ
ण त्यनमः ममाप्येदैव्येचतुर्दिक्षुक्रमेणमंप्रतिष्ठ्यादिसंकीर्णंममसर्वपापक्षयेत्यादित्रिवि
सायुज्यताचान्तिकामोगोत्रायशर्मणेसुप्रतितायइमांब्राह्मण्यांईशानादिकोणचतुष्टयस्था
नक्रमेणघनकुंकुमगोधूमजलघृतपूर्णकुंभसमेतांदंसतलीप्रछिन्नांशुभगंडोपधानि
कांप्रच्छादनपटास्तृतांसप्तधान्ययुतांतांबूलायतनादर्शैलालवंगकर्पूरयुतांतांबूल
युतांसुगंधापरिमलभोग्यवस्त्रचंदनागरुदीपिकापानदच्छत्रचामरासनयुतांभोजन
नभाजनपात्रपंचवर्णवितानांकेत्राभसाधिन्यंजनशलाकापुष्पमालादियुतांलक्ष्मी
नारायणंप्रतिमासहितांयुक्तोपस्करांमंगीरोदैवतांगोत्रायशर्मणेसुप्रतिनायसालं ८८

कृतायसपत्नीकायतुभ्यमहंसंप्रददेनममेतिब्राह्मण्योपचेत्रितविप्रहस्तेमासनकुशोद
कंक्षिपेत् मंत्रस्तु यथानकृष्णशायनंशून्यंतुरमयाविना तथाशय्याममैवस्तुअशू
न्याजन्मजन्मनीति ततःसुवर्णदक्षिणांदद्यात् ततोभूयसींदत्वाब्राह्मणान्भोजये
दिति इतिशय्यादानं अथशयनदानं भविष्ये अद्येत्यादि गोत्रायशर्मणे इदंश ण
यनंसुखदं । यनंश्रीविष्णुप्रीतस्तुभ्यमहंसंप्रददेनममेति मंत्रस्तु यदुशयनं
सुखंदत्वाचस्वप्रियंसदा दानेनानेनसौभाग्यंसर्वदास्तुगृहेममेति ततःसुवर्णंद
क्षिणां इतिशयनदानं अथकशिपुदानं भविष्ये अद्येत्यादि गोत्रायशर्मणेकशि
पुंपाचम्लीबंसीतवातोष्णनिवारणकामतुभ्यमहंसंप्रददे मंत्रस्तु यदुचीनका
रव यौसपूरितमुरिमंसुदर्शनं तस्मादस्याप्रदानेनममसंत्स्यात्सर्वदाममेति कशिपु

दा॰चं॰ नं अथ वस्त्रदानानि नंदिपुराणे वस्त्रं यश्चार्थिने दद्याच्छुभं चापि यथेच्छया सन्नवेष्टनवा
न् श्रीमान् रूपस्पतिपुरं वसेद्दिवि विष्णुधर्मे वासोदिसर्वदैवत्यं सर्वप्रायोज्यमुच्यते।
८९ वस्त्रदानात्सवैषस्याद् द्रुमप्रविण संयुतः युक्तो लावण्यसौभाग्यो विरोगश्चैव तथा द्विजः
दत्वा कार्पासकं वस्त्रं स्वर्गलोके महीयते दत्वौर्णजं च तत्रापि फलं दशगुणं भवेदिति।
अथ श्वेतादि॰ ...गोत्राय शर्मणे इदं श्वेतवस्त्रं सूक्ष्मं प्रियं शिवं देहालंकरणं वादसस्य
सदैव तं तुभ्य... मह्यं संप्रददे दानममेति मंत्रस्तु सितं सूक्ष्मं सुखस्पर्शो दृशानादेः प्रियं
सदा देहालंकरणं यस्मादतः शांतिं प्रयच्छ मे इति श्वेतवस्त्रदानं अथ पीतस्य संक
ल्पादिसमस्तपापक्षयकामः मंत्रस्तु पीतवासः सुमंगल्यं देवानां प्रीतिवर्द्धनं दा
नेनानेन मे पापं हरत्वाशु जनार्दन इति इति पीतवस्त्रदानं अथ रक्तवस्त्रदाने भवि॰
८९

संकल्पादि सर्वत्र आदित्यप्रीतिकामः मंत्रस्तु रक्तवस्त्रं सदा रम्यं आदित्यस्य प्रियं सदा।
श्रीकरं रूपदं नित्यमतः शांतिं प्रयच्छ मे इति रक्तवस्त्रदानं अथ नीलवस्त्रदानं भविष्ये॰
संकल्पादि बलादि: शौर्यवृद्धिकामः मंत्रस्तु मनोहरं नीलवस्त्रं बलरामप्रियं सदा आयु
र्विवर्द्धनं श्रीमदतः शांतिं प्रयच्छ मे अथ नीलवस्त्रदानं अथ चित्रवस्त्रदानं भविष्ये
संकल्पादि: षण्मुखप्रीतिकामः मंत्रस्तु षण्मुखस्य प्रियं नित्यं चित्रवस्त्रं मनोहरं तस्मा
दस्य प्रदानेन सांनिरस्तु सदा ममेति इति चित्रवस्त्रं मनोहरं अथ कृष्णवस्त्रदानं
भविष्ये॰ संकल्पादि॰ सर्वारिष्टभयपीडामृत्युपरिहारापमृत्योः प्रीतिकामश्च मंत्रस्तु
इति कृष्णवस्त्रदानं अथ वटकूलदानं भविष्ये संकल्पादि पूर्ववत् कीर्तिकांतिस
र्वदेवप्रीतिकामश्च मंत्रस्तु वटकूले सदा रम्यं पवित्रं कांतिदं नृणां विदानी प्रीतिक ९

दा०चं० रमतः शांतिं प्रयच्छमे इति पट्टकूलदानं अथ मृतकर्परदानं भविष्ये संकल्पादि पू० पितृ
प्रीतिकामः मंत्रस्तु कीटजरसंपूर्णं मृतकर्परसंज्ञकं पितृणां प्रीतिदं यस्मादतः शांतिं प्रय
१० च्छमे इति मृतकर्परदानं अथ ऊर्णावस्त्रदानं भविष्ये संकल्पादि पू० सर्वदेवप्रीतिकामः
मंत्रस्तु ऊर्णावस्त्रं चारुचित्रं देवानां प्रीतिवर्द्धनं सुखस्पर्शकरं यस्मादतः शांतिं प्रय
च्छमे सकलानिधीरमादीनामथ्यपेमेव मंत्र० इति ऊर्णावस्त्रदानं इति कंबलदानं स्कां
दे कंबलपरगर्भस्थे न्महाशीतत्राणनाशकृत् स एव विपरीतश्चेन्महाशीतविनाशकृत्
संकल्पादि० श्रीविष्णुप्रीतिकामः मंत्रस्तु शीतवर्षोदरपुण्योद्भवो बलविवर्द्धनः कंब
लस्य प्रदानेन शांतिरस्तु सदा ममेति इति कंबलदानं अथ चित्रकंबलदानं भविष्ये०
संकल्पादि० श्रीलक्ष्मीनारायणप्रीतिकामः मंत्रस्तु ऊर्णापट्टस्त्रोचिकादिः सर्वदे १०

वप्रियः शुचिः चित्रकंबलदानेन मम संतु मनोरथाः इति चित्रकंबलदानं अथ ताम्रपा
त्रदानं वाराहपुराणे अथातः संप्रवक्ष्यामि पात्रदानमनुत्तमं कृत्वा ताम्रमयं पात्रं यथा
मद्विस्तरं तस्मिन्नैवेमां लक्ष्मी लक्ष्मीनारायणप्रतिमां उमामहेश्वरप्रतिमां च संप्रस्य
द्विजमपि पूजयित्वा परापवादपैशुन्याभक्ष्याभक्षणादिजो रोगस्य सकलपापनाशका
मो गोत्रायशर्मणे सुपूजिताय इदं ताम्रपात्रं उमामहेश्वरलक्ष्मीनारायणप्रतिमासहितं
चतुर्भ्यमदं संप्रददे न मम इति मंत्रस्तु परापवादपैशुन्यादभक्ष्यस्य च भक्षणात् पापं गो
त्रोत्थितं ताम्रपात्रदानात् प्रणश्यतु एवं संकल्प प्रतिमादि सपात्रदानेपु चोध्यं इति ता
म्रपात्रदानं अथ प्रसंगात् ताम्रदानमपि भविष्ये संकल्पं तु आरोग्यबलवृद्धिसर्वप्रीति
कामः मंत्रस्तु सर्वप्रीतिकरं ताम्रमारोग्यबलवर्द्धनं तस्मादस्य प्रदानेन शांतिरस्तु स

दा॰ नं॰ दाममेति इति तत्प्रदानं अथ कांस्यपात्रदानं वाराहे संकल्पादि॰ कामाकामकृतपा
९१ पनाशकामः मंत्रस्तु यानि पापान्यकामेन कानि कामाकामकृतानि च कांस्यपात्रप्रदाने
नतानि नश्यंतु मे सदेति इति कांस्यपात्रदानं अथ प्रसंगात्कांस्यदानमपि भविष्ये॥
संकल्पा॰ ब्रह्मविष्णुशिवप्रीतिकामः मंत्रस्तु कांस्ये ब्रह्मा शिवो साक्षात्कांस्यमेतद्विभा
वसु कांस्ये विष्णुमयं यस्मादतः शांतिं प्रयच्छ मे इति कांस्यदानं अथ लोहपात्रदानं भवि
ष्ये संकल्पः लोभाज्ज्ञानाज्ञानकृतपापक्षयकामः मंत्रस्तु ज्ञानाज्ञानकृतं पापं मया लोभा
त्कृतं चिरात् लोहपात्रप्रदानेन मम पीडां व्यपोहतु इति लोहपात्रदानं अथ रौप्यपात्र
दानं विष्णुधर्मे संकल्पादि॰ कन्यादूषणपरदाराभिमर्षणादिपापक्षयकामः मंत्रा
स्तु कन्यादूषणतः पापं परदाराभिमर्षणात् रौप्यपात्रप्रदानेन नानि नश्यंतु मे सदेति ९१

त

अथ सुवर्णपात्रदानं वाराहे संकल्पादि॰ जन्मांतरसहस्रोत्थदुरितनाशकामः मंत्रस्तु
जन्मांतरसहस्रेषु यत्कृतं दुष्कृतं मया तत्सर्वं नाशयिष्यामि स्वर्णपात्रप्रदानतः इति इति
सुवर्णपात्रदानं अथ स्थालीदानं भविष्ये कृत्वा ताम्रमयीं स्थालीं पलानां पंचभिः शु
तैः अशक्तस्तु तदर्धेन चतुर्थांशेन वा पुनः असमर्थः कांस्यमयीं पायसेन प्रपूर्णां घृत
शर्करया शाकजलपात्रयुतां च सवस्त्रां मंडले संस्थाप्य गंधमाल्यादिनालंकृत्य आदित्य
दिने संक्रांतौ चतुर्दश्यष्टमीषु च एकादश्यां तृतीयायां विप्राय प्रतिपादयेत् अ
द्येत्यादि यावज्जीवं सकुटुंबस्य यथेष्टमन्नभक्ष्यभोज्यादिलाभकामः इमां स्थालीं पा
यसपूर्णां घृतशर्कराशाकजलपात्रवस्त्रान्वितां मंडलस्थां सालंकृतां नामगोत्राय ब्राह्म
णाय तुभ्यमहं संप्रददे न मम इति मंत्रस्तु इमां पायसपूर्णां तु स्थालीं कृतजलाप्युतां दाना

दा०चं० त्संपनिपात्रेस्यादनःपादिमदृश्येरेति सुवर्णदक्षिणा इतिस्वर्णदानं अथपुराणदाना
९२ नि व्यासवीये अष्टादशपुराणानिमहीरूप्याणि पर्वणि लिखित्वाप्रयच्छेतस विद्या
पारगोभवेदिति रामायणंभारतंच दत्वास्वर्गमहीयते धर्मशास्त्रंनरोदत्वा स्वर्गलोके म
हीयते इतिभविष्ये धेनुदानसहस्रेण सम्यक्कृतेन यत्फलं तत्फलंसमवाप्नोतिपु
स्तकैकप्रदानतः इति तत्रैव कालमाह चंद्रसूर्योपरागेवासंक्रांत्ययनयोरपि शुभेन्हि
शुभनक्षत्रेकृत्वामंडपमुत्तमं चतुरस्रवितानेनचवध्वा पुष्पोपशोभितं तन्मध्यस्थास
नेदिव्येदिव्यगंधादिवासिते तत्रसंस्थाप्य यत्नेनागरुंतमयंशुभं संस्थाप्यपुस्तकंतन
त्रनैगमंभारतादिकं नैगमंवेदपुस्तकं पुण्यंपवित्रंसद्रत्नंवस्त्रालंकारभूषणैः पूज
येद्दिक्पालान्लोकपालांस्तथाक्रमं कन्याश्चैवप्रसंपूज्यामातरःकल्पयेत्तथा ॥ ब्रा ९२

ह्मणाय विदुषेदद्यात्पुस्तकमुत्तममिति अथास्यदानप्रयोगः यजमानःकृतनित्य
क्रियःशुचिः पुण्यकालेदशाकृत्यासंकल्प गोमयदानसमफलप्राप्तिस्वर्गलोकमहि
मत्वसकलचतुर्दशविद्यावेदविद्यापारगत्वकामेनिसंकल्प्य ब्राह्मणमेरपादि यथाश
क्त्याकृत्वापित्वानागमंडपंत्रेयस्त्रं दृष्ट्वाचतुर्यथापहृत्यचौरितेपुस्तकंसंस्थाप्यवे
दीस्थात्स्वतंत्रनिर्मोरंप्यमयंसिंहं चितन्त्राचास्य परितोलोकपालांश्चापास्वतन्त्रसु
वासिन्यकुमार्यश्चावास्वपागुरुर्योसिनीवालीराकायासरस्वती इंद्राणि मन्कुमतंप
चरूणिनी स्वस्त्ययं इतिमंत्रेणयद्वादिशीचाचमजनयेतदेयास्ता विश्वरूपाःपंक्त्याचो
चरंति स्तानोमंत्रेपुमर्थंद्रानीधेनुर्यीगत्मामुपसुपुनेतु इतिमंत्रेणआवाहितदेव
ताःचारशोपचारैःसंपूज्यद्विजंवरयित्वायथाविधिवंचमहालंकारादिभिःसंपूज्य भ

दा॰चं॰ अद्येत्यादि॰ गोत्रायशर्मणे संकल्पोक्तफलसंकीर्त्येदं पुस्तकं मतिमापुनंतसिद्धं चर्मणा
पट्टबद्धं सूत्रवेष्टितं नागमयं यंत्रेस्थितं यथाशक्ति सोपस्करं सारस्वतदैवतं तुभ्यम
९३ हं संप्रददे न मम मेति मंत्रोनु सर्वविद्याश्रयायसत्काकारणं लिखिताक्षरं पुस्तकस्य प्रदाने
नेन प्रीणातु मम भारत सरस्वती जगन्मातः शब्दब्रह्मादिदेवते यस्याप्रदानाद्वागीशा
प्रसन्नाजन्मजन्मनीति ततः सुवर्णदक्षिणां दद्यात् इति पुस्तकदानं अथ रत्नदानानि
भविष्ये माणिक्यं पद्मरागं च वैडूर्यं वज्रमेव च मारकतं च गोमेदं पुष्परागं च मौक्तिकं
हरितं च नवैतानि रत्नायुक्तानि सूरिभिरिति रत्नदानाद्धरिलक्ष्मीस्वपदं च प्रयच्छतिइ॰
अद्येत्यादि॰ लक्ष्मीनारायणप्रीत्यर्थं कामः मंत्रस्तु यस्माद्रत्नेषु सर्वेषु सर्वे देवाव्यव
स्थिताः तस्माद्रत्नप्रदानेन वांछितं फलमस्तु मे इति नवरत्नानि मौक्तिकदानमंत्रस्तु ९३

मौक्तिकं भूषणं विष्णोः श्रियो गौर्याः श्रियस्य च दानेनास्य सुखं चास्तु ऐहिकामुष्मिकं
ममेति प्रवालदानमंत्रस्तु प्रवालं तु श्रियं श्रीदं कांतिदं शुभदं तथा दानेनास्य प्रदत्तो
स्वं शांतिरस्तु सदा ममेति कर्णभूषणदानमंत्रस्तु भूषणं कर्णयोः स्त्रीणां स्वर्णरत्नादि
संयुतं ताटंकस्य प्रदानेन सौभाग्यं मम वर्द्धतामिति मांगल्यमणिदानमंत्रस्तु मांगल्य
मणयो लक्ष्म्या गौर्याः प्रीतिकराः सदा तस्मादेषां प्रदानेन शांतिरस्तु सदा ममेति हरिद्रा
दानमंत्रस्तु गौर्याः प्रीतिकरा नित्यं हरिद्रा सर्वकामदा तस्मादस्याः प्रदानेन सौभाग्यं ज
न्मजन्मनि कुंकुमदानमंत्रस्तु कुंकुमं शोभनं रम्यं सर्वदा मंगलप्रदं दानेनास्य प्रदत्तो
स्वं सौभाग्यं स्यात्सदा ममेति सिंदूरदानमंत्रस्तु सिंदूरं शोभनं रम्यं गणेशस्य प्रियंक
रं दानेनास्य परा लक्ष्मी स्थिरा मे चास्तु संततिः कस्तूरीदानमंत्रस्तु कस्तूरी भाग्यदा भाग्या

ति

दा॰ कौ॰ देवमर्त्यजनप्रिया दानेनास्याः प्रलक्ष्मीस्थिरा मेऽस्तु सदा ममेति कर्पूरदानमंत्रः कर्पू
५४ रं शीतलं चारु देवर्षिगुरुसेवितं तस्मादस्य प्रदानेन मम संतु मनोरथा इति तथा कर्पूरं ह
चिरं चिमत्रदाणे मंत्रः पूजितं पुण्यगंधस्थितानामेव त्वाप्रियतामिति नानाद्रव्यगंधदाने
मंत्रः गंधो मनोहरो दिव्यः ख्यातिदः सुखदः सदा तस्मादस्य प्रदानेन सुगंधः स्यात्सदा
ममेति इति भविष्यपुराणोक्ता नानाद्रव्यमंत्राः अथ देवगत्विंतिदानं भविष्यत्पुराणे
वसंतसमयं ज्ञाता गता देवालयं शुभं शिवस्य विष्णोरर्कस्य रुद्रदेवस्य वा पुनः स्ववंते
कृष्णपक्षे शुभे अच्छिन्नं देवमस्तके दिवारात्रौ महोत्सवे देवं जले मासचतुष्टयं स्रवन्ति दुस
स्वाद् स्वर्गलोकमवाप्नुयात् अत्र प्रयोगः वसंते शुभदिने स्थिरलग्ने पादौ कृत निस्तं कि ५४
यज्ञाचन्य प्राणातायस्य भद्रे सादिः देवाग्निरसिस्रवज्जलं विंदुसमस्तं रक्षाकाच्छिद्रिवपु

रनिवासकर्मणो मासचतुष्टयं दिवारात्रौ च देवे गत्वंतिकादानं कृत्वा भक्तिप्र्येवं पंचामृ
तादिस्नानं कृत्वा यथाशक्ति ब्राह्मणान्भोजयित्वा तेभ्यो दक्षिणां दद्यादिति अथ स्नाना
पिलोकानामुदकं जीवनं स्मृतं पवित्रं मलनं पवित्रमंतर्यस्मात्तदद्यं पुण्यमिच्छते
इति मंत्रो देवेगत्वंतिकादानं अथ प्रपादानं भविष्ये अतीते फाल्गुने मासि प्राप्ते चै
त्रमहोत्सवे पुण्येऽह्नि विप्रकथिते मंडपं तत्र कारयेदिति पुरमध्ये चतुष्पथे जलरहित
मार्गे वा समले प्रपामंडपं कारयित्वा तत्र मध्ये सुगंधकान् जलकुंभान् संस्थाप्य प्रपापा
लकं वृद्धं पुत्रं संस्थाप्य प्रार्थयेत् प्रपेयं सर्वसामान्या भूतेभ्यः परिकल्पिता अस्याः प्र
दानात्सकला मम संतु मनोरथाः ततो भक्तिचारतस्तो यद्यथा मासचतुष्टयात्रिप
संध्या महाराजन् नीचानां जीवनं परं प्रपादकार्य तस्माभोजयेदष्टतित्तोहिनान्

दा॰चं॰ अनेन विधिना यस्तु श्रीकेशायान्नाशनं पानीयमुत्तमं दद्यात्तस्य पुण्यफलं शृणु कपिलाग्र
९५ तदानस्य सम्यक् दत्तस्य यत्फलं तत्फलं समवाप्नोति सर्वैर्देवैः सुपूजितः इति प्रपादानं अ
थ दमनेऽग्निदानं भविष्ये अग्निदे मंनत्रैः शिशिरे कृतौ सुरालये मठे देवालये चैव अग्निं प्र
ज्वालते पुनः षष्टिवर्षसहस्राणि स्वर्गलोके महीयत इति तथा मन्त्रात्यये हन्ति सेवनार्थं
द्विजन्मनां दातव्यो दीपकोरवंडो देवमुद्दिश्य माधवमिति माधवो के च इति दमने शि
शिरे कृताग्निदानं अथ दीपदानं संवर्तः देवागारे द्विजागारे दीपं दद्याच्चतुष्पथे मे
धावी ज्ञानसंपन्नश्चक्षुष्मांश्च सदा भवेत् तथोत्तरायणे दीपप्रदानमिति प्रकृत्य मं
त्रस्तु दीपो ज्ञानप्रदो नित्यं देवतानां समीपतः दानेन नास्य भवेत्सौख्यं शांतिर्मे वांछि
तफलं सज्योतिस्तैलपात्रं च दीपं बहुसमन्वितं सुखस्यादस्य दानेन शांतिरस्तु सदा ९५

ममेति इति दीपदानं अथ पांथपरिचर्या भविष्ये पांथं परिचरेद्यस्तु स्नापनाशनभोज
नैः स्वशक्त्या न प्रयाति नरपतिक्रतु पाजिनमिति तथा अप्रणोद्योऽतिथिः सायमपि वा
भूत्तृणोदकैरिति याज्ञवल्क्यः प्रचेता अपि यः सायं वैश्वदेवान्ते मायं वा गृहमागतः दे
ववत्सूजनीयो सोऽस्य पोटः सोऽतिथिः स्मृतः इति तथा दिवातिथौ तु विमुखे गते यत्स्यात्तत्कं
न्नृणां तदेवाष्टगुणं पुंसामस्यौटे विमुखे गते तस्मात्स्वशक्त्या राजेन्द्र सूर्योढमतिथिं नरः
पूजयेत्पूजिते तस्मिन् पूजिताः सर्वदेवता इति इति पांथपरिचर्या अथ गोपरिचर्या वि
ष्णौ गवां कंडूयनं चैव सर्वकल्मषनाशनं गवां ग्रासप्रदानेन स्वर्गलोके महीयते
ग्रासप्रदानमंत्रस्तु पराशरे सुरभिस्त्वं जगन्मातर्देवी विष्णुपदे स्थिता सर्वदेवमये
ग्रासं मया दत्तमिमं ग्रह प्रार्थनामंत्रस्तु ततः सर्वमये देवि सर्वदेवैरलंकृते मातर्म

दा॰ चं॰ मोभिलषितं मम फलं कुरु नंदिनीति प्रार्थयेत् इति गोपरिचर्या अथ धर्मघटदानं विष्णुः
९५ शीतलेन सुगंधेन वारिणा पूरितं घटं शुक्लचंदनलिप्तांगं पुष्पदामोपशोभितं दध्योद
नभृतं कुर्यात् ब्राह्मणो तस्य चोपरि उपानच्छत्रसंयुक्तं धर्माख्यं कल्पयेत् घटं पुष्पाक्षतं गृ
हीत्वा नु इमं मंत्रमुदीरयेत् नमस्ते विष्णुरूपाय नमः सागरसंभव अपांपूर्णो दुरास्मात्त्वं
दुःखसंसारसागरादिति प्रार्थनामंत्रः उदकुंभो मया दत्तो ग्रीष्मकाले दिने दिने शीतो
दकप्रदानेन प्रीयतां मधुसूदन इति भविष्ये इत्ययं धर्मघटको मम वस्त्रवेष्टितो नव ब्रा
ह्मणस्य गृहे देयः सीतामलजलः शुचिः वसंतग्रीष्मयोर्मध्ये पानीयं यः क्षिपेत् दिदि
नेदिने सहस्रस्य गवां दानफलं लभेदिति उद्यापनं तु मासि मासि कार्यं भविष्ये मंडका
न्वेष्टकाभिश्च पक्वान्नैः सर्वकामिकैः उद्दिश्य शंकरं विष्णुं ब्रह्माणमथवा पितॄन् ततः स ९५

लिलं प्रोक्ष्यानेन मंत्रेण दद्यात् एष धर्मघटो दत्तो ब्रह्माविष्णुशिवात्मकः तस्य प्रसा
दात् सकला मम संतु मनोरथाः अनेन विधिना यस्तु धर्मकुंभं प्रयच्छति वसंतग्रीष्मसमये
गोप्रदानफलं लभेत् इति धर्मघटदानं अथ कलशदानं मंत्रस्तु कलशं शुभदं भव्यं मते
नपरिपूरितं दानेनास्य मद्ददस्तु सौख्यं शांतिरस्तु सदा ममेति जलपात्रदानमंत्रोपि वारि
ला णापूरितं पात्रं पवित्रं यद्ददाम्यहं शुभं देवर्षिपितृतृप्त्यर्थं गृहाण सत्रसन्नमेति अथ यज्ञोपवी
तदानं बोधायनः यज्ञोपवीतदानेन जायते ब्रह्मवर्चस्वी इति तस्मात्तानि प्रदेयानि ब्रा
ह्मणाय विपश्चिते इति यज्ञोपवीतदानं अथ मासदानानि हेमाद्रौ माघे तिलदानात् पा
पनाशः याम्यलोकजयकामश्च फाल्गुने प्रियंगुदानात् लक्ष्मीवान् भवति चैत्रे चित्रव
स्त्रदानात् सौभाग्यवान् भवति वैशाखे अपूपदानात् स्वर्गलोकावाप्तिः ज्येष्ठे छत्रदानात् स

दा० चं० वीन्कामानवाप्नोति आषाढे चंदनकर्पूरदानात्फलातिशयः श्रावणे वस्त्रदानान्महदा फ
९ लं भाद्रे फलितदानात्फलातिशयः आश्विने घृतदानेन रूपवान् कार्त्तिके दीपदाना
च्चानर्गलफलं मार्गशीर्षे लवणदानाद्रूपवान् पौषे स्वर्णदानात्तुष्टिमान् सर्वमासस्तुक्ले
पक्षे पुष्पदानान्महालक्ष्मीमवाप्नुयात् कृष्णपक्षे तु फलदानात्फलातिशयः इति मा
सपक्षदानानि अथ नित्यं घृतपात्रस्थछायादानानि भविष्ये कांस्यपात्रस्थितान्येन
आत्मरूपं निरीक्ष्य तु ससुवर्णं मुखो दद्यात्सर्वविघ्नोपशान्तये अद्येत्यादि० ममैतच्छ
रीराच्छिन्नसमस्तपापक्षयसर्वग्रहपीडाशांतिशरीरोत्थानिनाशमनः प्रसादवांछा
युरारोग्यादिसर्वसौख्यकामो गोत्रायशर्मणेऽहं स्वदेहछायावीक्षिताज्यपूरितं कांस्य
पात्रं ससुवर्णं विष्णुदैवतं तुभ्यमहं संप्रददे न ममेति मंत्रः यालक्ष्मीर्यच्चमेदोस्थांस ९७

वांगे समुपस्थिते तत्सर्वं नाशयात्वाज्यं तं श्रियमायुष्यवर्द्धनं आज्यं तेजः समुद्दिष्टमा
ज्यं पापहरं परं आज्यं सुराणामाहारः सर्वमाज्ये प्रतिष्ठितं आज्यपात्रप्रदानेन शांति
रस्तु सदा ममेति इति नित्यछायादानं अथाधिमासे दानं हेमाद्रौ पाद्मे अधिमासे
तु संप्राप्ते गुडसर्पिर्युतानि च चंद्रचद्दर्तुलान्सम्यक्कृत्वा दिपिष्टकृतानि च सान्यानिद
धिमिश्राणि अधिमासे त्वपोनम त्रयस्त्रिंशदपूपानि दातव्यानि दिने दिने व्यतिपा
तदिने पद्वा द्वादश्यामथवा पुनः पौर्णमास्याममायां वा नवम्यां वा तपोनम अष्टम्या
मथ पंचम्यां कुर्याद्दत्तमनुत्तमं अधिमासे तु संप्राप्ते त्रयस्त्रिंशत्तु देवताः उद्दिश्य पूप
दानेन पृथ्वीदानफलं भवेदिति देवतानामानि तु भविष्ये विष्णुं जिष्णुं महाविष्णुं हरिं
कृष्णमधोक्षजं केशवं माधवं रामं मच्युतं पुरुषोत्तमं गोविंदं वामनं श्रीशं श्रीकंठं विश्व

दा॰चं॰ साक्षिणं नारायणं मधुरिपुमनिरुद्धं त्रिविक्रमं वासुदेवं जगद्योनिमनंतं शेषशायिनं
१८ संकर्षणं प्रद्युम्नं च दैत्यारिं विश्वतो मुखं जनार्दनं धरावासं श्रीपतिं भास्करं शिवं त्रयः
स्त्रिंशद्दश्यानि कांस्यपात्रे निधाय च सघृतं सहिरण्यं च ब्राह्मणाय निवेदयेत् अद्ये
त्यादि॰ मम सभर्तृकपक्षस्य स्त्रीपुत्रपौत्रादीनां च आयुरारोग्यधनधान्यादिसर्वसंपद्वि
वृद्धिपृथ्वीदानसमफलावाप्तिविच्छादिश्रीपर्त्यं तत्रयस्त्रिंशद्देवताउद्दिश्य श्रीपुरुषो
त्तमभास्करप्रीतिकाम स्वगोत्राय शर्मणे सुपूजिताय दैवाय यणं कृत्रयस्त्रिंशद्दपूपो
पेतं कांस्यपात्रं सुवर्णघृतताम्बूलं दक्षिणादिसोपस्करं श्रीविष्णुरूपाय ब्राह्मणा
य तुभ्यमहं संप्रददे न मम इति दद्यात् दानमंत्रस्तु विष्णुरूपी सहस्रांशुः सर्वपा
पप्रणाशनः अपूपान्नप्रदानेन मम पापं व्यपोहतु नारायण जगन्नाथ भास्कर १८

प्रीतिकारकः दानेनानेन पुत्रांश्च संपदं च विवर्द्धय यस्य हस्ते गदा चक्रे गरुडो यस्य
रवं वाहनं शंखः करतले यस्य स मे विष्णुः प्रसीदतु कलाकाष्ठामुहूर्तेन निमेषघटिकादि
ना यो वंचति भूतानि तस्मै कालात्मने नमः कुरुक्षेत्रसमो देशः सूर्यपर्वाद्युतो हरिः
पृथ्वीसममिदं दानं कृष्णपुरुषोत्तम मलानं च विशुध्यर्थं पापं च शमनाय च पुत्र
पौत्रादिवृध्यर्थं प्रदत्तं तव भास्कर मंत्रैरेतैस्त्रयोदद्याच्चयस्त्रिंशदपूपकान् प्राप्नो
ति विपुलां लक्ष्मीं पुत्रपौत्रादिसंपदम् इत्युक्तं भारते एतन्मलमासव्रतेतु दानकृ
त्यं सर्वेषां नित्यं मलमासं यदा स्नानसंध्योपासनतर्पणं श्राद्धादिनियमं ज्ञात्वानि
ष्फलं तद्व्रतं विना भविष्ये अकर्णे मत्स्यवायोक्ते इत्यधिमासे दानव्रतं अथ संक्रां
तिदानि विश्वामित्रः मेषसंक्रमणे भानोर्मेषदानं महाफलं वृषसंक्रमणे दानं ग

दा॰ चं॰ वां प्रोक्तं तथैव च वस्त्रान्नदानपानानी मिथुने विहितानि तु घृतधेनुप्रदानं च कर्कटे चवि
११ क्रीष्यते पात्रं दद्यात्सुवर्णं सुवर्णे विहितं तथा कन्याप्रवेशे वस्त्राणां सुरभीणां त-
थैव च तुलाप्रवेशे धान्यानां बहुबीजफलान्यपि कीटप्रवेशे वस्त्राणां वेश्मानां दान
मुच्यते कीटोयः वृश्चिकः धेनुप्रवेशे वस्त्राणां पानानां दानमुच्यते झषप्रवेशे दारूणां
दानमग्नेस्तथैव च सषोमछस्तः कुंभप्रवेशे दानं तु गवामंबुतृणस्य च मीनप्रवे
शे स्वमालानामपि चोत्तमं दानान्येतानि मया द्विजेंद्राः प्रोक्तानि काले तु नरः प्रद
त्वा प्राप्नोति कामं मनसस्त्वभीष्टं तस्मात्प्रशस्तं तिद्द कालदानमिति अत्र काः समयः
ना इति संक्रांतिदानानि अथ नवधान्यदानमंत्राः हेमाद्रौ दानकांडे दर्शपर्वोजपेत्सर्वं त
तो विप्रं च पूजयेत् तन्मंत्रैः प्रदद्याद्धि सर्वदानेष्वयं विधिरिति तत्रादौ तंडुलदानमं॰ ११

पावनाः सर्वयज्ञेषु मंत्राः स्वाहोमकर्मणि तंडुलानां प्रदानेन प्रीयतामग्निदेवता त-
था व्रीहिजास्तंडुलाः शुद्धा पितृदेवद्विजप्रियाः तस्मादेषां प्रदानेन सर्वकामाश्च मे स
दा व्रीहिदानमंत्रः ब्रह्मणा निर्मिताः पूर्वं व्रीहियो यज्ञसाधनं अनेन व्रीहिदानेन मम
संतु मनोरथा इति यवदानमंत्रः धान्यराजाश्च मांगल्ये द्विजप्रीतिकरा यवाः तस्मा
देषां प्रदेयानि मम संतु मनोरथा इति यवदानमंत्रः पूर्वमेव दियज्ञार्थं ब्रह्मणा निर्मि
ता वरः अनेन यवदानेन शांतिरस्तु सदा मम इति गोधूमदानमंत्रः धान्यश्रेष्ठा मणिजं
बूद्वीपे गोधूमसंभवाः गंधर्वसोमसृष्टिस्पादतः शांतिं प्रयच्छतु मुद्गदानमंत्रः य
स्मान्मधुवनेकाले विष्णुदेहसमुद्भवाः पितृणां तृप्तिदा माषा मतः शांतिः सदास्तु मे च
णकदानमंत्रः पुरा गोवर्द्धने समये निर्मिताः कृष्णरक्षिताः चणकाः सर्वपापघ्नाश्च

दा॰ चं॰ नः शांतिरस्तु सदा ममेति तिलदानमंत्रस्तु तिलाः पापहरा नित्यं विष्णुदेहसमुद्भवाः त
स्मादेषां प्रदानेन पापं नाशय मेऽच्युतेति स्वर्णतिलदानमंत्रस्तु तिलाः पापहरा नित्यं
१०० विष्णुदेहसमुद्भवाः तस्मादेषां प्रदानेन पापं नाशय मेऽच्युतेति स्वर्णतिलदानमंत्र
स्तु तिलाः स्वर्णमया देव दुरितक्षयकारकाः विष्णुप्रीतिकरा नित्यं मतः शांतिं प्रय
च्छ मे सुवर्णतिलपात्रदानमंत्रस्तु तिलाः पुण्याः पवित्राश्च सर्वपापहराः शुभाः शु
क्लाश्चैव तथा कृष्णा विष्णुगात्रसमुद्भवाः यानि कानी च पापानि ब्रह्महत्यासमानि
च तिलपात्रप्रदानेन तानि नश्यंतु मे सदा निष्पावदानमंत्रस्तु निष्पावा निर्मिता
पूर्वं लोकानां हितकाम्यया तस्मादेषां प्रदानेन प्रीणातु पुरुषोत्तमः प्रियंगुदान
मंत्रस्तु प्रियंगवः प्रिया यस्माद्धान्येषु द्रव्यसाधनः अतस्त्वेषां प्रदानेन मम पाप १००

व्यपोहतु कोद्रवदानमंत्रस्तु कोद्रवा निर्मिता देवैः प्राणिनां जीवनाय वै तस्मादेषां
प्रदानेन प्रीणातु पुरुषोत्तमः लंकदानमंत्रस्तु दानप्रवर्द्धकालंकावलदा पुष्टिकारका
प्राणिप्रीतिकरा नित्यं मतः शांतिं प्रयच्छ मे इति मसूरिकादानमंत्रस्तु सवल्कलामसू
रास्तु दुरितक्षयकारकाः तस्मादेषां प्रदानेन विष्णुप्रीतिकरो ममेति सामान्यतः स
र्वधान्यदानमंत्रस्तु धान्यं करोति दातारमिह लोके परत्र च तस्मादस्य प्रदानेन मम
संतु मनोरथाः सामान्यधान्यमंत्रस्त्वत्र बोध्यः इति हेमाद्रौ नानाधान्यमंत्राः अथा
न्नदानमंत्रा अपि तत्रैव आयसोपायसदानमंत्रस्तु पापसंहारकरायुक्तं सघृतं कु
म्भभाजनं प्रदानान्मे फलं चारु ऐहिकामुष्मिकं च यदिति मंडकदानमंत्रस्तु सर्व
मंडलसंभूता गोल्यदुग्धयुता प्रिया जनार्द्दनादिदेवानां मतः पाहि सनातनेति ओ

दा॰चं॰ दनदानमंत्रस्तु अन्नं ब्रह्ममयं साक्षान्नराणां प्राणरक्षणं ओदनस्य प्रदानेन प्रीयतां चा
१०१ मनो मम मेति दध्यन्नदानमंत्रस्तु चंद्रमंडलमध्यस्थं चंद्रांशुजलसमप्रभं दध्यन्नस्य प्र
दानेन मम संतु मनोरथा इति कृसरान्नदानमंत्रस्तु कृसरान्नं स्वादु षड्रसं देवानां प्रीति
वर्द्धनं घृतव्यंजनसंयुक्तं दत्वा रोगैर्विमुच्यते इति नानाभक्ष्यदानमंत्रस्तु केत्राच
स्यप्रियाभक्ष्यास्त्रांसुरसादितुष्टिना पृथाविधायपात्रेषु यच्छंतु चलमोरसमिति स
र्वान्नदानमंत्रस्तु अन्नमेव परो लक्ष्मी अन्नमेव जनार्दनः अन्नं ब्रह्माखिलत्राणम
स्तु मे जन्मजन्मनीति इति दमाख्युक्तान्नदानमंत्राः अन्येपि केचिन्मंत्रास्तु तत्र सा
एव सक्तुदानमंत्रस्तु भोजनोपसाधतः प्रोक्तास्सक्तवो यतस्कर्मणि तस्मादेषां प्रदाने
न प्रीयतां मे प्रजापतिः शर्करादानमं॰ आमृतस्य कुलोत्पन्ना स्वादुधारादिशर्करा स १०१

र्वप्रीतिकरा नित्यमतः शांतिं प्रयच्छ मे इति शर्करादानमंत्रः तथा शर्करे रससंभूता
सदा स्वादुकरा प्रिया दानेनास्याः कृते मे नित्यं शर्करा जन्मजन्मनीति गुडदानमंत्रस्तु ॥
प्राणदः सर्वभूतानां नारीणां पार्वती तथा तथा रसानां प्रवरः सदैवेक्षुरसो मतः मम
तस्मात्सदा शांतिं दत्त्वा गुड सर्वदा इति इक्षुदंडदानमंत्रस्तु इक्षुदंडगुरुतर रसाढ्यं
सर्वकामदं तुभ्यं दानेन तेनाशु प्रीयतां परमेश्वर इति मधुदानमंत्रस्तु यस्मात्सितृणां
आद्ये पीतं मध्वमृतोद्भवं तस्मादस्य प्रदानेन मोक्षः स्याद् दुःखसागरादिति घृतदानमं॰
कामधेनोः समुद्भूतं देवानाममृतं हविः आयुर्विवर्द्धनं दानं राज्ये पातु सदैव मामिति
तैलदानमंत्रस्तु तैलं पुष्टिकरं नित्यं आयुः पापौघनाशनं अमंगल्यहरं श्रीदं मतं शां
तिं प्रयच्छ मे नवनीतदानमंत्रस्तु कामधेनोः समुद्भूतं विष्णोः प्रीतिकरं परं नवनीत

दा०चं० प्रदानेन वांछितं चास्तु मे सदैव क्षीरदानमंत्रस्तु अलक्ष्मीहरणं नित्यं नित्यं सौभाग्यवर्द्ध
नं क्षीरमंगलमायुष्यमतः शांतिं प्रयच्छ मे तथाग्निश्च नो जीवनं क्षीरं पितृदेवप्रियं सदा ॥
१०२ कांतिदं पुष्टिदं नित्यमतः शांतिं प्रयच्छ मे दधिदानमंत्रस्तु क्षीरमंथरसमुद्भूतं देवर्षिपितृ
प्रियं दधिस्यान्मम स्तनित्यं मतः शांतिं प्रयच्छ मे तक्रदानमंत्रस्तु तक्रं दधिसमुद्भूतं प्रा
णीनां तृप्तिदं परं आतक्रस्य प्रदानेन संततिः सफला मम तांबूलदानमंत्रस्तु सोप
स्करं चतांबूलं सर्वदा मंगलप्रदं प्रियं चैव तु देवानां सौगंध्यं वदने शुभे पादुका
दानमंत्रस्तु कंटकोच्छिष्टपाषाणवृश्चिकादिनिवारणे सर्वमार्गेषु सुखदे त्वतः शां
तिं प्रयच्छ मे छत्रदानमंत्रस्तु इदं मम सुखात्रातापहरणं कुरु तेके चाचमभो छत्रं लक्ष्मी
तेयदनं ममास्त्वनस्तु सदा शुभमिति चामरदानमंत्रस्तु पंचिकासर्वजंतूनां रोगस्यान्तरक १०२

री शुभा देवेंद्रप्रीतये दत्ता अतः शांतिं प्रयच्छ मे व्यजनदानमंत्रस्तु व्यजनेनायुदे
वसेन्नी ष्मकाले सुखप्रदे अस्य प्रदानात्सकला मम संतु मनोरथा दर्पणदानमंत्र
स्तु दर्शनेन त्वमादर्शो नृणां मंगलदायक शौचं सौभाग्यसत्कीर्त्तिं निर्मलत्वान मुलं मे ॥
अथ कुष्मांडदाने भविष्ये ब्रह्महत्यादिपापघ्नं कुष्मांडं सुखसौख्यदं कार्त्तिके च यथा मम्यां
दद्यात्पुण्यदिनेष्वपि अद्येत्यादि० मम ब्रह्महत्यादिनानासमस्तपापक्षयपूर्वकं बहुपुत्रपौ
त्रश्रीसौभाग्यादिसकलमनोरथ वासिकुष्मांडं बीजमहदस्त्रसंख्याकाव्द ब्रह्मलोकनिवास
कामो गोत्राय शर्मणे संप्रदिनाय इदं कुष्मांडफलं बहुबीजाढ्यं घृतलसनं तिलतिभ्रंमुक्ता
प्रवालरत्नहेमफलतांबूलवस्त्रादि युतं गोधूमराशिस्थितं वनस्पतिदैवतं सुवर्णदक्षि
णायुतं तुभ्यमहं संप्रददे न मम ते दिद्यात दानमंत्रस्तु ब्रह्मदत्यादिपापघ्नं ब्रह्मणानि

दा॰चं॰ र्मितंपुरा कृष्णोरं बहुधीनाःसुपुत्रपौत्रादिसिद्धिदं मुक्ताप्रवालहेमादियुक्तं निसंतवद्दि
१०३ जं अनंतपुण्यफलदमतःशांतिंप्रयच्छमे इतिकुंभाऽदानं अथदेशाचित्रोपेमकरक्रांतो
सौभाग्यवतीनांदानावक्रोषोक्तोहेमाद्रौव्यासेन सौभाग्यद्रव्यदानंचस्त्रीभिःकार्यमः
यत्नतः सभर्तृकाभिःसंक्रांतौफलादीनांप्रसरेवौ दानषोडशसंख्यासेन सौभाग्यद्र
व्यदानंचस्त्रीभिःकार्यमयत्नतः सभर्तृकाभिसंक्रांतौफलादीनांप्रषेरवौ दानंषोडश
संख्याकमेकैकस्यफलस्यच हेमराजतकांस्यानांभाजनानियथाभवेत वर्द्धितफलदान
मंत्र सतिलंगुडसंयुक्तंरसंप्रीतिकरंत्वणा रद्धिदंसंग्रहाणेदमतःशांतिंप्रयच्छमे स
तिलगुडपिण्यासदानमंत्रः मकरेर्कंतुसंप्राप्ते प्रासक्तिलगुडोद्विजे दानेनपुत्रसौभा
ग्यधनधान्यंसदास्तुमे भांडदानमंत्रः हिरण्यादिनिपात्राणिभांडानिमृण्मयानिच १०३

गृहाणेमानिवैयस्माद्भास्करःप्रीयतांमम गोधूमपिष्टदानमंत्रः गोधूमजनितंपिष्टंशा
र्करायतनसंयुतं द्विजवर्यगृहाणत्वमतःशांतिंप्रयच्छमे अर्घपस्थार्दतंदुलदानमंत्रः तंदु
लाःशालिजाःशुभ्रासार्द्राःअर्घ्यव्यवस्थिताः संप्रदानेनवैतेषांशांतिरस्तुसदाममे पाप
संशरितंकांस्यंपात्रदानमंत्रः सौभाग्यभाजनंकांस्यंपापसाम्येनशृवितं दानेनानेनसौ
भाग्यंशांतिरस्तुसदाममे सफलपुष्पकदलीस्तंभदानमंत्रः कदलीसर्वदोषघ्नीहेम
वर्णावरोरता दानेनास्याःपुत्रपौत्रंसौभाग्यंचास्तुमेसदा सौभाग्यद्रव्ययुतमर्घदान
मंत्रः संकंचुकंवस्त्रयुग्मंसत्थाकर्णावतंसकैः कंकुमस्यादिभर्यपस्थदानास्यातुष्टिर्वाम
म जानकीप्रीतये भर्यपत्रंदानमंत्रः रामपत्नीमहाभागेसौभाग्यद्रव्यसंस्कृते गृहाण
मानिभूषणानिसोपस्कराणिजानकी सौभाग्यंचसमारोग्यंसुतसौख्यंसदास्तुमे अथपो

दा॰ चं॰ इत्यादिभ्यः सोमषोडशफलदानानि भविष्यपुराणे दानं षोडशसंख्याकं मेरोः कस्य फल
१०४ स्य च एतेभ्यः ऋषिभ्यो दत्ते भिन्नमवाप्नुयादिति अद्येत्यादि॰ मम मलदत्यादिसमस्त
पापक्षयपूर्वकं दीयमानफलसमसंख्याकं वर्षसहस्रावधिस्वर्गनाभि स्वर्भोगोत्तरा
नेकसुखावाप्तये इहसकलसौभाग्यश्रीपुत्रपौत्रादिविस्तीर्णनानाफलावाप्तिकामो ना
नानामगोत्रेभ्यो नानाशर्मभ्यो षोडशेभ्यः सुपूजितेभ्यः इमानि षोडशसंख्याकान्यमुक
फलानि एकैकस्मै गोधूमतण्डुलफलदक्षिणायुतानि चन्दनस्पानि देवतानि दातुमहं
मुत्सृजेन मम मतिदत्ता येणमतं दानमन्त्रस्तु फले षोडशभिर्युक्तं सर्वधान्यसमन्वितं
द्विजवर्य गृहाण त्वं मम सन्तु मनोरथा इति इति षोडशफलदानानि अथ व्यतीपाते
सुवर्णदानं हेमाद्रौ शंकुकर्णमतं चोक्तं वत्स दीर्घनासिक अष्टनेत्र चतुर्वक्त्र चतुष्पा १०४

न

द चतुर्भुज एवं शरीरविस्तीर्ण शोषोनन मे च व्यतीपातनमोस्तु सोमसूर्यैकन
प्रभो यस्मिन् विहितेयते दानं तदनन्तफलं स्मृतमिति अद्येत्यादि॰ व्यतीपातमहापर्वनि
मित्ते सुवर्णमयहिमाचलदानसमस्तफलावाप्तये श्रीजनार्दनप्रीतिकामस्य
गोत्राय शर्मणे सुपूजिताय इदं सुवर्णं अग्निदैवतं सदक्षिणं तुभ्यमहं संप्रददे न मम इति
सुवर्णदानमन्त्रः पुंनामामाद्रिमिंस्वल्पं हेमविप्रकरार्पितं हिमाचलमितं भूत्वा प्रीय
तां मे जनार्दनः इति हिरण्यगर्भः इति व्यतीपाते सुवर्णदानं अथ व्यपसे च भूत्वा प्रीय
तां जनार्दन भविष्यपुराणे उदकुम्भप्रदाने पिशाचात्राकोपयः पुमान् भवेत् तेनाप्यस्य
तराम्ले लक्षितं च न्निते देनिनात्मना सर्वपापप्रशमनं सर्वदुःखविनाशनं सर्वरोगापहं नि
त्यं भुवेसनतिर्दनमिति सचनमन्त्रस्तु सिञ्चाम्यश्वत्थमूलं तु मम सततिरहं य अथव्यस्य

शा०चिं० रूपीभगवान्श्रीपतांमेजनार्दनः अनेनमंत्रचर्येणसिं चेदश्वत्थमूलकं नमस्तुपति
१०५ यःसम्यक्प्रार्थयेच्चपुनःपुनरिति सेचनफलमपिनेवेच यःकरोतितरोर्मूलेसकृत्मा
सचतुष्टयं मनोरथास्तस्यसिध्यन्तिश्रुतीरेषासनातनीति मासचतुष्टयेचैत्रादिके तथा
वैशाखधर्मेपि अश्वत्थमूलमासिंचेत्तोयेनबहुनासदा कुलानामयुतंतेननारितं
स्यान्नसंशयइति इत्यश्वत्थसेचनं अथापवर्णीयेअश्वत्थाभिमंत्रणं आरात्तइत्यस्या
ग्निकांडगंतःयानिलनाग्निऋषिःवनस्पतिर्देवताअनुष्टुप्छंदः अश्वत्थाभिमंत्रणेविनि
योगः ॐ आरात्तेअग्निरस्त्वारात्परशुरस्तुते निवातेत्वाभिवर्षतुस्वस्तितेस्तुवनस्पतिरिति
नेकारस्थानेमकारः स्वयंवक्तव्यइति पौराणमंत्रस्तु अक्षिस्पंदंभुजस्पंदंदुःस्वप्नंदु
ष्टदर्शनं शत्रूणांनसमुत्पन्नेअश्वत्थशमयस्वमे पुराणांतरेमंत्रांतरमप्युक्तं मूलतो १०५

ब्रह्मरूपायमध्यतोविष्णुरूपिणे अग्रतःशिवरूपायपिप्पलायनमोनमः अश्वत्थ
स्यशाखुमंदवासरएवकुर्यात् अन्यवासरेष्वर्चनंसेचनंदूरतरात्वकुर्यादित्युक्तं पा
द्मे इत्यश्वत्थसेवनविधिः अथसूर्यादीनांवैराग्यदानात्मकान्निज्योतिःसागरे॥
कौसुंभवस्त्रंगुडहेमताम्रंमाणिक्यगोधूममसूरवर्णपद्मं सवत्सगोदानमितिप्रणीतं
दुष्टायसूर्यायमसूरिकाश्च १ इतिसूर्यः घृतघटंशालितवस्त्रदधिशंखमौक्तिकंसुव
र्णंच रजतंचप्रदद्याच्चंद्रारिष्टप्रशांतये २ इतिचंद्रः प्रवालगोधूममसूरिकाश्चवृ
षःसनामः करवीरपुष्पं आरक्तवस्त्रंगुडहेमताम्रंदुष्टायभौमायचचंदनंचेति ३॥
रक्तचंदनं इतिभौमे नीलंवस्त्रंसुहेमकांस्यघृतपरंउपाचोदासिकाद्यसर्वः कांस्यं
दंतं कुंजरस्यायमेषोरोप्यंमस्यपुष्पजात्यादिकंच इतिबुधे ४ अश्वसुवर्णयुभ

दा॰ चं॰ पीतवस्त्रं सपीतधान्यं लवणं सपुष्पं संशर्करं तद्रजनीप्रयुक्तं दुष्टाय शांतिं गुरवे प्रणीता ५
गुरवे चित्रवस्त्रमपि दानमाचिंते दुष्टे गुणिवरैः प्रणीते तैलं दुर्लघृतं सुवर्णरूपवचं वज्रं
१०६ परिमलो भूवलो गिरौ नितिरिति शुक्रे ६ नीलवंशमहिषं वस्त्रं कृष्णं लोहं सदक्षिणं विष्णा
भिन्यूस्तु तं दयं शांति दुष्टप्रशांतये रिति शनौ ७ राहोर्दानं तुरंगमेषो गोमेदा कोमलकंबलो
सुवर्णनागरूपं च सतिलं ताम्रभाजनं इति राहो ८ केतोर्वैडूर्यममलं तैलं सृगमद
स्तथा उर्णा तिलैस्तु संयुक्तं दद्यात्केशापनुत्तये ९ इति नवग्रहाणां दानद्रव्याण्युक्ता
नि अथ ग्रहाणां दानानि शास्त्रे ग्रहदानविधिं वक्ष्ये सर्वसिद्धिकरं परं सर्वशांतिकरं
नृणां सर्वपापप्रणाशनम् इति दानकालमपि तत्रैव अयने विषुवे चंद्रसूर्योपरागे
जन्मर्क्षे भानुवासरे पंचदर्शां प्रणाशनम् इति दानकालमपि तत्रैव अनिकूलसु १०६

व्यकाले पुण्यदेशे विवाहादौ च दानकार्यं तत्रायं प्रकारः हस्तमात्रं स्थंडिलं हस्तोच्चा वेदिं कृ
त्वा गोमयेनोपलिप्य तत्र सर्वतोभद्रं पंचवर्णैर्विलिख्य वस्त्रं तत्र प्रसार्य तंदुलैस्तत्र नवको
ष्ठकं पद्मं कृत्वा कोष्ठे पुतंदुलैः पद्मानि कृत्वा तेषु निष्कत्रयेण यथाशक्त्या वा स्ववर्णप्र
तिमामादित्यादिग्रहाणां कृत्वा आदौ आदित्यं मध्यमकोष्ठे आग्नेये चंद्रं दक्षिणे भौमं मै
शान्यां बुधमुत्तरे गुरुं पूर्वे शुक्रं पश्चिमे शनिं नैऋत्यां राहुं वायव्यां केतुं तन्मंत्रैः सुतुष्प
गंधदीपादिनैवेद्यादिभिः संपूज्य प्रार्थयेत् प्रार्थनामंत्रस्तु पद्मासनः पद्मकरो द्विबाहुः
पद्मद्युतिः सप्ततुरंगवाहनः दिवाकरो लोकगुरुः किरीटी मम प्रसादं विदधातु देवः १ श्वेतां
बरः श्वेतविभूषणश्च श्वेतद्युतिर्दंडकरो द्विबाहुः चंद्रोऽमृतात्मा वरदः किरीटी श्रियासिम
त्वं प्रददातु देवः २ रक्तांबरो रक्तवपुः किरीटी चतुर्भुजो मेषगमो गदाभृत् धरासुतः शक्ति

दा०चं० धरश्च शूली सदा मम स्याद्वरदः प्रशांतः ३ पीतांबरः पीतवपुः किरीटी चतुर्भुजो दंडधरश्च
हारि चर्मासिधृक् सोमसुतः सदा मे सिंहादिरूढो वरदो बुधश्च ४ पीतांबरः पीतवपु
१०७ किरीटी चतुर्भुजो देवगुरुः प्रशांतः दधाति दंडं च कमंडलुं च तथाक्षसूत्रं वरदोस्तु मह्यं ५
श्वेतांबरः श्वेतवपुः किरीटी गृध्रस्थितिः स्त्रीकरो धनुष्मान् महाश्वेत समायुक्तः सामगा
यनि चेष्टयेत् नमस्ते सर्वलोकेशान नमस्ते भृगुनंदन ६ देवसर्वार्थसिध्यर्थकरो धनुष्मान्नमो
नमस्ते चतुर्भुज सूर्यसुत सदा मे कुपीष्टु भं महाचरमंदगामी ७ नीलांबरो नीलवपुः किरीटी
करालवक्त्रः करवालभृत्री चतुर्भुजश्चर्मधरश्च राहुः सिंहासनस्थो वरदोस्तु मह्यं ८ धूम्रोद्वि
बाहुर्वरदो गदाभृद्गृध्रासनस्थो विकृताननश्च किरीटी केयूरविभूषितांगः सदास्तु मे
केतुगणः प्रशांतः ९ इति संप्रार्थ्य दद्यात् प्रार्थनामंत्राः दानमंत्रास्तु अथ वासरदोषाप १०७

नोदस्दानानि संहिताप्रदीपे भानुस्तांबूलदानादपहरति नृणां वैकृतं वासरोत्थं सोमः श्रीखंड
दानात् रविसुतभवो रक्तपुष्पप्रदानात् सौम्यः ज्ञाकस्य मंत्री हरिहरनमनात् भार्गवः शुभ्रव
स्त्रैस्तैलं तस्मात्प्रभाते दिनकरतनयो ब्रह्मनत्या परोऽश्व १ इति वासरदोषापनोदस्दानानि
अथ सहस्रभोजनविधिः भविष्यपुराणे सहस्रभोजनस्येदं विधिं नारायणो मुनिः स
र्वेषां चैव पुण्यानामब्रवीत्पुण्यमुत्तमं यदा चित्तं च वित्तं च भक्तिः शास्त्रं निजायते तदानी
मेव कर्तव्यं प्रीतये परमात्मनः आषाढं चैव पौष्यं च मलमासं तथैव च गुरुभार्गवयोरस्तं
हित्वान्यस्मिन् शुभे दिने कृत्वादौ मंगलस्नानं शुद्धमन भार्यया सह कृत्वा द्रव्यं विशुध्यर्थं
प्रायश्चित्तं यथाविधिः दशांशद्रव्यमादाय विप्रेभ्यो विनिवेदयेत् द्रव्यं संप्रोक्ष्ये तस्याप
नत्वं पादितं तदा गणेशपूजनं पूर्वं मातृणां पूजनं ततः कृत्वाभ्युदयिकं श्राद्धं स्वस्तिवाच

दा॰चं॰ नपूर्वकं आचार्यं वरयेत्स्वाद्रव्यालंकारभूषणैः ऋत्विजो वरयेद्‌ शैववस्त्रादिभिश्च पूजयेत्
१०८ पुष्पमंडपिकां कृत्वा चतुरस्रां सुशोभनां कृत्वा सस्यस्तरणे प्रतिमां कर्षसंमितां सशक्तिकस्य
देवस्य भवानीशंकरस्य च तस्याधिदेवता विष्णुर्ब्रह्मा प्रत्यधिदेवता कृत्वा तु प्रतिमाशु
द्धिमग्न्युत्तारणपूर्वकं षोडशोपचारैश्च तत्तन्मंत्रैश्च पूजयेत् ऋग्भिश्च पावमानीभिरभि
षिच्य यथाविधि पुष्पमंडपिकामध्ये स्थापिते तंडुलोपरि प्रतिमां तत्र संस्थाप्य कलशो
च्चांबरावृते समंताद्देवदेवस्य क्रमेण चतुर्वृत्तः तत्तन्मंत्रेण नाम्ना वा पूजयेदंगदेवताः
कर्णिकायां भवानीशो सर्वाधिप्रत्यधिसंयुतः तद्बहिश्चैव चत्वारस्तद्बहिः षोडशक्रमात्
एकत्रिंशद्बहिश्चाष्टचत्वारिंशत्तथा क्रमात् पद्मस्य दलवच्छस्ताः कर्णिकाद्यास्तु संख्यया॥
त गणेशश्चंडी दुर्गा क्षेत्रपालभयंकराः मातृकाश्च तथा दिक्पाला रुद्राश्च वसवो ग्रहाः दिग्देवा १०८

ऋषयः सप्त सागरा भुवनत्रयं नद्यः सप्त गुणाश्चैव वेदाश्चात्मेत्यनुक्रमादिति अत्र
पीठयंत्रे स्थापनदेवताक्रमः प्रयोगश्चाह आदौ पद्मकर्णिकायां मध्येऽधिदेवता विष्णु
ब्रह्मा प्रत्यधिदेवतासहितं भवानीशंकरं स्थापयेत् तद्बहिः चतुर्दलपद्मे प्रादक्षिण्येन ग
णेशदुर्गाक्षेत्रपालाभयंकराः स्थाप्याः तद्बहिस्तृतीये षोडशदले षोडश मातरः गौरी पद्मा
शची मेधा सावित्री विजया जया देवसेना स्वधा स्वाहा मातरो लोकमातरः धृतिः पु
ष्टिस्तथा तुष्टिरात्मनः कुलदेवता इति तद्बहिरेकत्रिंशद्दले वसुरुद्रादित्याश्च अष्टौ वस
वस्तु ध्रुवो ध्रुवश्च सोमश्च आपश्चैवानिलोऽनलः प्रत्यूषश्च प्रभावश्च वसवोऽष्टौ प्रकीर्ति
ता इति एकादश रुद्राः वीरभद्रश्च शंभुश्च गौरीशोऽजैकपात्तथा अहिर्बुध्न्यः पीनाकी च भु
वनाधीश्वरस्तथा कपाली विरूपाक्षः स्थाणुर्भगाख्या रुद्रसंज्ञकाः इति एकादश रुद्राः अथा

दा०चं० द्वादशादित्याः धातार्यमा च मित्रश्च वरुणोंऽशो भगस्तथा इंद्रो विवस्वान्पूषा च पर्जन्यो द
१०९ शमस्तथा त्वष्टा विष्णुरिति प्रोक्ता आदित्या द्वादश क्रमादिति तद्वद्विपंचमेष्टाचत्वारिंश
दत्ले अष्टौ क्रमेण नवग्रहाः सूर्यसोमो महीपुत्रः सोमपुत्रो बृहस्पतिः शुक्रः शनैश्चरो रा
हुः केतवस्तु नवग्रहा इति दशलोकपालास्तु इंद्रो अग्निर्यमो नैर्ऋतिर्वरुणो वायुमेव
च कुबेर ईशान पश्चाच्च अनंतो दश दिग्पतिरिति सप्तकश्यपास्तु कश्यपो त्रिर्भरद्वाजो वि
श्वामित्रोथ गोतमः जमदग्निर्वशिष्ठश्च सप्तैते कश्यपक्रमादिति समुद्रास्तु पूर्वपश्चिम
दक्षिणोत्तराश्चत्वार इति समुद्रा इति भुवनत्रयं तु भूर्लोक भुवर्लोक स्वर्लोक इति सप्त
सरितस्तु गंगा च यमुना चैव गोदावरी सरस्वती नापि पयोष्णी रेवा च सप्त नद्यो यथाक्र
मादिति गुणास्तु सत्वो रजस्तमो गुणा इति चत्वारो वेदास्तु ऋग्वेदोथ यजुर्वेदो साम १९

वेदास्तथैवथर्वणः आत्मा च इत्येतांस्तत्रावाह्य पूजयेदिति इति पीठयंत्रे देवतास्थापनक्र
मः गंधपुष्पादिभिश्चैव सम्यगभ्यर्च्य यथाविधिरिति यथाशक्तिकृतं सर्वं समर्चनं निवेदये
त् देवदेव जगन्नाथ विश्वसाक्षिन्नमोस्तु ते गृहाण मा कृतां पूजां प्रसीद भगवान् गुरो गृह
यज्ञविधानेन ग[illegible]ह पूजां समाप्य च ऋत्विग्भिः सह वै होमं ततः कुर्याद्यथाविधिः कुंडे वा
स्थंडिले वापि स्वगृह्यविधिना द्विजः कृत्वाज्यभागपर्यंतमुपलेपादिकं ततः समिदाज्ये
न चरुणा यवैस्तिलसमन्वितैः सहैव चाहुतीस्तत्र व्याहृतीभिस्ततो क्रमात् जुहुयाद्द
त्विग्भिश्चैव चतुर्विंशोत्तरं शुभं प्रणवेनाहुतीं चैकां मंत्रेनैव पृथक्पृथक् देवतानां च
सर्वेषां नामभिर्जुहुयात्स्थतं देवतानाम गणदेवतानां ततः स्विष्टकृतं हुत्वा होमशेषं समाप
येत् आचार्यादीन्समभ्यर्च्य गंधपुष्पाक्षतादिभिः दद्याद्विभवसारेण दक्षिणां च यथोचि

दा॰चं॰ ली लेह्यंपेयंतथाचोष्यंखाद्यंचैवचषड्रसं देयापादौनिवेद्यानेद्विजवर्यान्समर्चये
११० त् भक्ष्यभोज्यादिकंदद्यात्त्रिधैस्यपदाभवेत् दक्षिणांचयथाशक्त्यासर्वेषांचयथास
तः ततश्चभोजयेद्विप्रान्सहस्रंसम्यगेवहि एकस्मिन्नेवकालेयाभवेद्वापिदिनेदिने॥
भवेद्यावत्सहस्रंतुतावद्वैद्विजभोजयेत् तेभ्योपिदक्षिणांदद्याद्दुत्तानेभ्यश्चशक्तितः
दीनांधकृपणादींश्चभोजयित्वास्वयंततः समाहितमनाकृत्वाभुंजीयात्सहबंधुभिः
एवंयःकुरुतेसम्यक्सहस्रद्विजभोजनं समाप्तेतुपुनर्होमकर्तव्योमुनिरब्रवीत् ब्र
ह्महाचसुरापीचपरद्रव्योपहारकाः मातृगामीचगोघ्नश्चपरदाररतःसदा ज्ञान
तोऽज्ञानतोवापिपापकारीयथेच्छया सदाचारविहीनस्तुदमदानविवर्जितः ईदृशो
पिद्विजोयःस्यात्सहस्रद्विजभोजनं कुरुतेसद्यएवैषसपुनातिनसंशयः ब्रह्मानंदं ११०

पदंगच्छेत्तेनपुण्येनचैवहि सहस्रभोजनाच्चैवनविप्रोधर्मउत्तम इतिसहस्रभो
जनं श्रीगुरुभ्योनमः दानानिसर्वाण्यभिधायतेषांप्रतिग्रहेशुद्धिमतोभिधास्येपापा
श्रियाभावितयाभरत्नैःप्रतिगृह्यसाधुजनेचनस्यात् तत्रमेषादानप्रकरणे दुष्टप्र
तिग्रहतोविप्रोराजन्भवतिपातकी नाभिभाषेततोदृष्ट्वातन्मुखंनावलोकयेदि
ति महाभारते दुःप्रतिगृहदग्धश्चविप्रस्यकिलभारत नपश्येद्वदनंपश्चान्नचैनम
भिवादयेदिति पूजयेगणकोव्यासोघोरग्नादीतथैवच महाशिल्पिवादकोवैघोपामयाची
तथैवच एतेचान्येसमालोक्यनरस्पृश्याःकदाचन यदाचिन्मोहतस्पृष्टःसचैलाभा
प्लुतःशुचिरिति. पराशरस्मृतौ मंत्रेणानेनदत्वानंप्रणिपत्यक्षमाप्यच आसीमांत
मनुव्रज्यतन्मुखंनावलोकयेदित्यादि महार्णवेच दुष्टग्रहस्पृष्टः प्रतिग्रहस्यदुष्टत्वं

दा॰ चं॰ चतुर्द्धा पात्रकालदेशप्रतिग्राह्यदोषभेदात् चांडालत्वपतितत्वादयो दातृदोषाः कु
१११ रुक्षेत्रादयो देशदोषाः चंद्रसूर्योपरागादयः कालदोषाः उभयतोमुखीत्वमहिषीत्वादयो
देयदोषाः तिलधेनुर्गजो वाजिमहिषाजिनमूर्तयः कृष्णाभिस्सप्तमानाच घोराः सप्तप्रति
ग्रहाइति निषेधात् प्रेतान्नमजिनं मणिरिति कचित्पाठः प्रेतान्नमेकादशाहादिकं श्राद्धान्न
भोजने मणिः शालग्रामइति हेमाद्रिः तत्रैव तन्निषेधोऽहणस्य नो परमापद्गतेनापि अंत्य
जातिप्रतिग्रहः न कार्यो ब्राह्मणेनेह आत्मनः श्रेयमिच्छता प्रतिग्रहाच्चांत्यजात्पतति
तत्क्षणाद्यतइति अंत्यजानाह मनुः रजकश्चर्मकश्चैव नटो बुरुड एव च कैवर्तो मेदभिल्ल
श्च सप्तैते अंत्यजाः स्मृताइति चांडालानाह व्यासः ब्राह्मण्यां शूद्रजातीतश्चांडालोऽध
मे वर्जितः कुमारीसंभवस्त्वेकः सगोत्रायां द्वितीयकः ब्राह्मण्यां शूद्रजातश्चांडालस्त्रिवि १११

धस्मृतइति तथा कुरुक्षेत्रे तथा ग्रहादीनामयः पुरुषो भवेत् गायत्रीमन्त्रजाप्येन समन्त्र
क्षमयेत्तु चिरिति कालदेयदोषभिन्नोऽसत्प्रतिग्रहनिषेधः असत्प्रतिग्रहप्रायश्चित्तकल्प
तरुः सर्वासत्प्रतिग्रहे प्रायश्चित्तं षड्त्रिंशन्मते देव्यालक्षजपेनैव शुध्यतेऽस
त्प्रतिग्रहादिति जपसंख्या तु जपित्वा त्रीणि सावित्र्याः सहस्राणि समाहित इति मि
ताक्षरे तद्द्विविधप्रकारेण प्रतिग्रहस्यासद्विषयत्वं तेन पतितादिभ्यो महिष्यादि
प्रतिग्रहे याज्ञवल्क्योक्तमिति विज्ञानेश्वरः स्मृत्यर्थसारे सर्वत्रानुक्तो दातृदेयका
लद्रव्येषु दुष्टेष्वपि द्वादशानिष्कप्रमाणद्रव्यप्रतिग्रहो कार्यं एवं सर्वत्र द्रव्यानुसा
रात्प्रायश्चित्तवृद्धिह्रासौ कल्प्यौ दातृदेशकालद्रव्येष्वन्यतरदोषे एकैकगुणवृद्धिः म
मणिना सोमपादीनामन्यतरप्रतिग्रहे गायत्र्याः शतसहस्रजपः भिक्षादिप्रतिग्रहेषु

दा॰चं॰ व्यमंत्रोच्चारणं न च प्रतिग्रहस्यानिषिद्धत्वात्कथं तत्र प्रायश्चित्तविधिरिति वाच्यं
११२ प्रतिग्रहेण विप्राणां ब्रह्मतेजः प्रदीप्यत इति अरुणस्मृत्या प्रायश्चित्ताम्नायेन च तत्क
थनं प्रतिग्रहसमर्थोपि प्रसंगं तत्र वर्जयेदिति स्पष्टनिषेधसत्वाच्च प्रायश्चित्तं
प्रतिगृहीतं सर्वं द्रव्यं सचेत्तत्र कार्यं सति द्रव्ये प्रायश्चित्ताधिकाराभावादिति स्मृत्य
र्थसारादयः अरुणस्मृतौ तु षण्णां द्वादशत्र्यब्दपरित्यागो वैकल्पिकः प्रोक्तो अ
रुणस्मृतौ प्रतिग्रहान्नषष्ठांशं वाणिज्याच्चतुर्थकं कृषेर्विंशतिमं भागं त्यक्त्वा
तो नास्ति पातकं प्रतिग्रहः कुत्सितानां त्रिभिः कृच्छ्रैर्विशुद्ध्यति रथो वाजी च भूमि
र्दासी तिल धेनुर्गजो जिनं सूयमानाश्च सूरभिर्घोराः सप्त प्रतिग्रहाः एतेषां प्रतिग्र
हे आहिताग्निः प्राजापत्येष्टिः स्मार्त्ताग्निमतश्चरुः स्थालीपाकः अनग्नेः कृच्छ्रत्रयं ११२

गुडधेन्वादि धेनूनां प्रायश्चित्तं तथोच्यते प्रतिग्रहे चरेद्विप्रः प्राजापत्यमतंद्रितः ज
पेद्गायत्र्यष्टसहस्रमप्सु चैवाघमर्षणं अहोरात्रोषितश्चैवं मुच्यते तेन किल्बिषात्
अयुतं जपसंख्या स्वहस्तदानं महादानं नासिदानं स्वदास्यं यन्न दत्तेन दानेन सर्वं
दत्तं भवेन्नृणां गृहोपस्करणं सर्वं गोमहीष्यादि भूषणं कुंडनी पेषणी चुल्ली उदकुं
भस्त्रमार्जनी शय्यां च भाजनं छत्रं वितानं रथ गोरथं तत्कृच्छ्रं चरेद्विप्रो महासांत
पनं तथा शतं वा भोजयेद्विप्रान्गायत्रीलक्षमेव च प्रायश्चित्ते कृते विप्रो मुच्यते
तत्प्रतिग्रहात् प्रायश्चित्तस्याकरणे पुष्येन्मीपतेन्तुसः अथ प्रतिग्रहं कृत्वा चरेच्चां
द्रायणत्रयं लक्षं च पंचगायत्र्यां जपेद्विद्वान्समाहितः त्रिगुणं वा जपं हुत्वा शतं वि
प्रांश्च भोजयेत् अश्वस्य विक्रयं कृत्वा स्वेतदेव व्रतं चरेत् कपिलाविक्रयं कृत्वा

दा॰ चं॰ चरेच्चान्द्रायणत्रयं गोशतंगोसहस्रंचरूप्यावैतरणीतथा चतस्रश्चैवगावश्च
जनीयाःप्रयत्नतः चतस्र उत्क्रांतिरुणपायसधेनवः गृहीत्वावैतरणीलोहंदंदंडम
११३ यावदं प्राजापत्यत्रयंकुर्याद्भोजयेच्चशतंद्विजान् जपेद्वावामदेव्यंचाग्निवसंकल्प
मेवचास्यंतरंवामदेव्यंजपन्मुच्येत्किल्विषात् यत्तकर्मणियाधेनुर्नधेनुस्तुपव
च मधुपर्केचयाधेनुसाधेनुकर्मसिद्धये एतत्प्रतिग्रहेमंत्रप्रायश्चित्तंनविद्यते पर्वताद
न्यायेप्रोक्तान्तथैवद्विमुखीचगो एषांप्रतिग्रहेविप्रःक्षिपेन्मासचतुष्टयं प्राजापत्येनकृ
च्छ्रेणषण्मासांस्तत्तौपरित्यजेत् जपेद्द्वादशलक्षंवागायत्र्याःसायंभोजिनः शतेनमुच्य
तेपापाद्विप्राणांभोजयेनच शतब्राह्मणभोजनेनेत्यर्थः गजप्रतिग्रहंकृत्वाद्विज
श्चान्द्रायणत्रयं महासांतपनंचापिप्रत्यक्षंचसमन्वितं रथप्रतिग्रहेलक्षंगायत्रीज ११३

पमाचरेत् अयुतंचाथगायत्र्याःसंगमस्नानमाचरेत् षण्मासांस्तुपरित्यज्यब्राह्मणा
न्भोजयेच्छुचिः प्रतिग्रहस्यान्यनान्विप्राप्रायश्चित्तंयथोदितं जपन्निरंतरंदेवीवैष्ण
वंव्रतमाचरेत् जपसंख्याअयुतादिः विद्यादानंगृहीत्वापियत्किंचित्पुस्तकादि
कं ब्राह्मणान्भोजयेच्चैकंकृच्छ्रमेकंसमाचरेत् पृथिवीप्रतिगृह्याथसद्गोलबलुकान
नं अपिधातुमयींगृह्यतत्प्रगृह्यत्रयंतथा भक्त्याशीलचर्णस्तोयैःक्षिपेन्मासचतुष्ट
यं एवंसिद्धिमवाप्नोतिद्विजःषण्मासानुत्सृजन् इदंचभूदाक्षिणप्रतिग्रह तद्दिनप्र
तिग्रहेतुष्टयं एवंसिद्धिमवाप्नोतिभूमिपः प्रतिगृण्हातियस्तुभूमिंप्रयच्छति तावुभौ
पुण्यकर्माणौनियतंस्वर्गगामिनौविष्णोक्तेः अथषोडशमहादानेतत्रैव तुलापुरु
षभागंचगृहीत्वाचांद्रकंचरेत् हिरण्यगर्भेचतथाब्रह्मांडेकल्पपादपे गलेत्रिपचण

दा॰ चं॰ स्नायी चेरस्तानपनद्दयं गोसहस्रप्रतिग्रहीयदा विमोक्षकामदः सत्रं यावद्द्वादशमा
११८ सेनैकेन शुध्यति हिरण्यकामधेन्वादिदानमंत्रयथोदितं महाभूतघटानेषु प्राय
श्चित्तमथोच्यते गायत्र्यादि ग्रहक्षेत्र प्राणायामसहस्रकैः नश्यंति पापसंघाश्च का
र्यादुःप्रतिग्रहे याचमानं नस्य कि येमचयानक नाशनं अचापमपिसंधिः अशुध्या
मिति सलेन मणिकंठेप्रतिसुचेत्यादिस्त्रेषु लिखनामपि विनियोगदर्शनात् ते
षामपि प्रामाण्यवत्वात् याचमानो जपस्याखिलेषु विधिनानंतरं तलोपेक्षायां गो
घ्नान्मातृपितृवधादित्यादिमंत्रेर्वेन तत्तस्यानंकनाशस्यफलत्वाच्च मायातनुस्यापि
शुपायमानो जपस्य प्रायश्चित्तत्वं पापानुरोधेन च जपसंख्या कल्पनीयेति दिक्
असत्प्रतिग्रहप्रायश्चित्तं अनापदि राजप्रतिग्रहान्निंदति याज्ञवल्क्यः नरा ११८

तः प्रतिगृण्हीयाल्लुब्धस्योच्छास्त्रवर्तिनः प्रतिगृह्णेषु नीचक्रीध्वजीवेश्यानरा
धिपः अष्टादश गुणं पूर्वात् पूर्वादेते ज्ञेयं यथोत्तरमिति। संवर्तः राजप्रतिग्रहो घोरो म
धुस्वादो विषोपमः पुत्रमांसं वरं प्रोक्तं न तु राजप्रतिग्रहः इति स्कांदे। महदेवोनिरुद
केनलवस्तु समागतं राजप्रतिग्रहात् सुष्टुः पुनर्जन्म न विंदति ब्राह्मण्यं यः परित्यज्य
द्रव्यलोभेन मोहितः विषयामिषलुब्धः स्यात् कुर्याद्राज्यप्रतिग्रहं नरके रौरवे घोरे त
स्य संपतनं ध्रुवं वृक्षादयाग्निना दग्धाः प्ररोहंति धनागमे राजप्रतिग्रहाद्दग्धो
न प्ररोहंति कर्हिचित् विष्णुधर्मोत्तरे दशशूनासमश्चक्री दशचक्रीसमो ध्व
जी दशध्वजीसमा वेश्या दशवेश्यासमो नृपः दशसूनासहस्राणि यो वाहयति
सौनिकः तेन तुल्यस्ततो राजा तस्मात् घोरः प्रतिग्रह इति अधार्मिकराजविषये

दा०चं० निंदा तथाचतत्रैवपित्र्योपवितं येषामन्नविषयेप्राप्तिर्यस्तैर्यज्ञपुनंहरिं यत्रतेभुंजां
११५ नेषांमनत्स्कनोदितंफलं यथापांरवदिसंकीर्णेनाश्वनस्पात्स्णात्स्कंदं एतेसत्नासद
स्त्राणांस्त्रानांभागिनोनृप येषामन्नेयज्ञपुरुषाकारणपुरुषोत्तम तेतुपापसमा
चारास्तुपापोपभागिनः अदुष्टानुराज्ञःप्रतिग्रहोनिनिंदितः अतएवोक्तं
दोगग्रासवायो प्राचीनत्रातादानमहामुनीनृराजप्रतिग्रहमयत्नेतरति अथप
तिनामकेनरासादोषाभावउपपत्स्यते नमस्त्रेनोजनपदेनकदर्योनमद्यपः नाना
हिताग्निनाविद्वान्अग्निरिणीकुतरति यास्तवस्त्रकथचनेपिराजप्रतिग्रहनिंदा
यांलुब्धस्याछास्त्रवर्तिनस्तिराजविशेषणादुष्टराजप्रतिग्रहोननिंदनस्तिगम्य
ते तथाचनारदोपि येषाम् प्रतिग्रहाराजान्नान्येषांब्राह्मणाहते ब्राह्मणाद्रते ब्रा ११५

स्वणाश्चैवराजानाचद्वावप्येतेघ्नतस्तौ नेनयोनेतरंकिंचित्सनाधर्माभिरक्षणे शुचि
नामशुचिनांचसन्निवेशोपयामसां समुद्रसमतांयातिनद्यानांधनागमः यच्छौस ग्र
स्थितंचैवशुद्धिमायातिकांचनं एवंधनागमःसर्वशुद्धिमायातिराजनीति राजप्रति
ग्रहमार्मषिजमाह ब्रद्दहारितराज्ञःप्रतिग्रहंकृत्वामासमप्सुसदाचरेत् षष्ठेकाले
पयोभक्षनपूर्णमासमपमुच्यते तर्पयित्वाद्विजानकामैःसततंनियतव्रतमितितद्
सत्प्रतिग्रहविषयमितिमाधवः अथपरद्रव्यप्रायश्चित्तंयाज्ञवल्क्यः अनभिरक्षतदा त्न
परस्करद्रव्यंव्रतमाचरेदिति कर्तव्यमितिशेषःयदीपोनज्ञातरत्स्यर्थः अतश्चपारदार्या
देरपिस्त्रीप्रत्रोस्साभ्यामितरेणाज्ञानस्यपरद्रव्यनास्येच तस्यप्रायश्चित्तमपिरद्रव्य
मेवकर्तव्यं तथाचहारितः रद्रस्यपरद्रव्यंप्रकाशमप्रकाशमिति तत्रद्रव्यानांसा

प्रा॰चं॰ धारणं प्रायश्चित्तं मनुराह वेदाभ्यासोऽन्वहं शक्त्या महायज्ञक्रियाक्षमाः नाशयंत्या
११९ शु पापानि महापातकजान्यपि यथैधोऽग्निर्नेसावह्निः प्राप्तानि दहति क्षणात् तथा
ज्ञानेरुतपापं कृत्स्नं दहति वेदवित् सव्याहृतीकाः प्रणवाः प्राणायामास्तु षोडश अपि
भ्रूणहनं मासात्पुनंत्यहरहः कृताः इति वशिष्ठः अथ कार्यं कृतं साग्नं शातं वेदं स्वधार्य
ते सर्वं तस्य वेदाग्निर्दहत्यग्निरिवेंधनमिति शंखे ऋग्वेदमभ्यसेद्यस्तु यजुःशाखाम
थापि च सूक्तानि सरहस्यानि अथर्वांगिरसस्तथा ब्राह्मणानि च कल्पांश्च षडंगानि
तथैव च इतिहासपुराणानि दैवतान्यस्तवनानि च जप्त्वा पापैः प्रमुच्येत धर्मस्थानैस्त
थापरैरिति कौर्मे जपस्तपस्तीर्थसेवा देवताभ्यर्चनं ब्रह्मणां सर्वपापप्रनाशनं मंत्रौ
षध्यविनाशनमिति वाठः अमावास्यां तिथिं प्राप्य यः समाराधयेद्धरं ब्राह्मणान् ११९

भोजयित्वा तु सर्वपापैः प्रमुच्यते कृष्णाष्टम्यां महादेवं तथा कृष्णां चतुर्दशीं संपूज्य ब्रा
ह्मणमुख्येः सर्वपापैः प्रमुच्यते त्रयोदश्यां तथा रात्रौ सोपहारं त्रिलोचनं दृष्ट्वेशं प्रथम
यामे मुच्यते सर्वपातकैः एकादश्यां निराहारः समभ्यर्च्य जनार्दनं द्वादश्यां शुक्लपक्ष
स्य सर्वपापैः प्रमुच्यते उपोषितश्चतुर्दश्यां कृष्णपक्षे समाहितः यमाय धर्मराजाय चि
त्रगुप्ताय चैव मात्र प्रत्येकं तिलसंयुक्तान् दद्यात्सप्तोदकांजलीन् स्नात्वा नद्यां तु पूर्वा
ह्णे मुच्यते सर्वपातकैरिति तथा च तत्रैवाध्यायांतरे अस्मिन्कलियुगे घोरे लोकाः पा
पानुवर्तिनः भविष्यंति महादेव वर्णाश्रमविवर्जिताः नान्यस्तत्र पापमिजंतूनां मुक्त्वा वा
राणसीं पुरीं सर्वपापप्रशमनं प्रायश्चित्तं कलौ युगे इति इति रहस्यसाधारणप्रायश्चि
त्तानि अथ प्रकीर्णकप्रायश्चित्तानि याज्ञवल्क्यः त्रिरात्रोपोषितो जप्त्वा ब्रह्मदाल

नि०चं० घमर्षणं अंतर्जले विशुध्येन गां च दत्वा पयस्विनीमिति मनु द्विष्येति यमभ्यस्य न
१२१ नमं इहतीनि च जप्त्वा च पौरुषं सूक्तं मुच्यते गुरुतल्पगः द्विषिष्यातमनसं स्वर्विदि नन
मंदिहो मद्दुरितं इति वा इति मिमेनः सहस्रशीर्षा पुरुषः एतेषां चतुर्णां सूक्तानामन्यतमं अ
भ्यस्य पौरुषं सूक्तं मां संजपित्वा अकामतो गुरुतल्पगः शुध्यतीति विज्ञानेश्वरादि सम
तोर्थः मूले अपोदेवा जपेत् सूक्तं मनआमुंचिवा तृचं अघमर्षणं च वा जप्त्वा मुच्यते ब्रह्म
हत्ययेति इति निदानचंद्रिकायां प्रायश्चित्तानि ग्रंथसमाप्तोयं संवत् १९०२ शा
के १७६७ आश्विनमासे कृष्णपक्षे चतुर्दश्यां भौमवासरे इदं पुस्तकं लिखि
तं ब्राह्मण शिवलालवनरंगढमध्ये शुभं भवतु श्रीरस्तु श्री श्री